प्रवेश सं० ४८८९० विषयः वेदः क्रम सं०

नाम आश्वलायनश्रौतसूत्रवृत्तिः (पूर्वषट्क) ग्रन्थकार श्रीनारायणम इति विदिता.

पत्र सं० १-२१८.

श्लोक सं० अक्षर सं० (पंक्ति) ३८. पंक्ति सं० (पृष्ठे) ११.

आकार १०.२" x ४.६." लिपिः दे.ना. आधारः का.

वि० विवरणम् १-३१, ३१-५२, ५२-१०७, १०९-

CD1779

पी० एस० यू० पा०—७७ एम० सी० ई०—२१५१—५०,०००

आ. ७६२४.

Indira Gandhi National
Centre for the Arts

ग्रन्थागार-अल्मोड़ा (गो)
नं. ३११२

अथसूत्रसूत्रं पट्टकेनागयवक्तुौमारंभोयं॥श्रीः॥

Indira Gandhi National
Centre for the Arts

१ श्रीगणेशायनमः॥ श्रीआश्वलायनाचार्यायनमः॥ प्रज्ञानानंदमूर्तिः सकलदिगतिगः सर्वदास
न्ननन्यः सर्वस्मात्स्वप्रकाशस्थिरचरनिलयः सत्यगात्मासदेवः॥ श्रौतस्मार्तक्रियात्माश्रुतिमनननि
दिध्यासवैराग्यलभ्यः सब्रह्माविष्णुरीशः सकलमपिजगत्सर्वदाव्यादसौनः॥१॥ गुणदोषविनिर्मुक्तं
स्वप्रकाशमनाकुलं॥ गंभीरबोधमानंदं नमामिब्रह्मशाश्वतं॥२॥ आश्वलायनसूत्रस्य भाष्यं भगव
ता कृतं॥ देवस्वामिसमाख्येन विस्तीर्णं सदनाकुलं॥३॥ तत्प्रसादान्मयेदानीं क्रियते वृत्तिरीदृशी॥ नाराय
णेन गार्ग्येण नरसिंहस्य सूनुना॥४॥ अथ तस्य समाम्नायस्य विताने योगापत्तिं वक्ष्यामः॥ लोके यानि
प्रसाम्नायं प्रयोगशास्त्राणि स्मर्यंते तान्यनुष्ठानोपयोगितयाध्ययनविध्याक्षिप्तत्वात्समाम्नायमंगत्वं
प्रतिपन्नानि॥ तत्रांगांगिनोरनुष्ठानकृतमानंतर्यमथशब्दो द्योतयति॥ एतस्येति शब्दो निर्दिष्टेषु रोरु
कुंतापवालखिल्यमहानाम्न्येतरेयब्राह्मणसहितस्य शाकलस्य बाष्कलस्य चाम्नायद्वयस्य एतदा १
श्वलायनसूत्रं नाम प्रयोगशास्त्रमित्यध्येतृप्रसिद्धं संबंधविशेषं द्योतयति॥ समाम्नायस्येत्युच्य
ते॥ एतस्यैव सम्यगभ्यासयुक्तस्येदं शास्त्रं नाखिलानां सम्यगभ्यासरहितानामिति। वितानेऽग्न्याधेय-

स्मिन्निति श्रौतं कर्मजातमग्निहोत्रादि वितानशब्देनोच्यते॥ समाम्नायस्य वितान इति दिरोदणाक्तौ
तेष्वेव खिलरहितत्वं॥ गार्ह्येषु सखिलत्वमेवेति ज्ञापयते॥ योगापत्तिः प्रयोगापत्तिः प्रयोगपरिणतिः
प्रयोगस्वरूपमित्यर्थः॥ तां वक्ष्याम इति ब्रुवन्निदमेव शास्त्रं प्रतिपाद्यमिति दर्शयति। तेन छंदोगप्रत्यय
प्राप्तस्य प्रयोज्यत्वादेः स्तोत्रियत्वादिकार्यसंबंध एवात्र विहितत्वेन गृहीतव्यो न त्वादेः स्वरूपमादितत्र
त्ययमेवेति प्रयोग एव शास्त्रस्य व्यापारो न त्वादेः प्रयोज्यस्वरूपेपीति। एतदुक्तं भवति। अत्यध्ययनविधिनए
वंक्तं लक्षणं समाम्नायमधिगम्यानंतरं श्रौते कर्मण्येतादृक्समाम्नायविहितप्रयोगज्ञानाय इदमादि शास्त्र
मधिगंतव्यमिति॥ श्रौतेषु कर्मस्वेतादृक्समाम्नायविहितां प्रयोगापत्तिं वक्ष्याम इत्युक्तं। इदानीं तेष्वाहिता
ग्नेरधिकार इत्याह। अग्न्याधेयप्रभृतीन्याहवैतानिकानि। अग्न्याधेयं प्रभृतिरादिरुपक्रमो येषां तान्यग्न्याधे
यप्रभृतीनि अग्निहोत्रादीनि कर्माण्याधानं कृत्वैव कर्तव्यानीत्यर्थः॥ तत्र हेतुमाह वैतानिकानीति। वितानेषु भ
वानि वैतानिकानि वितानसाध्यानीत्यर्थः। वितानं नाम त्रिष्वग्निष्वेकस्मिंश्च भावसाधनोऽग्नीनां विस्तारवाची। पूर्वस्मिंस्तु
धिकरणसाधनोऽग्निहोत्रादिकर्मवचनः॥ एतदुक्तं भवति। गार्हपत्यादिभिरग्निभिः साध्यानि श्रौतानि कर्मा

Indira Gandhi National
Centre for the Arts

थि। अनयस्त्वाधानसाध्यास्तस्मादाधानप्रभृतित्वं सिद्धं श्रौतानां कर्मणां। बहुवचनं सर्वश्रौतपरिग्रहार्थं। कर्मे
२ सर्वाणि श्रौतान्याधानादूर्ध्वमेव कर्तव्यानि। न किंचिदपि श्रौतमाधानादर्वागिति। अनेन प्रकारेणाधानस्य क
र्मार्थत्वनिराकरणेनाग्न्यर्थत्वमर्थात्साधितं भवति। तद्यदि कर्मार्थं स्यात्तर्हि कर्मक्रियेत तत्र कस्यचित्पुर
स्तादपि स्यादस्य परस्तादाधानं स्यात्तस्मादग्न्याधेयप्रभृतित्वं विहन्येत। आधानस्याग्न्यर्थत्वे च नायं दोषः। अ
तो बहुवचनेनाधानस्याग्न्यर्थत्वं साधितं भवति। तस्मादनाहिताग्नेः सोमवत्सादयो न भवंति। अवकीर्णिना
पश्वाद्यर्थं चाधानं न कर्तव्यमिति साधितं भवति। न परस्तात्॥ आहेस्यनेन सर्वमिदं शास्त्रं श्रुतिमूलमिति दर्श
यति। तेन अस्मिं छास्त्रे यदृष्टमूलं तदाम्नायांतरं मूलमिति साधितं भवति। अस्मिंस्तु मूलशास्त्रे अनिबद्धस्य
स्याम्नाये दृश्यमानस्य श्रुतित एव प्रयोगसिद्धिर्भवेदिति॥ श्रुतेः स्यात्तं व्यसंकीर्तनात् इति। आधानस्य प्रथमा
नुष्ठेयत्वात्प्रथमं तदेव वक्तव्यमिति प्राप्त आह। दर्शपूर्णमासौ तु पूर्वं व्याख्यास्यामस्तत्रस्य तत्राम्नातत्वात्॥ दर्श २
पूर्णमासशब्दौ यथा संख्येन सूर्याचंद्रमसोरत्यंतसंनिकृष्टविप्रकृष्टदेशस्थितिलक्षणवचनौ तद्योगादहो
रात्रवचनौ तद्योगादेव कर्मवचनौ। अत्र तु कर्मवचनौ पश्चात्स्योज्यवचनोपि दर्शशब्दो ल्यान्तरत्वात्पूर्वनि

विध्यंत इति इतिकर्तव्या पाः सन्ना स्या५

पात्यते। तु शब्दो विशेषद्योतकः। तत्र मंगसंहतिर्विधीयंत इत्यर्थः। सचावस्थानादिसंस्थाजपांतः प्रधानस्यातं
त्रणा तंत्रमित्युच्यते। तच्च दर्शपूर्णमासयोरेवाम्नातं नान्यास्विष्टिषु अतस्तत्सापेक्षत्वादन्यासां तावेत्रपू
र्वं व्याख्यातव्योस्यातां। एतदुक्तं भवति। आधानस्य प्रथमं प्रयोज्यत्वात्तस्मिंनेव प्रथमं व्याख्यातव्ये स
ति तत्साध्यस्य गार्हपत्यादेः पवमानेष्टिसापेक्षत्वात्ता अपि तत्रैव वक्तव्याः स्युः। उक्ता अपि विध्यंतसापेक्षत्वात्त
स्य च दर्शपूर्णमासयोरेवाम्नातत्वात्तद्व्याख्यानमंतरेण तज्ज्ञानाभावात्प्रयोक्तुं नैव शक्ष्यंते। अतो नेन विशेष
णता वेव पूर्वं व्याख्यास्याम इति नाधानमिति सूत्रस्यार्थः। इदानीं दर्शपूर्णमासयोर्व्याख्यानमारभते। दर्शपूर्ण
मासयोर्हविःष्वासन्नेषु होतामंत्रितः प्रागुदगाहवनीयादवस्थाय प्राङ्मुखो यज्ञोपवीत्याचम्य दक्षिणं वृद्धिहा
रं प्रपद्यते पूर्वेणोत्करमपरेण प्रणीताः॥ दर्शपूर्णमासयोरिति पिकारार्थं॥ अध्यायपरिसमाप्तेः वाक्येन शेषवि
विशेषासंयुक्तस्योभयार्थत्वाय। हविरासादनमामंत्रणं चोभयं संहतमेवेष्टिकस्य प्रवेशस्य निमित्तं। होत्रमित्युक्ते
दस्य समाख्यात इदं विहितानां पदार्थानां कर्ता होतेत्युच्यते। प्राङ्मुखत्वं स्थानाचमनाभ्यां संबध्यते। मध्यगत
स्य विशेषाग्रहणात्तद्यज्ञोपवीतं तत्सदाचमनार्थं तया नविधेयं स्मृतिप्राप्तत्वात्। अन्यार्थे च न भवतीति संबंधा
अग्न न स्ला तस्यानिस्ता इति पारिभाष्या प्राप्ती प्राङ्मुख ग्रहणं५

Indira Gandhi National Centre for the Arts

भावात्। एकवाक्यगतत्वात्कर्त्रा संबध्यमानस्य च प्रयोजनाभावः स्मृतिप्राप्तत्वादेव। अतः स्मृतिप्राप्तमिहानूद्य

३ ते। स्मार्तानां स्नानाचमनयज्ञोपवीतादीनां श्रौतकर्माविरुद्धानामस्मिन्शास्त्रे प्राप्तिप्रदर्शनार्थं। इदमाचमनं क

र्मांगं विधीयते। शौचार्थस्य गृहप्रवेशात्प्रागेव कृतत्वात्। तदुक्तं॥ मनःप्रसादात्सत्योक्त्यातपसास्नानकर्म

णा। आचांत्वा चात्मनः शुद्धिं कृत्वा कर्म समारभेदिति। दक्षिणावृन्नाम यो दक्षिणं पार्श्वं मध्येकृत्वा वर्तते स दक्षिणा

वृत्॥ विह्रियंतेऽग्नयो यस्मिन्देशे स विहारः। उत्करो नाम उत्कीर्यते वेदिपांसवो यस्मिन्देशे स उत्करः। प्रणीता ना

म आपो मंत्रसंस्कृताः आहवनीयस्योत्तरतो निहिताः॥ उत्करं प्रणीताश्चांतरेण यो देशस्तेन विहारं प्रपद्यते। ए

तदुक्तं भवति। स्नात्वाचम्य यज्ञोपवीती भूत्वा हविःष्वासन्नेषु आमंत्रितश्च सन्होता प्रागुदगाहवनीयाद्यो देश

स्तस्मिन्प्राङ्मुखो वस्त्वायनिष्क्रम्य प्राङ्मुख एव भूत्वाचम्य दक्षिणावृद्भूत्वा पूर्वेणोत्करमपरेण प्रणीता यो देशस्ते ३

न विहारं प्रपद्यत इति। उत्करप्रणीताग्रहणादेव विहारप्रसक्ते सिद्धे यद्विहारग्रहणं तत्सर्वः कर्ता सर्वकर्मणि

विहारप्रपदनं कुर्वन्दक्षिणावृद्भूत्वैतेन यथा प्रपद्येतेत्येवमर्थं। इध्ममपरेण प्रणीताः यदनोषधिहविष्कं कर्म त

द्प्रणीतामिहोच्यते। हविःश्रपणार्थत्वात्प्रणीतानां। तस्मिन्निध्ममपरेण प्रपद्यते प्रणीताः तत्र न संतीति।

चात्वालं चात्वालवत्सु। चात्वालो नाम गर्तः पशुसोमादिषु स्तियेषु उत्तरवेद्यर्थं मृत्स्ना ह्रियते तद्वत्सु

तेषु तमपरेण प्रपद्यते॥ सर्वत्रोत्करः पश्चिमावधिः। एतत्तीर्थमित्याचक्षते। एतमध्वानं तीर्थमित्याचक्ष

ते वेदविदः। आचक्षत इति ब्रुवन्वैदिकीयं संज्ञा॥ न पारिभाषिकीति दर्शयति। उत्कराद्यभावेपि स देशस्तीर्थ

संज्ञक एव देशलक्षणार्थत्वादुत्करादीनां ग्रहणस्येति। अतोग्निहोत्रादिष्वपि तेनैव यथाप्रपदनं सिद्धं भवति॥

तस्य नित्याः प्राचश्चेष्टाः। षट्सूत्राणि सर्वार्थानि तदर्थं तस्येति विशेषणं कृतं। असत्यस्मिन्होतुः प्रकृत

त्वात्तस्यैवेमे विधयः स्युः। अस्मिंस्तु सति संनिकृष्टविषयत्वात्सर्वनाम्नस्तीर्थेन विहारप्रपदनार्होयः क

र्ता विहितः तस्यैवेमे विधयो भवंतीति तस्येति विशेषणं कृतवानाचार्यः। नित्या इत्यनेन नप्राकृत्वेष्टता याः नित्य

त्वं न विधातव्यं। विहितत्वादेव स्वरूपनित्यत्वयोः सिद्धत्वात्। अतस्तस्यैवोर्थः। तस्य बाह्यानां चेष्टानामु

परमेपि मनोवाक्कायसंयंत्रणादयो नित्याः एवेति। प्राच इति शब्दः पूर्वदिग्वाची पुंसि बहुवचनांतः चेष्टाद

Indira Gandhi National
Centre for the Arts

तिक्रियावाचीस्त्रियांबहुवचनांतः तत्रप्राचइत्यत्रपुंस्त्व प्राक्त्वेनसंबंधात्कर्तुः प्राङ्मुखत्वं विधीयते। चेष्टा
४ शब्दगतबहुवचनेनास्यबहुत्वस्यसामानाधिकरण्यादेव चेष्टानां प्राक्त्वं विधीयते। तासांअमूर्तत्वात्स्वतः प्रा
क्त्वासंभवात्तत्साधनेषु प्रागग्रता तासां च प्राच्येवापवर्ग इति एवं विधिबलाद्भवति। एतदुक्तं भवति। योय
स्तीर्थेन विहारं प्रपन्नस्तस्य तस्य प्राङ्भिः क्रमणान्मनो वाक्काययंत्रणाद्यो नित्याः स्युः कर्तुश्च प्राङ्मुखत्वं
चेष्टानां च प्रागपवर्गता तत्साधनानां च प्रागग्रता इति विषमसूत्रप्रणयनेन व्याख्यानतो विशेषप्रतिपत्ति
र्न हि संदेहादलक्षणमित्येषा परिभाषा संगृहीता भवति। अंकधारणा च। अंकमूरूपस्थः तस्य करणं द
क्षिणोत्तरिलोपस्थेनेति वक्ष्यमाणरूपं धारणेत्युच्यते सा च नित्या भवेदुपवेशनकालादारभ्याकर्मपरिस ४
माप्तेरविच्छेदेन कार्येत्यर्थः। अंकधारणस्योपवेशनांगत्वेन प्राप्तस्यादृष्टार्थत्वापरिहारायैवं नित्यत्वेपि
प्राप्ते तन्नित्यतावचनं न पत्नीसांयाजिके अनिरसात्तत्वमित्येवमादिषूपवेशनेषु मंत्रनिषेधेपि वक्ष्य

माणस्योपवेशनप्रकारस्य नित्यत्वेन प्रापणार्थं मंत्रविध्यसंबंधेष्वप्यग्निहोत्रादिषु वक्ष्यमाणलक्षणस्यैवो
पवेशनस्य प्रापणार्थं च। यज्ञोपवीतशौचे च। पूर्वस्य यज्ञोपवीतग्रहणस्यस्मार्तानां प्रापणार्थत्वान्निवीतप्राची
नावीतयोर्मानुषपैतृकयोः कर्मणोः स्मार्तत्वेन प्राप्तौ सत्यां नियमार्थमिदमुच्यते यत्र निवीतप्राचीनावीते
विधीयेते तत्रैव ते भवतो। न मानुषं पैतृकं वा कर्मन्दृष्टेति। तयोर्विध्यभावे यज्ञोपवीतमेवेति नियम्यते। देश
स्यांगप्रधानार्थत्वादिकादिभक्षणादेश्चांगत्वादस्य च विहारदेशे प्राप्तौ सत्यामेवं शौचग्रहणे न नियम्यते कृत
र्थमप्यशुचित्वं संपाद्य इतद्विहारान्निष्क्रम्य बहिः कर्तव्यो। अंतर्विहारे शुचिरेव नित्यं स्यादिति। विहाराद्व्या
वृत्तिश्च तत्र चेत्कर्म॥ व्यावृत्तिः पृष्ठतः कृतिः। न विहारं पृष्ठतः कुर्यात्तत्र चेद्विहारे कर्म कुर्वन्भवेत्स्यायोग
मध्येपि कर्म कुर्वतामेवायं नियमो नोपरतकर्मणां इत्यर्थः॥ अतो विहारव्यावृत्तिनिषेधात्। पश्चादस्योप
विश्य पश्चात्स्वस्य धिष्ण्यस्योपविशति। पश्चादुत्तरवेदेरुपविश्याध्वर्युरित्येवमादौ मध्यरेखायां अपक्रम्य उ

Indira Gandhi National
Centre for the Arts

पात्नीसमां निधाय प्रपदेन रहित कर्म्म पाणी श्वमतेधि स्यात्पि ५

नरतउपविशेत्। चशब्दस्त्रिषु सूत्रेषु नित्यत्वानुकर्षणार्थः॥ तत्र चेत्कर्मेति वचनाद्ब्रह्मणोप्ययं नियमो भवेत्।
५ उत्तरसूत्रेंगे चेदं पदत्रयं तेन ब्रह्मणो दक्षिणांगव्यापारः सिद्धो भवति। एकांगवचनेन दक्षिणे प्रतीयात्। एकशब्दो
के वल्यवचनः एकं च तदंगं चेत्येकांगं सव्यदक्षिणभेदेन द्वित्वयोगि यदंगं हस्तादि तस्य द्वित्वेन विनावचनेन दक्षि
णमेवांगं साधनं विद्यात्। द्वित्वयोगे द्वाभ्यां कुर्यात्। एकवचन बहुवचनेक त्रैकत्व बहुत्वापेक्षे॥ एकत्वादीना
मन्यत्रोपयोगात्। केवलांगवचनमेव दक्षिणप्रत्ययस्य निमित्तमित्यर्थः। हस्तेन वा पादेन वेत्युदाहरणं॥ अना
देशो। द्वित्वयोगिनोंगस्यानादेशे क्रियामात्रविधान इत्यर्थः। तत्रापि दक्षिणं विद्यात् प्रपद्यते। अभिक्रम्य। अं
इडापा३ गुली। रंगुलीभिरित्युदाहरणानि। चक्षुरादेरनंगत्वात्तेष्वयं नियमो नास्ति अवयवविशेषाश्रयाहि शक्तयश्चक्षु
रादयउच्यंते। नावयवा इति॥ कर्मचोदनायां होतारं। कर्तृरहिते क्रियाविधौ होतारं कर्त्तारं विद्यात्॥ कर्तृसहिते स ए ५
व कर्त्ता भवेत्। येन सहितं तत्कर्म स्यात्। कर्तृरहितोपि गुणविधिः सर्वार्थ एव कर्मचोदनायामिति विशेषणात्।
सोमग्रहण प्रातरनुवाकादीनि उदाहरणानि२

अनार्षेति ग्रहणं न शब्दा अनार्षा न तु प्रसमीदनमिसत्र न स्यात्। २
यदि पुरोडाशस्फुटेत् आपो न्यपहरेषु अभिन्नो घर्म इत्युदाहरणानि जपने। तुल्यवाङ्गिरसानि वाज्याहुति हस्ते सर्वना इत्युदाहरणानि२

नेदं होतुः प्रापकं किंतर्हि प्राप्तस्य नियामकं तेनेष्टि पशु सोमेभ्योन्यत्र न होतुरेव कर्तृत्वनियम इति। ददातीति
यजमानं। स्वत्वव्यावृत्ति पूर्वके परस्वत्वापादान पर्यंते ददातिविधौ यजमानं कर्तारं विद्यात्। जुहोति जपतीति
प्रायश्चित्ते ब्रह्माणं। तृतीयाध्याय शेषे चरे प्रायश्चित्त प्रकरणे जुहोति जपति कर्तारं ब्रह्माणं विद्यात् जपशब्देन
त्रसाहचर्याज्जपादिपदं गृह्यते तस्मिन्प्रकरणे मुख्यजपस्याभावात्। एवं च सति कर्म करणत्वेन होममंत्रस्या
पि ग्रहणे सिद्धे यज्जुहोति ग्रहणं तज्जपग्रहणेन होममंत्रानग्रहीतुं इत्येवमर्थं। तेन पित्र्यावां जपादि लोपेपि होममं
त्रान लुप्यंते॥ ऋचं पादग्रहणे। पादशब्दोत्र मूलवाची ऋचो अंतर्नमस्युंदधतां पर्वतेनेत्युत्तरतोग्नेरित्यादौ मूलग्र
हणे ऋचं विद्यात्। नातमध्यमयोर्ग्रहणे प्रवो वाजा अभिद्यवो ग्निर्नेता त्वं सोम क्रतुभिरित्युदाहरणानि॥ सूक्तं सूक्तादौ
हीने पादे। अत्र पादशब्दो गायत्र्यादीनां भागवाची सूक्तादौ हीने पादे गृह्यमाणे सूक्तं विद्यात् तन्मन्नेव संस्तवं हि सूक्ते तव दि
त्याद्युदाहरणानि। अधिके त्वृचं सर्वत्र॥ अधिके पादे गृह्यमाणे त्वृचं विद्यात् सर्वत्र सूक्तादावसूक्तादौ चेत्यर्थः॥ अग्न आ
पिध्यायं प्राक् पत्रहोमस्य प्रायश्चित्तं पत्नीति न तदा मानय आर्द्रा भिति गन्ध यस्य होमं तहोमस दस संभाति होममंत्रस्य नैत्यर्थे होमनीयं
अन्यत्र प्रायश्चित्ते होमे नवर्ति प्रायश्चित्तानि तत्र ब्रह्मणः कर्तृत्वं प्रायश्चित्तानि तत्र जपमावात्। पत्नी प्रायश्चित्ते होमस्य नक्षत्रं
हृहमंत्रे संशयानां ब्रह्मसर्व प्रायश्चित्तं होमे नवतिः ५

Indira Gandhi National
Centre for the Arts

याहिंधीतयेगणानईक्षेन्योनमस्यत्तिरुद्रसाशुदाहरणानि। जपानुमंत्रणाप्यायनोपस्थानान्युपांशु सर्वत्रहोत्रापि सं
६ बध्यते। मध्यगतस्य विशेषाग्रहणात्प्रयोजनवत्त्वाच्च। अस्मिंछास्त्रे यानि जपादीनि तान्युपांशु प्रयोक्तव्यानि। मंत्राश्च
कर्मकरणाः। चशब्देनाचसर्वत्रेत्युपांश्विति चानुकृष्यते। मंत्राः कर्मणः करणाश्च सर्वत्रोपांशु प्रयोक्तव्याः। उपांशुत्वस्येदं
लक्षणं। करणवदशब्दममनः प्रयोग उपांश्विति। जपादीनां पर्यायलक्षणमुच्यते। जपमुच्चारणं विद्यात्क्रत्वर्थमपि त
द्भवेत्। अर्थतः कार्यलाभश्चेदर्थ एव कृतो भवेत्। मंत्रमुच्चारयन्नेव मंत्रार्थत्वेन संस्मरेत्। शेषिणं तन्मनाभूत्वारेतद स्था
नुमंत्रणं। एतदेवाभिमंत्रस्य लक्षणं चेक्षणाधिकं। अद्भिः संस्पर्शनाधिक्यं। तदेवाप्यायनं स्मृतं। उपस्थानं तदेवस्या
त्प्रणतिस्थानसंयुतं। यद्यपि कार्ययदेतेषु मंत्रकाले क्रियेत तत्। कर्मणः करणास्तेत्युर्विहितार्थप्रकाशनात्। मंत्रेण
कृत्वा मंत्रांते क्रियते कर्म येषु तु। इदं कार्यमनेनेति न क्वचिद्दृश्यते विधिः॥ लिंगादेवेदमर्थत्वं येषां ते मंत्रसंज्ञि ६
ताः। अनुमंत्रणग्रहणेनाभिमंत्रणमपि गृह्यते। अनुमंत्रणाप्यायनोपस्थानानां कर्मकरणत्वाविशेषेपि यस्ट
पष्टिश्चाप्यायनपरिगणनात् द्रेयबर्हिरित्यादयः

थ कृयहणं तन्मंत्रांते कर्मारंभ इति कर्मकरणधर्मो यः स तेषु न भवतीत्येवमर्थं। तेन मंत्रोच्चारणसमकालमे
वतेषु क्रिया भवति। प्रसंगादपवादो बलीयान्। सामान्यविधेर्विशेषविधिर्बलीयानित्यर्थः। लोके वेदे च प्रसि
द्धस्य न्यायस्य वचनप्रयोजनं सर्वे ऽपवादाः प्रसंगस्यैव बाधकाः। नापवादाः स्वावकाशत्वेपरस्परं बाधका इत्येव
मर्थम्। अतः स्वाद्युक्तिलीयासु आहवनीयोत्तरयोः प्रणवयोर्योर्मध्ये प्लुतिं गरीत्येतयोः प्रणवरूपप्लुति गरो न बाध
कौ भवतः। प्रपद्याभिक्रततरेणपादेन वेदिश्रोण्योत्तरया पार्ष्णीसमां निधाय पदे न बहिरं क्रम्यसंहितौ पाणी धा
रयन्त्राकाशवत्संगुलीहृदयसंमितावंकसंमितौ वा द्यावापृथिव्योः संधिमीक्षमाणः तिष्ठेदिति शेषः। तीर्थेन वि
हारं प्रपद्यतइत्युक्तं॥ तच्चैकेन पदविक्षेपेण बहिर्विहारादंतर्विहारप्रपदनं कर्तुमशक्यं। दक्षिणेनाग्नीनप्रपद्य वसि
ष्ठ एवं द्रष्टानि। प्रपद्येत्युच्यते आवेदिश्रोण्याप्य तत्प्रपदनं तस्य सर्वस्य विहितत्वसिध्यर्थं। अभिक्रततरेणेति द्व
पोवचनं अनेकपदविक्षेपसाध्यत्वादस्य प्रपदनस्य सर्वेषु च पदविक्षेपेषु दक्षिणस्याग्रतो हरणसिध्यर्थं॥

Indira Gandhi National
Centre for the Arts

वेदेरपरान्तयोः श्रोणिरितिसंज्ञा पूर्वान्तयोरंसइति। पादस्यापरोभागः पार्ष्णिः। पूर्वः प्रपदः। उत्तरस्याः श्रोण्या दक्षिण
७ स्य पादस्य पार्ष्णीसमानिधाय तस्यैव प्रपदेन वेद्यां स्तीर्णबर्हिरासनस्य बर्हिर्वेदिमध्ये निधायात्मनः सव्यदक्षिणौह
स्तौ पृथक्पृथक् विरलांगुलीयकौ कृत्वा पुनस्तथाभूतावेव तौ पाणी परस्परसंहितौ च कृत्वा तौ हृदयसंमि
तावंकसंमितौ वा धारयन् द्यावापृथिव्योः संधिमीक्षमाणः नोर्ध्वमधस्तिर्यग्वेक्षमाण ऊर्ध्वः प्राङ्मुखस्ति
ष्ठेत्॥ एतद्धोतुः स्थानं॥ अयं स्थानशब्दो भावसाधनो नाधिकरणसाधनः॥ एतच्छब्देन श्रोणिदेशेन हस्त
पादादियंत्रणेन च विशिष्टं यत्सर्वस्यैवोक्तं तदत्र स्थानशब्देनोच्यते इति प्रदर्श्यते। यत्र होतुः स्थानं चोद्यते
तत्रैतत्स्थानं भवतीत्यर्थः। होतृग्रहणमुत्तरसूत्रस्य सर्वार्थत्वाय। आसनं वा सर्वत्रैवंभूतः॥ अयं वा शब्दश्च
शब्दस्यार्थे वर्तते। स्थानं चासनं च सर्वत्र सर्वः कर्ता एवंभूतः कुर्यात् सर्वोक्तहस्तपादादियंत्रणविशिष्टेन ७
श्रोणिदेशादिविशिष्ट इत्यर्थः। श्रोण्यादिषु सर्वेषु प्राप्तेषु श्रोणिदेशावर्जनेन कर्तृशरीरविशेषणान्नामेव प्रा

पणार्थमेवंभूतवचनं। वचनादन्यत्। उक्तस्यान्यथाभावो यावन्मात्रस्य वचनं तावन्मात्रस्यैव न तत्संबंधि
नोन्यस्यापीति तेन होमादौ क्रियमाणे दक्षिणस्य पाणेरपायेपि सव्यो हृदयान्नापैतीति सिद्धं। प्रेषितो जपति॥९॥
अत्रान्यार्थस्य प्रैषस्याभावात् सामिधेन्यर्थं प्रेषितो होता॥१०॥ नमः प्रवक्त्रे नम उपद्रष्ट्रे नमोनुख्यात्रे क इद
मनुवक्ष्यतीति स इदमनुवक्ष्यति षण्मोर्वीरंहसस्पांतु द्यौश्च पृथिवी चाहश्च रात्रिश्चापश्चौषधयश्च वाकृसमरिष्ट
तयहः साधु छंदांसि प्रपद्येहमेव मामममुमिति स्वं नामादिशेत् भूते भविष्यति जाते जनिष्यमाण आभजाम्य
पाश्चेवा वो अशांतिं विहेस्यं गुल्यग्राण्यवरूप्यजातवेदो रमयापशून्मयीति प्रतिसंदधाद्धर्म मे द्यावापृथिवीव
र्माग्निर्वर्म सूर्यो वर्म मे संतु तिरश्चिकाः॥ तदश्रवा वः प्रथमं मसीयेति। नमः प्रवक्त्र इत्यादि होता जपेद्धर्मितं
तं जपेत्। सामिधेन्यर्थं प्रैषोत्तरकालवर्तित्वादयं जपः सामिधेन्यर्थो भवति। अत्रामुमिति शब्दस्थाने द्वि
तीयया विभक्त्या स्वमात्मनो नाम निर्दिशेत्। स्वग्रहणात्प्रतिनिधित्वेन प्रवृत्तस्यापि जपकर्तुरेव नाम निर्दिष्टं नहि

Indira Gandhi National
Centre for the Arts

तुरितिलभ्यते अङ्गानि विहितानि जपे करे मनुद्वारयन्नेतु स्याङ्गाण्यपकर्षेत्। मयीति वोद्धारयन् प्रतिसंदध्यात् तेनाप
८ कर्षसंधाने जपांगं तत्कुर्वतो विधानात्॥ समाप्य सामिधेनीरन्वाह। समाप्य स्वनेन नमः प्रवऋद्इत्यादेर्मित्रं जुष
ध्वमित्यंतस्यैक जपत्वं दर्शयति तेनांतराय त्वार्यद्वयमपकर्षणं संधानं च तज्जपकर्तुः संस्कार एव भवति न
कार्यांतरं। अतः पित्र्यायां जपलोपेन कर्तव्यं भवति। अग्नेः समिंधानार्था ऋचः सामिधेन्यः॥ ता अन्वाह अनु
ब्रूयादित्यर्थः॥ हुं इति हिं कृत्सभर्भुवः स्वरोमिति जपति। हिंकारस्य नानारूपत्वादिष्टपरिग्रहार्थः पाठः॥ एषोभि
हिंकारः॥ जपसहितस्य हिंकारस्याभिहिंकार इति संज्ञा विधीयते। भूर्भुवः स्वरित्येव जपित्वा कौत्सो हिंक
रोति। एवं स्वव धारणान्तकेवलं अनुऋममात्रं प्रणवरहितत्वं चेति दर्शयति। आचार्यग्रहणं विकल्पार्थं। न च प ८
र्वं जपं जपति। कौत्स इति शेषः पूर्वमिति॰ नमः प्रवऋद्इत्यादि जुषध्वमित्यंतमित्यर्थः॥ अथ सामिधेन्यः प्र
वो वाजा अभिद्यवो अग्न आयाहि वीतये गृणानः ईळेन्यो नमस्यस्तिरोग्निं दूतं वृणीमहे समिध्यमानो अध्वरे सामि

द्धो अग्न आहुतेति द्वे॥ अथ त्र्यृचामेव सामिधेनीत्वं दर्शयति। एवं सामिधेनीग्रहणं सामिधेन्याद्यंगानां मध्ये
भिहिंकारः सामिधेन्यादीनामासन्नतरमंगमिति दर्शयति। तेन वैश्वदेव शस्त्रे दिग्ध्यानो त्तरकालमभिहिंकारः
कर्तव्य इति गम्यते। ता एकश्रुति संततमनुब्रूयात्॥ या एता उक्ता ऋचस्ता एव मनुब्रूयादित्यर्थः॥ उदात्तानुदात्त
स्वरितानां परः संनिकर्ष ऐकश्रुत्यं। ऐकश्रुत्यलक्षणमुच्यते॥ उदात्तानुदात्तस्वरितानामभिव्यंजकायेप्रय
त्ना आयामविस्रंभाक्षेपास्तेषामन्यतमस्यैकस्यैवासंततसंनिकर्षेणासजातीयप्रयत्नाव्यवधानेनपदुच्चारणं
तदैकश्रुत्यमित्यर्थः॥ स्वरादिमंतमोकारं त्रिमात्रं मकारांतं कृत्वोत्तरस्या अर्धर्चे वस्येत्संतते। इदं संततल
क्षणं। स्वरादमंतपदयोरिप्रदेशोपलक्षणार्थत्वादृगंतो यः स्वरादिः स्वर एव वा केवलस्तमोंकारं त्रिमात्रं कृत्वाते
न प्रणवेनोत्तरामृचं संधाय तस्या अर्धर्चे वस्येत्। मकारांतं त्रिमात्रमिति सुऋमेण यो जनासमुदायस्य त्रिमात्र
तायाः इष्टत्वात्। अत एवं भवति। ओकारोर्धतृतीयमात्रः मकारोर्धमात्र इति त्रिमात्रत्वं प्रणवस्य। उत्तरव

Indira Gandhi National
Centre for the Arts

नमावृत्तिनो नावृत्तिमभ्यो भवथाग्नयते। यत्प्रणवेनो त्तरसंधानमार्चं विधीयते तत्संतत मिष्युच्यते। एतदवसानं।
२ सामिधेनीष्वनस्यानामर्धचमर्ध्चावसानस्य पूर्वस्त्रैघो वसि त्वादिदनवसानविधानमाद्याभ्यां विप्रणवार्थं
अन्यत्र च जपादिष्वपीति। उत्तरादानमविप्रमोहे। आदानमारंभः विप्रमोहो विश्लेषः पूर्वस्योच्छ्वासस्याविप्रमोहे
ग्र एवोत्तरमुच्छ्वासमारभेतेत्यर्थः॥ विप्रमोहे पूर्वमेवसम्यग्पुनः पुनरुच्चार्यादित्यर्थः॥ अस्मिन्नेव सूत्रे मेव प्राप्त्यन्वि
तं नान्यदिति सूत्रस्य प्रयोजनं। समासे प्रणवेनावसानं। अर्थप्राप्तस्य विधानं विहितत्वादयमर्थो नार्थप्राप्त इत्येव
मर्थं। चतुर्मात्रोवसाने यदवसानं विहितमेव नार्थप्राप्तं तस्मिन्नवसाने चतुर्मात्रः प्रणवो न त्रिमात्रः। तस्यांता
पत्तिः। तस्य प्रणवस्य यो तो मकारस्तस्य वर्णांतरापत्तिर्वक्ष्यत इत्यर्थः। स्पर्शेषु स्ववर्ग्यमुत्तमं। स्पर्शेषु परेषु यः ९
स्पर्शो मकारात्परः। तस्य स्ववर्ग्यमुत्तममापद्यते मकारः। समिध्यमानो तमर्जयेत्यादि निदर्शनं। अंतस्थासु तां
तामनुनासिकां। रेफस्यानुनासिकत्वासंभवाद्य वलाएवात्रांतस्यायन्नुते। तासु साम्यापरांतः स्थास्तां तामनुना

सिकां मकार आपद्यते तत्र सानुनासिका पूर्वा उत्तरा शुद्धा एवमत्र संयोगः॥ विदथानि प्रचोदयंवाजी वाजेष्विति
निदर्शनं॥ रेफोष्मस्वनुस्वारं। एतेषु मकारोनुस्वारमापद्यते। अनुस्वारो नाम नासिकास्थानोस्पृष्टकरणश्च। अस्य यज्ञ
स्य सुक्रतो समिध्यमानो अध्वर इत्यादि। त्रिः प्रथमोत्तमे अन्वाहाध्यर्धकारं। अध्यर्धकारमध्यपकृत्वेत्यर्थः। प्रथमो
त्तमे ऋचौ त्रिरध्यर्धकारं ब्रूयात्। अध्यर्धनुक्तावस्येदथद्वे। प्रथमामामेव मध्यर्धकारं भवति पूर्वामध्यर्धमुक्त्वा व
सायत तो द्वे ऋचौ ब्रूयात् द्वे इति वचनमर्धर्चचतुष्काभिप्रायं पूर्वस्मिन्नुच्छ्वासे प्रथमायामावृत्तौ द्वावर्धर्चौ द्वितीया
यामेकमृच्चे ति त्रयोर्धर्चा उक्ता अस्मिंस्तूच्छ्वासे द्वितीयतृतीययोरावृत्तो स्त्रयोर्धर्चा उत्तरस्यामृचा एकोर्धर्च इत्येवं
चत्वारोर्धर्चा वक्तव्या भवेयुः अध्यर्धकारविधेः उत्तरयासंधानाविरोधादिति। अथ शद्योस्य सत्त्रस्यान्यार्थत्वप्र
तिभासनिवृत्त्यर्थः। द्वे प्रथममुत्तमस्यामथाध्यर्धं। पूर्वेण संधानाविरोधादुत्तमायामेव भवति। अथ शद्बश्च प्र
वंवत्॥ ताः पंचदशाभ्यस्ताभिः। एकादशानामृचां द्वयोस्त्रिरभ्यासे कृते ता अभ्यस्ताभिः सह पंचदशैव भवंती

आश्वल०॥

त्यर्थः॥ प्राप्त एवायमर्थः। अस्य वचनस्येदं प्रयोजनं सर्वत्राप्यस्माभिः सह विहितसंख्यापूरणं कर्तव्यमिति। ए
१० तेन शस्त्रयाज्यानिगदानुवचनानि इष्टवचनसंस्तवनानि। शंसत्वादिशब्दचोदितानि शस्त्रादीनि भवंति। एतेनेति
सामिधेन्यनुवचनमुच्यते। शस्त्रादीनि च तत्र तत्र विहितानि तेषां धर्मापेक्षास्ति तत्रैतेन तानीत्युक्ते एतद्धर्मका
णि तानीति गम्यते अनेन प्र[illegible]रेण तेषां सामिधेनीधर्मातिदेश उक्तो भवति। सर्वधर्मप्राप्तौ कतिपयधर्मनिषेधा
र्थमाह। न त्वन्यत्राध्वर्युईकारं न जपः प्रागभिहिंकारात् नाभिहिंकाराभ्यासौ बहुष्वपकृष्टा। अन्यत्रेत्येताव
दनुवर्तते तस्य सामिधेनीभ्योन्यत्रेत्ययमर्थः। अतः शिष्टायामभिहिंकारः सिद्धो भवति। अभ्यासनिवृत्त्यर्थं तत्रै
वतावग्रहणं करिष्यति। तेनाभ्यासो न भवति। प्रकृत्यैतिशब्दोभ्यामेन बहुषु पिपुरीष्यासो अग्नयइत्येवमादिषु
तयोरभावं दर्शयति॥ नावच्छेदादौ। अवच्छेदो नाम यत्र शस्त्रादिषु मध्ये समाप्यावस्यंतीति एवमादिभिः शब्दैरव १०
साने विहितं समाप्य प्रणवेनेत्येवमादिषु सोवच्छेदस्तत्रापि तो न स्तः। शस्त्रेष्वेव होत्रकाणामभिहिंकारः। अस्मिं

छंदस्येव मुख्यवर्जिता द्वादशर्त्विजो होत्रकाइत्युच्यंते। न समस्तव्याप्यो वा। तेन न्याय्यवस्तुतोभिहिंकारनिषेधः सिद्धो भवति।
सामिधेनीनामुत्तमेन प्रणवेनाग्ने महाँ असि ब्राह्मण भारतेति निगदेऽवसाय॥२॥ यजमानस्यार्षेयान्प्रवृणीते
यावंतः स्युः। प्रणवेन निगदं संधाय निगदे वस्येदित्यर्थः। तत्रावसायार्षेयान्प्रवृणीते यावंतो यजमानस्य तेभ्यं
ति तेच प्रवराम्नाये व्याख्याताः। परं परं प्रथमं। अस्यैम आर्षेया इत्यंतः अयं परः अयमपर इत्येवमादि स्मृत्यनुसा
रेण प्रवराम्नाय एव वरणप्रकारः पठितः स एव इदानीमियंतो वरीतव्या इत्थं वरीतव्या इति विधानमन्यक्षेत्रजातप्रा
मुख्यायणार्थं। पौरोहित्यान् राजविशां। पुरोहितस्य ये आर्षेयास्तानेव राजन्यवैश्ययोः प्रवृणीते। बहुवचनं त्रैवर्णि
कस्त्रीजातानामनुलोमानां संग्रहार्थं। राजर्षीन्वा राज्ञां। मानवैलपौरूरवसेत्येवं वा पौरोहित्यान्वा। सर्वेषां मानवेति
संशये। अज्ञाने संशये च त्रयाणां वर्णानां मानवेत्ययं शब्दः प्रवरो भवेत्। देवेद्धो मन्विद्ध ऋषिष्टुतो विप्रानुमदितः क
विशस्तो ब्रह्मसंशितो घृताहवनः प्रणीर्यज्ञानां रथीरध्वराणामतूर्तो होता तूर्णिर्हव्यवाडिति एवमावसायात्रं जु

Indira Gandhi National
Centre for the Arts

दूर्देवानां च मसोदेवपानोरां इवाग्नेनग्निर्देवां स्त्वं परिभरस्यावह देवान्यजमानायेति प्रतिपद्यदेवताद्वितीयया विभक्त्यादे
११ शमादेऽग्नावहेत्यावाहयत्यादिंक्लृवयनात्। निगद्देवसायेतिनिगद इति सप्तमीनिर्देशात् एवां परीभक्तो निगदो नपरि
समाप्त इति गम्यते। इतः प्रवरोपितस्यैवशेषः। क्वचिन्मंत्राम्नायेभारतशब्दानंतरमसावसाविति प्रवर प्रकृतेः प
ठितत्वाच्च संबुद्धिसामानाधिकरण्याच्च। देवेद्ध इति निविस्पदनिगदश्चतुर्दशनिवित्पदानि। परिभरसि इत्येवमंता
नि। आवह देवान्यजमानायेत्यादिसु यजायजेत्यंत आवाहननिगदः। सामिधेन्यादय एते मंत्राः आहवनीयाभि
धायिनः। तत्र भारतेत्यवस्येत्। प्रवरांते च। निविस्पदानामेकादशेन। चतुर्दशेनावाहननिगदं संधाय यजमानाये
त्यवस्येत्। प्रतिपद्यावसायेत्यध्याहारात्। प्रतिपद्येति वचनमस्य वाक्यस्य प्रतिपत्तिसंज्ञाकरणार्थं। तेनपि त्र्यायां ११
प्रतिपत्स्यंतरविधान एतन्न भवति। तत्र स्थितादेवतावक्ष्यमाणाद्वितीयया विभक्त्यादिश्यादिश्यानंतरमावहेत्यावा
हयति। आवह शब्दस्यादिंक्लृवयनद्वितीयाविधानं सर्वार्थं। अत्र पाठादेव द्वितीयासिद्धेति। तेन देवतामादिश्य प्रणु

या यजेत्येत्यत्र द्वितीयैव भवति। विभक्त्यंतरविधाने तु तदेव भवति। आवह देवान्होत्राया वहावह जातवेद इ
त्येतेषु त्रिषु प्लुतावसानेन स्तः। अग्न आवहेति तु प्रथमदेवता। प्रथमदेवतायामेयं विशेषः। तुशब्देनयष्टव्यदेव
तावहशब्द योर्मध्येग्नेशब्दं ब्रूयात्। अग्निं सोममिसाज्यभागौ। याग योरियमाख्यात संबंधाद्देवतयोरधी
ति। अग्निमग्नीषोमाविति पौर्णमास्यां। विशेषाभावात्सोमयाजिनोऽसोमयाजिनश्च प्रधानदेवते एते। अग्नी
षोमयोस्थाने इंद्राग्नी अमावास्यायामसन्नयतः। पौर्णमास्याः प्रथमाम्नानात्सैव प्रथमं प्रयोज्या। स्थानग्रहणं
पौर्णमास्या धर्माणां प्रथमसंबंधं दर्शयति। प्राप्तावदित्वेषेपि प्रयोगावस्थायां विशेषग्रहणादिति। तेनेदं बोधितं
भवति। असमाम्नातानामसति चोदनालिंगविशेषे पौर्णमासमेव तंत्रमिति। दधिपयोभ्यां यागं कुर्वतस्तन्न मन्नि
त्युच्यते। यो न संनयति। तस्येंद्राग्नी द्वितीया। इंद्रं महेंद्रं वा संनयतः। संनयतोऽमावास्यायामिंद्रं महेंद्रं वाग्नी
षोमस्थाने आवाहयेत्। अंतरेण हविषी विष्णुमुपांश्वंतरेयिणः। ऐतरेयिणः शाखाविशेषास्त एवमुपांशुया ध्यायिन

Indira Gandhi National
Centre for the Arts

ग

गउभयोरपि पर्वणोरंतरेण हविषी इच्छंति। अग्नीषोमीयं पौर्णमास्यां वैमृधममावास्यायामेके-नेकेकंचन। उभयो
रपि पर्वणोः कंचनोपांशुयाजमेकेनेच्छंति। अन्येषामप्युपांश्वन्नामावहरवाहायाद्भियाधामानी दृष्टविर्महोज्या
१२ यइत्युच्चैः। अन्येषामपीतिपित्र्यादीनामंगोपांशुत्वसंग्रहार्थं। आवाहनादिषु चतुर्षु निगदेषु यान्युपांशुयज
संबंधीनिषट्पदान्यावहादीनितेषामुच्चैरितिसंज्ञामात्रं विधीयते। तत्रस्वराण्युपांशोरुच्चानीत्यनेनसर्वेषामु
च्चसंज्ञानां तत्रस्वरोविधीयते। येन्येतद्वचनाः परोक्षास्तानुपांशुरुच्चैर्वा। येन्यइतिसर्वनाम्नः सन्निहितविषयत्वा
त्तेष्वेवनिगदेष्विति गम्यते। तद्वचनाउपांशुयाजवचनाः परोक्षास्तेयेषांपदांतरसन्निधानादेव विशेषनिष्ठता
वसीयते। नस्वतः। अजुषतादयः क्रियावचनाइत्यर्थः। तेषामुपांशुत्वं प्राप्तमनद्यतेउच्चैः संज्ञाविकल्पेन १२
विधीयते। प्रत्यक्षमुपांशु। यागंप्रतिचोदितंदेवतानामधेयंप्रत्यक्षमित्युच्यते। तस्य प्राप्तमुपांशुत्वं नियमार्थं
विधीयते तस्यैवोपांशुत्वंभवेत्। उपांशुदेवतायाः प्राथम्येपिप्रथमदेवतायाः संबंधियोग्निशब्द आवाह

नस्विष्टकृन्निगदयोर्नतस्यापीति। अत्रकिंचिदुच्यते। उपांशुयष्टव्यमितिवचनादुपांशुत्वंयागधर्मस्तयावगम्य
मानंतत्रासंभवादानर्थक्यात्तदंगन्यायेनतत्संबंधिनः शब्दान्परिगृह्णातिष्ठति। तत्रावहादीनामागुरादीनांच
होतायक्षदित्यस्यचोपांशुत्वंनिवर्त्यतंत्रस्वरोनुज्ञातः परोक्षाणामजुषतादीनांविकल्पेनतंत्रस्वरउक्तः प्रत्यक्षस्य
निहृत्यादेरग्न्यादीनांचोपांशुत्वनियमादन्यस्य सर्वस्यतंत्रस्वरेप्राप्तेयाज्यानुवाक्ययोरागुरादिभिः प्राणसंतानवि
धानादुपांशुत्वमेवेतिस्थितं। प्रतिचोदनमावाहनं। चोदनांचोदनांप्रतिप्रतिचोदनं। चोदनादेवताचोदना। याव
त्योदेवताः चोदितास्तावंत्यावाहनानिभिन्नानीत्यर्थः। प्रत्यावाहनमुच्छ्वासनिःश्वासप्रसिध्यर्थंभेदसंधानं। स
र्वाआदिश्यसकृदेकप्रदानाः। यत्रबहुभिर्हविर्भिरेकयायाज्ययाबह्वीभ्योदेवताभ्योयुगपद्यागाः क्रियंतेतएे
कप्रदानायागाः। तत्संबंधाद्देवताअप्येकप्रदानाइत्युच्यंते। सर्वाइतिवचनंसर्वासांपृथगादेशार्थंआदिश्यवच
नंसर्वाआदिश्यांतेआवहशब्दप्रयोगार्थंसकृद्वचनमंतेविसकृदेववक्तव्योनमावदेवतमित्येवमर्थं। तथोत्तरे

Indira Gandhi National
Centre for the Arts

पुनिगमेष्वेकामिव संस्तुयात्। एकामिवेतिवचनं यथैकस्या देवतायाः पुरस्तात्स्वाहायाट् शब्दौ अनुवत्नादयश्चैक
१३ वचनेन नथैतास्त्वपीति। समानां देवतां समानार्थां निगमेष्वेकामिव संस्तुयादित्यत्रापि संबध्यते विहोषात्रह ण
त्। प्रयोजनवत्त्वात् संप्रदायाच्च। समानामित्येक शब्दमित्यर्थः। समानार्थामित्येक प्रयोजनार्थामित्यर्थः। अ
व्यवहितां सकृन्निगमेषु। अव्यवहितां अन्यया देवतया निगमेषु सकृद्ब्रूयात्॥ एकवचनेनैव। ओल्का स्वा
यापि कृास्तुदेवां आज्यपाँ आवहाग्निं होत्राया वहस्वं महिमानमावहावह जातवेदः सुयजा यजेस्या वाह्यं यथास्थि
तमूर्ध्वजानुरुपविश्योदङ्वेद्युत्तरणामिभूमौ प्रादेशं कुर्यात्॥ अदितिर्मातास्यां तरिक्षान्मा छेत्सीरिदमहम
ग्निना देवेन देवतया त्रिवृता स्तोमेन रथं तरेण साम्ना गायत्रेण छंदसाग्निष्टोमेन यज्ञेन वषट्कारेण वज्रेण योस्मां
द्वेष्टि यं च वयं द्विष्मस्तं हन्मीति। आवाषिका आवाषोढरयोग्याः प्रधानदेवता इत्यर्थः। तासु कृतावाहनासु देवाना १२
ज्यपानावाहयेत्। स्विष्टकृतं च। पाठोनुनासिकत्वलाभायन कारलोपायच। होत्रायावहस्व सूयोः स्विष्टकृदावा

हनप्रयोगायच। किंच। पठितावाहनानां पाठादेवोत्तरेष्वपि निगमेषु निगमनसिद्धिर्लक्ष्यत इत्येवमर्थं।
आज्यपाः प्रयाजानुयाजदेवताः अग्निं होत्राया वहस्वं महिमानमावहेत्येतावत्स्विष्टकृदावाहनार्थं। आवह
जातवेदः सुयजा यज इत्यंतो निगदशेषः। आवाह्य वचनं सुयजा यज इत्यंतस्य आवाहननिगदत्वाय। सा
मिधेन्यर्थं यथास्थितस्तथोर्ध्वजानुरुपविश्य उदङ्मुख्यो वेद्यां स्तीर्णानि तृणानि वेदिं ध्वंभूमौ प्रादेशं कुर्यादद
ति मातेति मंत्रेण॥ आभ्यावयिष्यंतमनुमंत्रयेत। आश्रावय यत्तं देवेषा आश्रावयमा मनुष्येषु कीर्तयिषशसे ब्रह्मवर्च
साचेति। प्रवृणानं देवसवितरेतं त्वावृणतेग्निं होत्राय सह पित्रा वैश्वानरेण द्यावापृथिवी मां पातामग्निर्होता ह
मानुष इति। मानुष इत्यध्वर्योश्रुत्वा दायुषास्त्वा मुखोदोष धीनां रसेनोत्सर्जन्यस्य धामभिरुदस्थाममृतां अनु
सुनिष्ठेत। अध्वर्युग्रहणमुत्तरार्थं। षष्टिश्चाध्वर्यो नवतिश्च पाशा अग्निं होतारमेतराविवृत्नाः। सिनंतिपाक
मतिधीरएतीधीरएतीसुस्थाय॥ ब्रूयादिति शेषः। नायमुत्थानमंत्रः। पूर्वेणैव निरंतरत्वात्। अत इदं त्रोमं

नोमंत्रसंज्ञकः॥ ऋतस्य पंथामन्वेमिहोतेत्यभिक्रम्यासेध्वर्युमन्वारभेत पार्श्वस्थेन पाणिना॥ अत्राध्वर्युग्रहणेन
१४ प्रयोजनमभिक्रमणान्वारंभणेऽध्वर्योरेवाध्वर्युमेव कुर्यात्। न प्रतिप्रस्थातारमित्येतत्। जत्रुवाक्रोः संधिरस
स्तस्मिं देशे ध्वर्युमन्वारभेत पार्श्वस्थेन पाणिना पार्श्वे न तिष्ठतीति पार्श्वस्थः कनिष्ठिका प्रदेशेन स्थितः॥ नन्वक्र
तो नान इत्यर्थः॥ तेनान्वारभेताध्वर्युं। आग्नीध्रमेकदेशेन सव्येन वा। सव्येन पाणिना पार्श्वस्थेनांसएवांकेन
ऊरुणा वा। इंद्रमन्वारभामहे होतृचूर्ये पुरोहितं। येनाय नु त्तमंस्वर्देवा अंगिरसो दिवमिति। उभयोः साधार
णो मंत्रः॥ अतो नावर्तते नोप्यते चासंमार्गतृणैस्त्रिरभ्यात्मं मुखं संमृजीत संमार्गोसि सं मां प्रजया पशुभिर्मृ
ड्ढीति। इध्मसन्नहनानि संमार्गशब्देनोच्यंते। अग्निसंमार्जनसाधनत्वात्तेषां। तैस्तृणैरभ्यात्मं मुखं संमृजीत। तृ
णैरितिवचनात्तृणभूतैरेवतैः संमृजीत न ग्रंथिभूतैः पात्राभूतैर्वेतिगम्यते। अभ्यात्ममात्माभिमुखं पाणितच्छ १४
मवागपवर्गं च संमार्जनमिति। सकृन्मंत्रेण द्विस्तूष्णीं सर्वत्रैवं कर्मावृत्तौ। सकृन्मंत्रेण द्विस्तूष्णीमित्येतत्सर्वत्र भ

वत्येवं प्रकारस्य कर्मण आवृत्तौ सत्यामिति। एवं प्रकारशब्देन संस्कारकर्मत्वमुच्यते। एतदुक्तं भवति। यत्र सं
स्कारकर्मणस्त्रिरावृत्तिर्विधीयते तत्र सकृन्मंत्रेण द्विस्तूष्णीमिति। न प्रधानकर्मणि। स्पृष्ट्वोदकं होतृषदनमभि
मंत्रयेतेदं दैधिषव्योद् तत्तिष्ठान्यस्य सदने सीदयोस्मत्पाकतर इति। होतृषदनं अपरेणोत्कराग्नेः प्राङ्मुखो भि
मंत्रयेत। इदमुदकोपस्पर्शनं पूर्वांगं अग्निसंमार्जनतृणैरात्मनो मुखसंमार्जनात्। आत्मनो यदंगोस्यं तच्छौत्य
र्थस्तेनास्य दृशार्थत्वं भवति। अंगुष्ठोपकनिष्ठिकाभ्यां होतृषदनात्तृणं प्रत्यग्दक्षिणा निरस्येन्निरस्तः परावसु
रितीदमहमर्वावसोः सदने सीदामीत्युपविशेद्दक्षिणोत्तरिणी पस्थेन। दक्षिणं च नद्युत्तरं च दक्षिणोत्तरं। तदनु
पस्थो दक्षिणोत्तरी तेनोपविशेत्। एतेनिरसनोपवेशने सर्वासनेषु सर्वेष्वामहरहः प्रथमोपवेशनेपि समा
ने। एते इति प्रकारमंत्रविशिष्टयोर्ग्रहणार्थं। ते च सर्वेषां सर्वासनेषु प्रथमोपवेशने भवतः॥ न द्वितीयादि प्र
योग इत्येकोर्थः॥ समाने प्यासने अहर्गणेष्वहरहः प्रथमोपवेशने भवतः॥ अयमपरोर्थः॥ समानेपि स्था

Indira Gandhi National
Centre for the Arts

नेप्रयोगाद्‌त्तौपुनः पुनरावर्त्येते॥ प्रवर्ग्योदिष्वयंचापरो पिशब्दाल्लभ्यते। अस्यविधेर्दर्शपूर्णमासप्रकरणेप
ठितत्वान्न दतिदिष्टेष्वेवेष्टिपशुसोमेषुभवतोनाग्निहोत्रादिष्विति। अंकधारणंभवत्येव। द्विरितिगौतमः॥ अ
१५ स्याचार्यस्यद्विःद्वितीयेपिप्रयोगेभवतीत्यभिप्रायः॥३॥ ब्रह्मौदनेप्राश्यमाणेग्न्याधेयेब्रह्मणोद्विरित्यनु
वर्ततेक्रियमाणस्यकर्मणः दक्षिणतउपविष्टः सन्पुनःप्राश्नानकाले द्वितीयेनिरसनोपवेशने कुर्यात्। अग्न्या
धेयेब्रह्मौदने द्वितीयविधानसामर्थ्यादेवइष्टिपशुसोमेष्वन्यत्रापिब्रह्मणोनिरसनोपवेशनप्राप्तिरितिग
म्यते। अग्न्याधेयग्रहणमश्वमेधेयब्रह्मौदनंतत्रनैवकर्तव्यमिति। बहिष्पवमानात्प्रसर्पत्सुसोमे। आहव
नीयस्यदक्षिणतउपविष्टः सन्बहिष्पवमानंगत्वाततः प्रसर्पत्सुपूर्वासनेपुनःकुर्यात्। सोमग्रहणंसर्वेषु १५
सोमेषुप्रापणार्थं इतरथाधानाधिकारात्तत्संबंधएवसोमेस्यान्नसर्वसोमेष्विति। प्रसर्प्यहोता। पश्वर्थमु
पविष्टएवासनेसदः प्रसर्पणंकृत्वातत्रैवपुनःकुर्यात्। होतृग्रहणंब्रह्माधिकारनिवृत्यर्थं। स्रुगादापने प

शे। स्वात्तकृत्यर्थेस्रुगादापनेपुनःकुर्यात्। नपत्नीसंयाजिके। पत्नीसंयाजार्थउपवेशनेनैवकुर्यात्। ना
न्यत्रहोतुरितिकौत्सः। होतुरन्येषामेतेनभवत इतिकौत्सोमन्यते। उपविश्यदेवबर्हिः स्वासस्थंत्वाध्यासद
यमिति। उपविश्यानंतरंब्रूयादित्यर्थः। अभिहिंकृत्य ततः प्रतरांबर्हिषद्भवेतिजानुशिरसाबर्हिरुपस्पृश्यातऊर्ध्वं
जपेत्। जानुशिरः जान्वग्रं अतऊर्ध्वग्रहणमुपस्पर्शतोनजपः स्यादिति। तेनान्यत्रैवंरूपेशब्दे सतिकुर्वन्नेवकु
र्यात् इतिगम्यते। अरणीसंस्पृश्यमंथयेदित्यादिषु। भूपतयेनमोभुवनपतयेनमोभूतानांपतयेनमोभूतस्येन
मः प्राणंप्रपद्येपानंप्रपद्येव्यानंप्रपद्येवाचंप्रपद्येचक्षुः प्रपद्येश्रोत्रंप्रपद्येमनः प्रपद्यआत्मानंप्रपद्येगायत्रीं
प्रपद्येत्रिष्टुभंप्रपद्येजगतींप्रपद्येनुष्टुभंप्रपद्येछंदांसिप्रपद्येसर्वोनोदिवस्पातुनमोमहद्भ्योनमोअर्भके
भ्योविश्वेदेवाः शास्तनमायथेहाराधिहोतानिषत्तायजीयांस्तदयवाचः प्रथमंमसीयेतिसमाप्यप्रदीप्तइ
ध्मेस्रुवावादापयेन्निगदेन। समाप्यप्रदीप्तेइध्मेउभयस्यस्रुगादापनावसरप्रदर्शनार्थंत्वाज्जपसमाप्तिरपि

१८ प्रदीप्त एवेति गम्यते। अनेन निगदेन आदापयेदध्वर्युः। अग्निर्होता वेत्त्वग्नेर्होत्रं वेत्तु प्रावित्रं साधु ते यजमान दे
वता यो अग्निं होतारमवृथा इति जपेत्। अवसायेति वचनं निगदमध्ये उच्चैस्त्वलाभार्थं। जपेदिति नि
गदमध्ये उपांशुत्वलाभार्थं। अथ समापयेद्धृतवती मध्वर्यो स्रुचमास्यस्व देवयुर्विश्ववारेडामहै देवाँ ई
ळेन्यान्नमस्यामनमस्यान्यजाम यज्ञियानिति। अथेति वचनमत्राप्युच्चैस्त्वलाभार्थं। समाप्तिवचनमग्निर्होतेत्या
देर्यज्ञियानित्यंतस्य एकनिगदत्वख्यापनार्थं। समाप्तेस्मिन्निगदे ध्वर्युराश्रावयति। अध्वर्युकर्मविधानं प्रत्याश्रा
वणस्येदं निमित्तमिति ज्ञापनार्थं समाप्तिवचनमाश्रावणे कृतेपि समाप्त एव निगदे प्रत्याश्रावणं कुर्यात्। इत्येवम
र्थं। प्रत्याश्रावयेदाग्नीध्रः उत्करदेशे तिष्ठन् स्फ्यमिध्मसन्नहनानीलादाय दक्षिणामुख इति शाट्यायनकमस्तु ३६
श्रौषडिति सो कारं प्लावयन्। शाट्यायनग्रहणं विकल्पार्थं। अतः प्राङ्मुखत्वमपि लभ्यते। प्लावयन् प्लुतं कुर्व
न्नित्यर्थः॥४॥ प्रयाजेभ्यश्चरंति। वक्ष्यमाणरूपलक्षणा यागाः प्रयाजा इत्युच्यंते। तेभ्यश्चरंति यजंतीत्यर्थः। पंचैते भ

वंति। पंचवचनेन नराशंसः तनूनपाद्वा मुष्यायणस्यापि पंचैव भवंति।०। न षडित्येवमर्थं। एत इति वचनं
अतः पठिता एवैते तनूनपान्नराशंसयोरन्यतरेण सह पंच भवंति। नापठितेन सहेत्येवमर्थं। एकैकं प्रेषि
तो यजति। न सकृत्प्रेषितः सर्वान्यजति। आग्नेयाज्यादिरनुयाजवर्जं। सर्वत्रस्वीयमनुयाजवर्जितानां याज्याना
मादावागूर्भवति। को यमागूरित्याह। ये यजामह इत्यागूः। वषट्कारोंत्यः सर्वत्र। अनुयाजानामपीति सर्वत्र
वचनं। उच्चैस्तरां बलीयान्याज्यायाः। अत्रोच्चैस्तरत्वमेकयमातिशयमात्रं। बलीयस्त्वं व्यक्ततरोच्चारणमेतदु
भयं याज्याया एव। तयोरादी प्लावयेत्॥ तयोरागूर्वषट्कारयोराद्योः प्लुतिः कार्या। याज्यांते च। प्लावयेदिति शे
षः। द्विविध्यसंध्यक्षराणामकारं न चेद्वेवं नो व्यंजनांतो वा। न चेत्प्रगृह्य इति पठितव्ये न चेद्वेवचन इति प्र
मादपाठः॥ ऋगंते यानि अप्रगृह्याणि संध्यक्षराणि तानि द्विविध्याकारमेव प्लावयेदिति एकारैकारयोः
आइ इति। ओकारौकारयोः आउ। इत्येवं द्विविध्य प्लुतिः कार्या। ज्येष्ठश्च मे मो विश्वचर्षणा ३ इवो षडि

Indira Gandhi National
Centre for the Arts

स्यादिदृष्टांतः इंदुसमस्यन्नीतयेसमस्माइवौइतिनिदर्शनं। एकारस्यप्रगृह्यस्यस्वरूपेणैवप्लुतिः कार्या।
९७ अधिश्रियंशुक्रपिशंदधानेश्वौ३ इत्यादिदृष्टांतः। ओकारस्यप्रगृह्यसंज्ञा मा अनित्यत्वान्नित्यानित्यसंयो
२ गविरोधात्तस्यसर्वदापिविश्लेषप्लावनंकर्त्तव्यं। कविःकविमियक्षसिश्रयज्याउवौइत्यादिनिदर्शनंतथैवओ
कारस्यापिसहस्वस्थणंविम्लथःसहद्यउवौइति। व्यंजनांतानांसंध्यक्षराणांसर्वदास्वरूपेणैवप्लुतिः कार्या। न
विवेकः कर्तव्यः। त्रीणिपदा॰ धारयान्वौ ३ षडित्यादिदृष्टांतः। विसर्जनीयोऽनत्यक्षरोपधोरिफ्यते। अन
त्यक्षरोपधः अनवर्णोपध इत्यर्थः। सवषट्कारेणसंधीयमानोरिफ्यते। पिबासोममभियमुग्रतर्दः॰ ऊर्वौभी३
वैंइत्यादिनिदर्शनं। इतरश्चरेफी। इतरः अवर्णोपधःसचरेफीसंज्ञश्चेत्तर्हिरिफ्यते। महोयोवर्जइतरोयथोक्तमित्य
त्ररेफीसंज्ञाधिगंतव्या। उतत्सेचमसंनवं॰ पुना३वैंइत्यादिनिदर्शनं। लुप्यतेरेफी। अवर्णोपधोयोविसर्जनीयः ९७
रेफिसंज्ञश्चनभवतिसलुप्यतएववषट्कारसंधौ। अर्वाङ्‌ेहिसोमकामं॰ हूयमानोवोइत्यादिनिदर्शनं। प्रथ

मः स्वंततीयं। वर्गाणांयोयः प्रथमः ससः स्वंततीयमापद्यते। चिदर्वाग्वौ॰ उदाहृतिः। निर्त्यमकारे। अंत
स्थासुतांतामित्यनेनोक्तमित्यर्थः। येऽयजामहेसमिधःसमिधोअग्नआज्यस्यव्यंत ३ वौ ३ षळितिवषट्कारः।
वौषट्शब्दोवषट्कारइत्यर्थः। इतिप्रथमः। अयंप्रथमः प्रयाज इत्यर्थः। वागोजःसहओजोमयिप्राणापा
नावितिवषट्कारमुक्तोक्तानुमंत्रयते। सर्वस्यायंविधिःस्यादित्येवमर्थावीप्सा। दिवाकीर्त्योवषट्कारः। इथारात्रौ
नप्रयोक्तव्य इत्यर्थः। किंचवषट्कारसंबंधियत्कर्मतद्ध्यंतराविरोधेसतिदिवैवकर्तव्यमिति। तथानुमंत्रणं। दिवा
कीर्त्यमित्यर्थः तत्रोक्तार्थमेव। एतद्याज्यानिदर्शनं। यदिदंयाज्यायाःपुरस्तादागःतस्याश्चादौयाज्यांतेचप्लुतिः
स्यात्‌उपरिष्टाच्चवषट्कारस्तस्यचादौप्लुतिस्ततोनुमंत्रणमित्येतद्याज्यालक्षणनिदर्शनं। मनुमंत्रणस्यायाज्यांतर्भा
ववचनंतदंतंवाग्यमनार्थं। तनूनपादग्नआज्यस्यवेत्वितिद्वितीयोन्यत्रवसिष्ठशुनकात्रिवध्र्यश्वराजन्येभ्यःवसि
ष्ठादिभ्योनोषामयंद्वितीयः। नराशंसोअग्नआज्यस्यवेत्वितितेषां। वसिष्ठादीनामयंद्वितीयः। इळोअग्नआज्य

Indira Gandhi National
Centre for the Arts

स्यवेत्विति तृतीयः। सर्वेषामिति शेषः। वर्हिरग्न आज्यस्य वेत्विति चतुर्थः। आग्नेयं पंचमे स्वाहा सुस्वाहा मुमि
१८ तिं यथावाहितमनुद्रुत्य देवता यथा चोदितमनावाहिता स्वाहा देवा आज्यपा जुषाणा अग्न आज्यस्य व्यंत्विति। पंच
मे एवं कृत्वा तेनैव यजेदिति शेषः। आगुरो विधानं क्रमार्थं प्रतिदैवतं स्वाहा शब्दाभ्यासार्थं वीप्सा। वचनं। यथावाहि
तग्रहणं प्रमादादावाहिता या अस्थानिन्या अपि ग्रहणार्थं अनावाहिता इत्येतत्त्याः स्थानि न्योपि देवताः प्रमादादना
वाहिताः स्युस्तासामप्यत्र यथाचोदिते क्रमे निगमनार्थं प्रयाजानुयाजांतेत्यादिषु यथाचोदितं तदीयानां देवता
नां निगमनार्थं च। इदमेव प्रकारद्वयमनावाहितग्रहणात् गृह्यते। नान्यथा। यथावाहितग्रहणेन पठितावाहना
नगृह्यते। तासां पाठादेव निगमनं नान्यथेत्यर्थः। स्वाहा देवा इति यथा सूत्रं मंत्रशेषः। आतो मंद्रेण। इतः पूर्वं यत्तन्मं १८
द्रेण प्रयोक्तव्यं। अत्र पूर्वाविधेरभावादन्यच्चैतत्पूर्वमग्निमंथनादि यद्भवति तदपि मंद्रेण प्रयोक्तव्यमिति गम्यते।
त्रीणि वाचस्थानानि मंद्रमध्यमोत्तमसंज्ञकानि। तेषु सप्त सप्त यमा भवंति। यमा नामावस्थाः तत्र सप्तमयमेन

वषट्कारः प्रयोक्तव्यः। तत एकावरोहेण याज्या। एवं सर्वत्र एकैकयमावरोहेण वषट्कारः प्रयोक्तव्यः। ऊर्ध्वं च शंयु
वाकात्। मंद्रेण प्रयोक्तव्यं। मध्यमेन हवींष्यास्विष्टकृतः सर्वत्राकारोभिविधावेयात्र त्वभिविधौ मर्यादायां वा
भवत्यध्वर्युवशात्। अत्र स्विष्टकृन्मध्यमेनोत्तमेन वा अध्वर्युवशात्प्रयोक्तव्यं। प्रयाजेभ्य ऊर्ध्वमास्विष्टकृतो मध्य
मेन प्रयोगः। हविर्ग्रहणं स्थानांतरेपि प्रधानहविषां मध्यमस्वर एवेति। उत्तमेन शेषः। इडादिः स्विष्टकृदादिर्वा
शंयुवाकांतः शेष इत्युच्यते स उत्तमेन प्रयोज्यः। अग्निर्वृत्राणि जंघनदिति पूर्वस्याज्यभागस्यानुवाक्या। त्वं सोमा
सि सत्पतिरित्युत्तरस्य जुषाणो अग्निराज्यस्य वेत्विति पूर्वस्य याज्या जुषाणः सोम आज्यस्य हविषो वेत्वित्युत्तरस्य
तावाग्नेयादेशो यजति। तावित्याज्यभागसंप्रत्ययार्थं। आग्नेयेति देवतादेशस्य क्रमविधानार्थं। यजतीति देवतादे
शस्य याज्यया संधानार्थं। तावाज्यभागसंज्ञकौ यागावाग्नेयानंतरं द्वितीयया विभक्त्या देवतामादिश्यादिश्य याज्य
यासंधाय यजतीत्यर्थः। सर्वास्त्वनुवाक्यावत्यो प्रैषा अन्या अन्वायात्याभ्यः। या अन्वायातशब्देनानुनिर्वापशब्दे

नवा चोदिताः ताअन्वायात्याश्च नाभ्योन्यादेवता अनुवाक्यावत्यो भैषाश्च ताः सर्वा आदिश्यपष्ट्याः॥ अन्वा
१८ यात्यानामनुवाक्यारहितानां चस नैयाणां चादेशो न कर्तव्य इत्यर्थः॥ सर्वग्रहणमाज्यभागयोरपि सन्नैषयोरादेश
निवृत्त्यर्थं। सौमिकीष्वग्न्याअंतरेण वैश्वानरीयं पत्नीसंयाजांश्च। सौमिकीष्वः सोमेज्यन्त्वाः नमोमेश्रयोज्या
अपितत्रोत्पन्नानामेव तत्र भवत्व संभवात्। वैश्वानरीय पत्नीसंयाजानां तु च्छब्दचोदितानामेव ग्रहणं युक्तं। अ
त एतस्मिन्नेवासने वैश्वानरीयस्य यजतीत्येतदेव गृह्यते• पत्नीसंयाजेश्चरित्वावभृथं व्रजंतीति• एतदेव च।
अन्याइत्यानुवर्तते। अंगप्रधानरूपे सोमकर्मणि यो तौ वैश्वानरीयपत्नीसंयाजशब्दचोदितौ पदार्थौ तयोर्म
ध्ये यास्तत्रैवोत्पन्नादेवतास्ताभ्यो ष्वन्याः देवताआदिश्यपष्ट्याः॥ नता आदिश्यपष्ट्या इत्यर्थः॥ एतौ वार्त्रघ्नौ
पौर्णमास्यां। या वृत्तौ पौर्णमास्यामाज्यभागौ तौ वार्त्रघ्नसंज्ञौ भवत इत्यर्थः॥ सनिमित्तेयं संज्ञेत्याह। अनुवाक्यालिं १९
गविशेषान्नामधेयान्यत्वं॥ ततो विचारः॥ अनुवाक्यात एव विचारो वगमोन्यत्वमित्यर्थः॥ निस्येयाज्ये। उक्तेए

चैते सर्वत्र याज्ये• मानुवाक्यावदेतयोरन्यत्वमित्यर्थः॥ वृधन्वंतावमावास्यायां। अग्निः प्रत्नेन मन्मना सोमगी
र्भिष्ट्वा वयमिति। आतोक्ता ग्यमनं। आदित आरभ्याज्यभागपर्यंतं वाग्यमनं भवति। अंतरा च याज्यानुवाक्ये। निग
दानुवचनाभिष्टवनशस्त्रजपानां चारभ्यासमाप्तेः॥ अत्राभिष्टवनसंस्तवनशस्त्रेतिसंस्तवनशब्दः पठितव्यः॥ आ
रभ्येति वचनमन्यदपि यत्प्राज्यादिभ्यस्तदारभ्यासमाप्तेर्वाग्यमनसिध्यर्थं। होतुरधिकारात्कर्त्रंतरस्यापि प्रापणार्थं
चेति। अन्यद्यज्ञस्य साधनात्। यज्ञस्य साधनवचसोन्यत्र वाग्यमनं नियम्यते। यज्ञसाधनवचो नाम यज्ञसंपाद
नार्थं तद्वेषपरिहारार्थं च। आपद्यातो देशअवंतु न इति जपेत्। आपद्येति नियमनतिक्रम्येत्यर्थः॥ अपि वा 'ग्यां वैष्ण
वीं। अन्यामपीति वचनं पूर्वोक्तायां अपि वैष्णवीत्वप्रतिपत्त्यर्थं॥ ५॥ उक्ता देवतास्तासां याज्यानुवाक्या अग्निर्मू
र्धा भुवो यज्ञस्याप्यमग्निः सहस्रिण इति वेदं विष्णुर्विचक्रमे त्रिर्देवः पृथिवीमेष एतामग्नीषोमा सवेदसा युवमे
तानि दिवि रोचनानी द्याग्नी अवसागतं गीर्भिर्विप्रः प्रमतिमिच्छमानः ईडानं सिंशयिं मससाहिषेपुरुहूतश

Indira Gandhi National
Centre for the Arts

न्नमहाँ इंद्रोय ओजसा भुवस्त्वमिंद्र ब्रह्मणा महानिति यद्यग्नीषोमीय उपांशुयाजो ऽग्नीषोमायो अन्यवामान्यं
२० दिवो मातरिश्वा जभारेति। उक्तसंकीर्तनं देवताविधिक्रमस्मरणार्थं तासां याज्यानुवाक्या वक्ष्यमाणा लिंगक्रमा
भ्यां योजनीया इति। इदमपि उक्तसंकीर्तनस्य प्रयोजनं। यत्र देवताविधानानंतरमृचो विधीयंते तत्र तासां देवतानां
ता एव याज्यानुवाक्या इति सार्वत्रिकोयं विधिरित्येतत् ज्ञापयितुं। अयमग्निरिति गायत्री याज्यानंतरमुक्तत्वा
धाज्येयं भवति। सा तु गायत्री सामान्याद्धाधानएव भवति। यद्यग्नीषोमीय इति सूक्तम्यां ते पठन् असंशयार्थ
मुक्तवानाचार्यः। अथ स्विष्टकृतः पिप्रीहि देवाँ उशतो यविष्ठ इत्यनुवाक्या। अथशब्दः प्रधानानंतरं स्विष्टकृतो
यागः स्यान्नावाहनक्रमेणेति। अनुवाक्यावचनं सर्वत्र पूर्वमनुवाक्या पश्चाद्याज्येति प्रदर्शनार्थं। ये३ यजा
महे ऽग्निं स्विष्टकृतमयाळग्निरित्युत्क्रोष इष्या विभक्त्या देवतामादिश्य प्रियाधामान्ययाळित्युपसंतनुयात्। २०
आग्नेयं विधानं निगदा दाववस्यानर्ग्गाद्दाविति। अग्निं स्विष्टकृतामिति वचनं अग्निं होत्राय शब्देनादेशो नस्या

दिति। षष्ठी विधानं द्वितीया यानिवृत्त्यर्थं। देवतामादिश्य प्रियाधामानि शब्दमुपसंतनुयात्। अयाडिति शब्दः पू
र्वपठित एवोत्तरेण सूत्रेण तस्यास्तस्या देवतायाः पुरस्तादनिदेशरूपेण विधीयते। देवताया उपरि ह्यादिधीय
माने न प्रियाधामानि शब्देन संधानार्थं प्रियाधामान्ययाळिति संततं पठितं। अतोत्र प्रतिदेवतमेक एवायाट्श
ब्दः प्रयोक्तव्यो न द्वितीय इति स्थितं। एवमुत्तरा अयाळयाळिति देवतानां पुरस्तात्। उत्तरासामयं विशेषः अ
याट्शब्द एव तासां पुरस्तात्प्रयोज्यो नाग्निशब्दोपीति। एतदुक्तं भवति। प्रथमदेवतायाः पुरस्तादयाळग्निशब्दः उ
त्तरासामयाट्शब्द एव सर्वासामुपरिष्टात् प्रियाधामानि शब्दः। सर्वे च संतता वक्तव्या इति। आज्यपांतमनुक्रम्य
देवानामाज्यपानां प्रियाधामानि यक्षदग्नेर्होतुः प्रियाधामानि यक्षत्स्वं महिमानमायजतामेज्या इषः कृणोतु सो
अध्वरा जातवेदा जुषतां हविरग्ने यदद्य विशो अध्वरस्य होतरित्यनयानं यजति। आज्यपांतमिति प्रसिद्धक्रमसंग्र
हादावाहनक्रमे। नापि परिगृह्यते तेनास्थानि न्यालिगमननिहापिस्यात्। आज्यपांतमेवमुक्त्वा तदनंतरेण

Indira Gandhi National Centre for the Arts

प्रियाधामानिशब्देनयक्षदितिसंधायपथासत्रमुक्तानुषतोहविरग्नेयदध्येस्टचानुछूसन्यजेत। सर्वमानुष्ठासः
२१ कर्तव्योस्यांयाज्यायां॥ प्रकृत्यावा। अर्धर्चेवोछुसेत॥ प्रदेशिन्याः पर्वणीउत्तमेअंजयित्वौष्ठयोरभ्यात्मंनिमा
र्ष्टि॥ प्रदेशिनीनामंगुलिविशेषः। पर्वणीपर्वसंधी। उत्तमेइत्सग्रतोद्वेपर्वणीइत्यर्थः। अध्वर्युणातेपर्वणीअं
जयित्वाअभ्यात्मंपाणितलंकृत्वओष्ठयोरधागपर्वणीनिमार्ष्टि॥ वाचस्पतिनातेहुतस्येषप्राणाय प्राश्नामीत्युत्त
रमुत्तरेमनसस्पतिनातेहुतस्योर्जेशनायप्राश्नामीत्यधरमधरे। अनेनैकस्मिंनित्सनयोरित्यर्थः। स्पृष्टोदकमं
जलिनेळांप्रतिगृह्यसव्येपाणौकृत्वापश्चादस्याउदगंगुलिंपाणिमुपधायावांतरेळामवदापयीत। द्विहस्तयोगों त~
जलिः तंकृत्वातेनइळांगृहीत्वासव्येपाणौकृत्वानिधायेत्यर्थः। अस्याइतीळायाइत्यर्थः। याहस्तेवदीयते
सावांतरेळा। अवदापयीताध्वर्युं। अंतरेणांगुष्ठमंगुलीश्चसयंद्वितीयमाददीत। अंगुल्यंगुष्ठयोर्मध्येनप्र २३
देशेनस्वयमिळायाअवांतरेळार्धमाददीत। प्रस्तालब्धामंगुष्ठेनाभिसंगृह्यप्रत्याहृत्य। प्रस्तालब्धांस्पृष्टा

मध्वर्युणावेत्यर्थः। अंगुलीरमुष्टिंकृत्वादक्षिणतइळांप्रतिगृह्यास्यसंमितामुपह्वयतेप्राणसमितांवा॥
अमुष्टिंकृत्वा॥ अंगुलीभ्योबहिरंगुष्ठमकृत्वेत्यर्थः। सव्येहस्तेनिहितामिळांदक्षिणेनहस्तेनगृहीत्वावांतरे
ळांतांदक्षिणतः। परिगृह्यआस्यसंमितांप्राणसंमितांवेळांकृत्वातामुपह्वयते। प्राणसंमितानासिकासंमिता
मित्यर्थः। इळोपहूतासहदिवाबृहतादित्येनेत्यस्मांइळाह्वयतांसहदिवाबृहतादित्येनेळोपहूतासहांतरिक्षेण
२५ वामदेव्येनवायुनोपास्मांइळाह्वयतांसहांतरिक्षेणवामदेव्येनवायुनेळोपहूतासहपृथिव्यारथंतरेणाग्निनो
पास्मांइळाह्वयतांसहपृथिव्यारथंतरेणाग्निनोपहूतागावःसहाशिरउपमांगावःसहाशिराह्वयंतामुपहूता
धेनुःसहऋषभोपमांधेनुःसहऋषभाह्वयतामुपहूतागोर्घृतपद्युपमांगोर्घृतपदीह्वयतामुपहूतादिव्याःस
प्तहोतारउपमांदिव्याःसप्तहोतारोह्वयंतामुपहूतःसखाभक्षउपमांसखाभक्षोह्वयतामुपहूतेलावृष्टिरुपमा
मिळावृष्टिर्ह्वयतामित्युपांश्वथोच्चैः। इळोपहूतोपहूतेळोपास्मांइळाह्वयतामिळोपहूता। मानवीघृतपदी

मैत्रावरुणी अग्ने देवकृतमुपहूतं दैव्या अध्वर्यव उपहूता उपहूता मनुष्याः। य इमं यज्ञमवान्ये च यज्ञपतिं वर्धानुप
२२ हूते द्यावापृथिवी पूर्वजे ऋतावरी देवी देवपुत्रे। उपहूतोऽयं यजमान उत्तरस्यां देवयज्यायामुपहूतो भूयसि हविष्क
रण इदं मे देवा हविर्जुषंतामिति तस्मिंनुपहूत इति॥ इडोपहूता सह दिवेत्यादिना तस्मिंनुपहूत इत्यंते नोपक्रम
त इति उपांशुत्वमनेन निगदानां तत्स्वरत्वाद् प्राप्तमुपांशुत्वं विधीयते। तेनैकश्रुत्यमनुपरतमेवेति स्थितं। अथो
च्चैरित्यनेनोत्तरस्य निगदभागस्य तंत्रस्वरानपगमः कथ्यते। प्राप्तत्वान्नापूर्वं विधीयते। अतः तस्मिन्ननुच्य
माने संशयः स्यान्निगदमध्ये उपांशुत्वमुच्यमाने किं सर्वस्य निगदस्य। आहोस्वित्पूर्वस्य भागस्यापरस्य वेति। अ
स्मिंस्तूच्यमाने पूर्वस्यैव भागस्योपांशुत्वं विहितं भवति नोत्तरस्य भवती। तेनात्र संशयः॥ इडोपहूता। मनुष्याः। देवी
देवपुत्रे॥ इति त्रीण्यवसानानि॥ उपहूयावांतरेडां प्राशनीयादिडे भागं जुषस्व नः पिन्व गा जिन्वार्वतो रायस्पोष ५२
स्य शिषे। तस्य नो रास्व तस्य नो दास्तस्यास्ते भागमशीमहि। सर्वात्मानः सर्वतनवः सर्ववीराः सर्वपूरुषाः सर्वपु

रुषा इति वा। उपहूयेत्यनुच्यमाने हविर्जुषंतामिति निगदांतः स्यात्। तस्मिन्नुपहूत इत्यवांतरेडाभक्षणमंत्रः
स्यात्। इडे भागमित्यादि। तयोर्विकल्पार्थो वाशब्दः। सर्वपूरुषाः सर्वपुरुषा इति पदद्वयविशिष्टश्च मंत्र इत्येते दो
षाः स्युः। एतस्मिंस्तूच्यमाने तस्मिन्नुपहूत इत्येव मंत्रो निगदः स्यात्। पूर्व इति शब्दो निगदैकदेशः स्यात्। वा
शब्दश्च मंत्रावयवविकल्पार्थ एव स्यात्। सर्वपुरुषा इत्यंत इति शब्दान्नैतावानेव च मंत्रः स्यात्। इत्येवं सर्वसमं
जसं भवति। होता वांतरेडां भक्षयित्वा इडामपि भक्षयेत्। सर्वे च सयजमाना इडां भक्षयेयुः। इडा सर्वेषां इति
पशुविभागे दर्शनात्। शास्त्रांतरे च यजमानपंचमा इडां भक्षयेयुरिति दर्शनाच्च॥ ॥ मार्जयित्वानुयाजैश्चरंति।
मार्जनमिडाभक्षणांगं पित्र्यायामिडाभक्षणाभावे मार्जनस्याप्यभावदर्शनात्। भक्षयित्वा मार्जने दृष्टश्चोप
कारोऽस्ति शुद्धिर्नाम। अत इडांतकर्मस्वपि मार्जनमस्त्येव। नैतदनुयाजांगं चतुर्थीकरणदक्षिणादानाभ्यां व्य
वहितत्वात्। पित्र्यायामनुयाजसत्तायामपि तदभावदर्शनाच्चेति। अतो मार्जयित्वानुयाजैश्चरंतीति वचनं चतुर्था

Indira Gandhi National
Centre for the Arts

२३ करणदक्षिणादानयोरनित्यत्वस्य नार्थः। तथाह्यनाग्नेयेषु चर्याकरणं नास्ति। अंगभूतेषु च दक्षिणादानं ना
स्ति। परिस्तरणेरंजलिमंतर्धायापआसेचयते तन्मार्जनं। आहवनीयपरिस्तरणेः। भक्षणार्थं निष्क्रम्य पुनः प्र
विष्टानां प्रथमप्राप्तत्वात्तेषामासेचयते। अपः सहकारिणा। देवाद्योनुयाजाः। देवाद्योदेवशब्दाः इत्यर्थः। पुनरनु
याजग्रहणं उत्तरस्य सूत्रस्य प्रयाजानुयाजार्थत्वाय। वीतवत्सदोताः। वीतवत्सदो तत्वं प्रयाजानुयाजयोर्गुणः स्यात्।
त्रयः। तेनुयाजी स्त्रयो भवंति। एकैकं प्रेषितो यजति। देवान्यजेति प्रथमसंप्रैषस्य सर्वार्थत्वे सत्यपि पुनः प्रेषित एव
यजेत्। इमेनुयाजाः। देवं बर्हिर्वसुवने वसुधेयस्य वेतु। देवो नराशंसो वसुवने वसुधेयस्य वेतु। देवो अग्निः स्विष्टकृत्सुद्र
विणा मंद्रः कविः सत्यमन्मायजी होता होतुर्होतुरायजीयानग्ने यान्देवानयाळ् यां अपिप्रेर्ये ते होत्रे अमत्सत। तांसस
नुषीं होत्रां देवंगमां दिवि देवेषु यज्ञमेरये मं स्विष्टकृच्चाग्ने होताभूर्वसुवने वसुधेयस्य नमोवाके वीहीति। अनवानं २३
वा। अमत्सतेत्यत्रावसाय वा। अनवसाय वा यजेत्॥ ८॥ सूक्तवाकाय संप्रेषित इदं द्यावापृथिवी भद्रमभूदार्ध्म सू

क्तवाकमुत नमोवाकमृध्यास्म सूक्तोच्यमग्ने त्वं सूक्तवागसि। उपश्रुती दिवस्पृथिव्योरोमन्वती तेस्मिन्यज्ञे यजमा
न द्यावापृथिवी स्तां। शंगयी जीरदानू अत्रस्नू अप्रवेदे उरुगव्यूती अभयंकृतौ। वृष्टिद्यावा रीत्यापा शंभुवौ मयोभु
वा ऊर्जस्वती पयस्वती सूपचरणा च स्वधिचरणा च तयोराविदी त्यत्रावसाय प्रथमया विभक्त्या दिश्य देवतामिदं ह
विरित्युपसंतनुयात्। असि। स्तां। अभयंकृतौ। विदि। अकृतेति च। अक्रातामक्रते
त्येवं। यजमानस्य नामनी। मानुषाः। इत्यवसानानि सर्वाणि निगदे। अत्र तु प्रथमाविधानं द्वितीयानिवृत्त्यर्थं। आ
विदी त्यत्रावसाय प्रथमया विभक्त्या दिश्य देवतामिदं हविरित्युपसंतनुयात्। एवमुत्तराः। उत्तरा अपि देवता आदि
श्य इदं हविरित्येवमुपसंतनुयात्। अक्रातामक्रतेति यथार्थं॥ द्विदैवतबहुदैवतयोरेवमूहः कर्तव्यः। यथार्थव
चनं अर्थवशेनाभिधानं इत्येवमर्थं। उक्तमुपांशोः। आवहस्ताहेत्युक्तमित्यर्थः। उक्तस्य वचनमस्य निगदस्य प
ऋग्वणीष्ठिवदेव प्रयोगार्थं। न सूक्तवाकप्रैषवद्यजुष्टादीनां उपांशुत्वं विधीयते। आवापिकं तमनुद्रुत्य देवा अ।

Indira Gandhi National Centre for the Arts

ज्यपा आज्यमजुषंतावीवृधंत महो ज्यायो ऽक्रताग्निर्होत्रेणेदं हविरविरजुषतावीवृधत महो ज्यायो ऽकृत। अस्यामृधेद्धो
२४ त्रायां देवंगमायामाशास्ते ऽयं यजमानो ऽसावसाविति यस्यादिश्य नामनी उपांशु संनिधौ गुरोरमुष्य आशास्ते सुप्रजास्त्वमा
शास्ते रायस्पोषमाशास्ते सजातवनस्यामाशास्ते उत्तरां देवयज्यामाशास्ते भूयो हविष्करणमाशास्ते दिव्यं धामाशास्ते
विश्वं प्रियमाशास्ते यदनेन हविषाशास्ते तदस्यात्तदृध्यात्तदस्मै देवा रासंतां तदग्निर्देवो देवेभ्यो वनते वयमग्नेर्मा
नुषाः। इष्टं च वित्तं चोभे च नो द्यावापृथिवी अंहसस्पातामिह गतिर्वामस्येदं नमो देवेभ्य इति। आवापिकांतमि
त्येतदावापिकदेवताक्रमप्राप्त्यर्थं। लिनास्थानिन्यत्रापि निगद्यते। देवा आज्यपा इति यथा सूत्रे। असावसाविसत्र
यजमाननामनी प्रथमया विभक्त्या निर्दिशेत्। सांव्यवहारिकं नाक्षत्रं च। होतुर्गुरुश्चेद्यजमानः स्यात्तस्ये नि २४
धौ उपांशु नामनी ब्रूयात्॥९॥ शंयुवाकाय संप्रेषितस्तच्छंयोरावृणीमह इत्याहानुवाक्यावदप्रणवां। अनुवा
क्यावद्वचनमेकश्रुत्यप्रापणार्थं। अप्रणवामिति प्रणवो निषिध्यते॥ वेदमस्मै प्रयच्छत्यध्वर्युः। वेदस्य ह

णकालज्ञापनार्थमेतत्सूत्रं। अतो ऽध्वर्युणा दत्तेन गृह्णीयात्। अदत्तेपि स्वयमेव गृह्णीयात्। तं गृह्णीयाद्वेदो ऽसि
वेदो विदेयेति। तमिति विस्पष्टार्थं। यदा द्वौ वेदौ दद्यात्तदा तं तं गृह्णीयादित्यर्थः। यदि द्वौ युगपद्दद्यात्तदो हे
न मंत्रं ब्रूयात्। वरुणप्रघासादिषु। उदायुषेत्येतेनोपोत्थाय पश्चात्प्राङ् पत्न्यास्योपविश्य सोमं त्वष्टारं देवानां
पत्नीरग्निं गृहपतिमित्याज्येन यजंति। एतेनेति वचनं प्रकृतिविकारभावेपि कृत्स्नस्य मंत्रस्य प्रापणार्थं।
आज्यवचनं यत्राज्येन सोमइज्यते तत्रैते याज्यानुवाक्ये भवतः। नान्यहविष्के सोम इति। यजंतीति वचनं या
गणवत्तासां देवतानां। न निगमेष्वनुवृत्तिरिति। आप्यायस्व समेतु ते सं ते पयांसि समु यंतु वाजा इह त्वष्टारम
ग्नियं तन्नस्तुरीपमध पोषयित्नु देवानां पत्नीरुशतीरवंतु न इति द्वे अग्निर्होता गृहपतिः स राजा हव्यवाळग्निर
जरः पिता न इति पत्नीसंयाजाः। इदं संज्ञाविधानार्थं॥ अथ प्रजाकामो राकां सिनीवालीं कुहूमिति प्राग्गृहप
तेर्यजेत॥ अथ शब्दः पक्षांतरपरिग्रहार्थः। अथ चेद्यजमानः प्रजाकामः स्यात्तदैता यजेतेति। प्राग्गृह

Indira Gandhi National
Centre for the Arts

पतेरितिदेशविधानेनहवींभिः समुच्चयंदर्शयति। राकामहंसिनीवालिकुहूमहमितिद्वेयाज्यानुवाक्ये॥
२५ याज्यानुवाक्यावचनंप्रजाकामोयजेतेत्यनेनयजमानेसंनिहितेपिहोतैवकर्तास्यादिति। याज्यानुवाक्ययोर्होतृक
र्तृत्वं अन्यतः प्रसिद्धमिति। कुहूमहमितिप्रतीकग्रहीतेपित्वयनेवचयति। कुहूमहंसुवृतंविद्मनापसमस्मिन्यज्ञे
सुहवांजोहवीमि। सानोददातुश्रवणंपितृणांतस्यैतेदेविहविषाविधेम। कुहूर्देवानाममृतस्यपत्नीहव्यानोअस्य
हविषःशृणोतु। संदाशुषेकिरतुभूरिवामंरायस्पोषंयजमानेदधात्विति। आज्यंपाणितकेवदापयीतेकामुपहूय
सर्वंप्राश्नीयात्। पर्वाजनाद्युपफानांतंकार्यंनात्रअवांतरेळा। पाणितकस्थमाज्यमिळेत्युच्यते। ततः सर्वंप्राश्नी
यादित्युच्यते। शंयुवाकोभवेन्नवा। आज्येळापाऊर्ध्वंशंयुवाकोभवतिनभवतिवेत्यध्वर्यूणांसंस्थाप्रकाराः २५
संतीतितत्सूचनार्थमेतत्सूत्रं। यदिस्याद्धोतापितथापिकुर्यादित्येवमर्थं॥१०॥वेदंपत्न्यैप्रदायवाचयेद्धोताध्वर्युर्वा
वेदोसिवित्तिरसिविदेयकर्मासिकरणमसिक्रियासंसनिरसिसनितासिसनेयंघृतवंतंकुलायिनंरायस्पोषंस

हस्रिणंवेदोददातुवाजिनं। यंबृहद्वउपजीवंतियोजनानामसदृशी। तंविदेयप्रजांविदेयकामायत्वेति। पत्न्यैवेदं
प्रदायतांवाचयति। होताध्वर्युर्वा। वेदोसीत्यादिकामायत्वेत्येवमंतंयथास्यात्। वाचनमंत्रस्योच्चैः प्रयोगोर्थात्सिध्य
ति। कार्यंतुलिंगजनितमेव। वेदशिरसानाभिंदेशमालभेतप्रजाकामाचेत्। यदिपत्नीप्रजाकामेस्यादितिका
मयेत। तदावेदस्यज्ञानुसदृशेनप्रदेशेनपत्नीस्वनाभिमालभेतकामाभावेपिवाचनंभवत्येव। अथास्यायोक्त्रं
विचृतेत्स्वत्वामुंचामिवरुणस्यपाशादिति। अथेतिसंबंधार्थः। यद्यनंतरंयोक्त्रविमोकः स्यात्तदेववाचनम
पीति। कामाभावेवाचनानंतरयोक्त्रविमोकःस्यान्नत्वालंभनमिति। अस्याइतियोक्त्रविमोचनेहोतृकर्तृक
मितिदर्शयति। तत्प्रस्यगार्हपत्याद्द्विगुणंप्राक्पाशंनिधायोपरिष्टादस्योदगग्राणिवेदतृणानिकरोति। तद्योक्त्रं
द्विगुणंकृत्वागार्हपत्यात्प्रत्यक्प्राक्पाशंप्राङ्मूलाग्रप्रदेशमित्यर्थः। निदध्यात्। योक्त्रस्यमलप्रदेशःपाशःपा
शशब्दोत्रमलाग्रयोःप्रदर्शनार्थः। अस्ययोक्त्रस्योपरिष्टाद्वेदतृणान्युदगग्राणिनिदध्यात्। पुरस्तात्पूर्णपा

Indira Gandhi National
Centre for the Arts

त्रे संश्लिष्टं वेदतृणैः। तृणेभ्यः पुरस्तात्तृणैः संश्लिष्टं पूर्णपात्रं निदध्यात्। अभिमृश्य वाचयेत्। पूर्णमसि पूर्णं मे भू
२६ याः सुपूर्णमसि सुपूर्णं मे भूयाः सदसि सन्मे भूयाः सर्वमसि सर्वं मे भूयाः अक्षितिरसि मा मे क्षेष्ठा इति। अभिमृश्य अ
भिमर्शनमित्यर्थः। तां वाभिमर्शनीं वाचयेत्। प्रत्यगाशीष्ट्वान्मंत्रस्य। अथैनां पूर्णपात्रात्प्रतिदिशमुदकमुत्सेचयन्तीमुद
क्षन्तीं वा वाचयति प्राच्यां दिशि देवा ऋत्विजो मार्जयन्तां दक्षिणस्यां दिशि मासाः पितरो मार्जयन्तां प्रतीच्यां दिशि गृहाः
पशवो मार्जयन्तामुदीच्यां दिश्याप ओषधयो वनस्पतयो मार्जयन्तामूर्ध्वायां दिशि यज्ञः संवत्सरः प्रजापतिर्मार्जय
तां मार्जयन्तामिति वा। पूर्णपात्रादुदकं गृहीत्वा तदुत्क्षिपन्तीं चैवं कुर्वतीं वाचयति। अत्रोत्क्षेपणं अकुर्वत्या वा
चने मंत्रलिंगस्य विरोधाभावादुत्क्षेपणमपि विधीयते। पूर्वत्र तन्मंत्रलिंगादेवाभिमर्शनं अकुर्वत्या मंत्रोच्चार
णं न संभवतीति। न तस्या अभिमर्शनं विहितं। मार्जयन्तामिति वेति पदद्वयमात्रविकल्पः। अथास्या उत्तानमंज २६
लिमधस्ताद्योक्त्रस्य निधाय तस्मिन्नस्याः सव्यं पूर्णपात्रं निनयन्वाचयेन्माहं प्रजां परासिचं या नः सयावरी स्थ न। स

मुद्रे वो निनयानि स्वं पाथो अपीथेति। योक्त्रस्याधस्तात्सव्यं जलिमुत्तानं आत्मनश्च सव्यं पाणिमुत्तानं निधाय
पूर्णपात्रं निनयन्माहं प्रजामिति तां वाचयेत्। यथा तन्निनीयमानमुदकं हस्तेष्वेव पतेत्तथा निनयेत्। प्राङ्मुखत्वम
त्र नाद्रियते। अधस्तादंजलिनिधानस्या दृष्टार्थत्वप्रसंगात्। अत्र पत्नी द्वित्वबहुत्वे सर्वासां वाचनं कर्तव्यं।
प्रतिपत्नि योक्त्रविमोचनमावर्तते। सर्वेषां योक्त्राणां द्विगुणीकृत्य निधानं भवति। निनयनेन तु सर्वासां स्वयोक्त्रसं
पृक्तोदकलाभायोत्क्षेपणेपि सर्वासामन्वयः। वाचनेवाच्यमंत्रलिंगजनितकार्याभावेपि वाच्यस्य पुरुषस्यैवायं
संस्कार इत्यवगंतव्यं। य एते पत्नीसंबंधाः पदार्थास्ते सर्वे परस्परसंबद्धाः। अथ शाखेन तच्छत्रेन वान्येन वा अतस्ते
सर्वे सहैव कर्तव्याः नैकैकशः। वेदतृणान्यग्रे गृहीत्वा विधन्वन्संततं तृणं सव्येन गार्हपत्यादाहवनीयमेति तं
तुं तन्वन्नजसो भानुमन्विहीति। वेदबंधस्य विमुक्तत्वात्तृणानीत्युच्यते तानि दक्षिणेन हस्तेनाग्रप्रदेशे गृहीत्वा अ
विधून्वन्नविप्लुष्टेनाकंपयन्गार्हपत्यादारभ्य सव्येन हस्तेन संततं तृणं आहवनीयं गच्छति। तंतुं तन्वन्निति आस्तर

Indira Gandhi National
Centre for the Arts

पामंत्रोन्नगमनमंत्रः। ततो मंत्रांते स्वरणारंभः। शेषं निधाय प्रत्यगुदगाहवनीयादवस्थाप्याः स्रुवेणादाय स
२७ र्वप्रायश्चित्तानि जुहुयात् स्वाहाकारांते मंत्रैर्न चेन्मंत्रे पठितः। शेषं निधायेति वचनात् तानि न सर्वाणि स्तरि
तव्यानि नियमेन शेषितव्यानीति गम्यते। आज्यस्थाल्याः स्रुवेणाज्यमादायाहवनीये स्रुवेण जुहुयात्।
आहवनीयात् प्रत्यगुदगवस्थाप्य। सर्वप्रायश्चित्तानीति संततैषां होमानां॥ स्वाहाकारांते मंत्रैर्मंत्रांते स्वा
हाकारं कुर्यादित्यर्थः। न चेन्मंत्रे यत्र क्वापि न स्वाहाकारः पठितस्तदांते स्वाहाकारः कर्तव्यः। यत्र क्वापि प
ठितश्च स एव संप्रदानार्थो भवति। यत्किंचाप्रेषितो यजेदन्यत्रापि॥ यः कश्चनास्मिं छास्त्रे देवतोद्देशे
न द्रव्यत्यागात्मको व्यापारो यागो होमाभ्याधानं बलिहरणादयो वा मंत्रेण साध्यंते तत्र सर्वत्र स्वाहाकारः
कर्तव्य इति सूत्रार्थः॥ अन्यत्रेति वचनं गार्ह्येष्वपि प्रापणार्थं॥ अप्रेषित इति वषट्कारसमुच्चयनिवृत्त्य २७
र्थः। एवंभूतोऽयं क्रतुहोमाभ्याधानोपस्थानानि च॥ एवंभूतो नामेवं प्रकार आहवनीयात्प्रत्यगुदग्देशे स्थि

त आज्यं स्रुवेणादायाहवनीय इति। एवंप्रकारविशिष्टः कर्ता एवंभूत इत्युच्यते। विशेषणपरो यमिन
र्देशः॥ अयुक्तशब्देनाविहितविशेष उच्यते। यत्र होमाभ्याधानोपस्थानान्यविहितविशेषाणि विधीयं
ते तत्रानेकप्रकारेण कर्तव्यानीत्यर्थः। एकदेशविशेषे चाप्यपेक्षितमात्रमस्माद् गृह्यते। अयाश्चाग्ने
स्यनभिशस्तीश्च सत्यमित्त्वमया असि। अयासा वयसा कृतोयासन्हव्यमूहिषे या नो धेहि भेषजं स्वाहा॥
अतो देवा अवंतु न इति द्वाभ्यां व्याहृतिभिश्च भूः स्वाहा भुवः स्वाहा स्वः स्वाहा भूर्भुवः स्वः स्वाहेति॥ एकं मं
त्राणि कर्माणीति न्यायेन द्वाभ्यां द्वे आहुती होतव्ये। व्याहृतिभिरिति निर्देशं कृत्वा पुनः पठितेन ज्ञायते व्या
हृत्युपदेशे अनेन क्रमेणैव एते चत्वार इति। हुत्वा संस्थाजपेनोपस्थायतीर्थेन निष्क्रम्यानियमः। स्यादि
ति शेषः। हुत्वेति वचनं संस्थाजपेन होमस्य संबंधार्थं। यत्र संस्थाजपोऽस्ति तत्र प्रायश्चित्तहोमोऽपि भवति
इति। अतः स्विष्टकृद्वापि संस्थाजपस्य प्रयोज्यत्वात् प्रायश्चित्तहोमोऽपि प्रयोज्य एव। उपस्थायांते तीर्थे

Indira Gandhi National
Centre for the Arts

गृहमेधी नैष्ठिकोपि त्यायं [illegible] ता शाप्यतां तु भजपेति वचनात् ४

नैव निष्क्रामेत्। निष्क्रम्या नियमइत्यर्थलुप्तानियमादित्यर्थः॥ अर्थलुप्तत्वेमत्यपि अनियमविधानं कर्ममध्ये
२८ पितीर्थे न निष्क्रांतस्याप्यावृत्तावश्यो नियमा नभवंतीति॥ तेन प्रयोगमध्येमार्गांतरेणनिष्क्रांतस्यापि नियमा
भवंतो वेति ज्ञाप्यते। ओं चमेस्वरश्च मे यज्ञोपचते नमश्च्य यत्तेन्यूनं तस्मै तउपयत्तेति रिक्तं तस्मै तेनमइति संस्था
जपः। अन्वर्थसंज्ञेयं। तेनायं सोमेष्टिपु न भवति। [illegible] इति होतुः। इति शब्देनात्रैतावत्सुमुच्यते। एतावदेवहो
तुर्नान्यदिति। होतृग्रहणं होतुरेवैतावत्। आग्नीध्रस्यान्यदपीति। अथ ब्रह्मणः। अथशब्दोधिकारार्थः। इद ॥११॥
मी ब्रह्मणोपि विधयो वक्ष्यंत इत्यर्थः। होत्राचमनयज्ञोपवीतशौचानि। व्याख्यातानीत्यर्थः। स्नानाचमनादि
नाशुचिर्भूत्वा ब्रह्मत्वं करिष्यामीत्यशुचित्वे विहारं प्रविशन् प्राङ्मुख आचमनं कुर्यात् कर्मांगत्वाद्यज्ञोपवीतग्र
हणं पेत्कमानुषयोरपि कर्मणोर्वचनादृते यज्ञोपवीती त्येव स्यादिति। शौचग्रहणं तु कृत्वार्थमपि अशुचित्व २८
संपादि यस्माद्विहाराद्बहिः कर्तव्यमिति॥ एतच्च प्रागत्वे विधीयते। अयमपि तीर्थेन विहारं प्रपन्न इति। प्राक्त्वे

ष्टतास्य प्राग्नाने ष्यते। यज्ञमना इति कर्माभिमुख्य एव यज्ञमनस्त्वोपपत्तेः। अंकधारणमुपवेशांगतया प्राप्त
मदृष्टार्थता परिहारायैव यावदासनमनुवर्तते। तत्र चैककर्मे त्यस्यापि कर्मसंबंधात्। अध्याग्निरविशिष्टेवद
क्षिणंगताच। तत्र चैककर्मेत्यस्युत्तरांगत्वेनाविशेषादस्यापि भवति। नित्यः सर्वकर्मणां दक्षिणतो ध्रुवाणां व्रज
तां च। अन्यतः प्राप्तस्य ब्रह्मणो यं नियम उच्यते। ध्रुवाणां व्रजतां च पुरुषाणां यानि कर्माणि तेषां दक्षिणतो नित्यो भ
वेत्। प्राकृतानामप्राकृतानां च ध्रुवाणां नित्यं दक्षिणत्वं ध्रुवेणैव कर्तुं शक्यत इति ध्रुवेषु ध्रुव एव स्यात्। व्रजतां क
र्मसु नित्यं दक्षिणत्वाय व्रजन्नेव भवेत्। ध्रुवाणां व्रजतामिति कर्तृविशेषणं न कर्मणां। नित्यत्वमत्रोपक्रमप्रभृ
त्यापरिसमाप्तेर्दक्षिणत्वसिध्यर्थं। वा शब्दः समुच्चयार्थः। क्वचित्कर्मणि कश्चित्तिष्ठति कश्चिद्व्रजति तत्रोभयसा
धर्मः परिगृह्यते। बहिर्वेदि यां दिशं व्रजेयुः सैव तत्र प्राची। यत्र बहिर्वेदि वसतीवरी ग्रहणादिकं तु यां दिशमभि
मुखा व्रजंति ऋत्विजः तत्र तामेव दिशं प्राचीं कृत्वा दक्षिणतो भवेत्। सैव तत्रेति वचनात्। बहिस्तिष्ठतामभि

Indira Gandhi National
Centre for the Arts

अयंबकंगादि

मुखएवप्राचीभवेत्। चेष्टास्वमंत्रास्तुस्थानासनयोर्विकल्पः। अमंत्रे तु कर्मसुस्थानमासनं वाभवेत्। वा श
२९ ब्देनविकल्पेसिद्धेविकल्पवचनमव्यवस्थयाविकल्पसिध्यर्थं। तेनैकस्मिन्नपिप्रयोगे क्वचिदासनं क्वचित्स्था
नमितिलभ्यते। तिष्ठद्धोमाश्च्यवट्काराः। तिष्ठतांबेहोमाः वषट्कारहिताश्चतेषुचस्थानमासनंवाभवेत्।
आसीतान्यत्र। अन्यत्रेत्यनंतरसूत्रद्वयविषयादन्यत्रेत्यर्थः। समस्तपाण्यंगुष्ठोग्रेणाहवनीयंपरीत्यदक्षिण
तः कुशेषूपविशेत्। समस्तौपाणी अंगुष्ठौ च यस्यसोयंसमस्तपाण्यगुष्ठः सव्येनपाणिनादक्षिणंपाणितलमग्र
देशेगृह्णीयात्। दक्षिणेनसव्यांगुष्ठं। एवंकृतेपाणी अंगुष्ठौ चसमस्तौभवतः। एवंभूतोग्रेणाहवनीयंपरीत्य
तस्यदक्षिणतः कुशेषूपविशेत्। निरसनंकृत्वाकुशाग्रहणात्सति संभवेतएवासनेप्रकल्प्यंते। दक्षिणत
इतिपुनर्वचनमाहवनीयस्येवदक्षिणतो नक्रियमाणस्यकर्मण इत्येवमर्थं। बृहस्पतिर्ब्रह्माब्रह्मसदनआशि २९
ष्यतेबृहस्पतेयज्ञंगोपायेत्युपविश्यजपेत्। उपविश्यग्रहणंसकृदुपविश्यपुनरपिकर्मणएवदक्षिणतोनभवे

त्। आसमाप्तेस्तत्रोपविशेदिति। एषब्रह्मजपः सर्वयज्ञतंत्रेषुसाग्नेयत्रोपवेशनं। एषमंत्रोब्रह्मजपसंज्ञो
६ भवति। सचातिशमनपेक्ष्यसर्वेषुयज्ञेषुभवति। तंत्रग्रहणंपाकयज्ञेषुअपिप्राप्तणार्थं। पाकयज्ञानामेतत्तंत्र
मितितंत्रशब्दसूत्रेषोमिति। साग्नेयत्रोपवेशनमित्यग्निप्रणयनेनसाग्नित्वेकर्मणः प्रतिपन्नेयत्रोपवेशनं
विहितंतत्रायंजपोभवति। एतदुक्तंभवति। एषजपः सर्वेषुयज्ञेषुप्रविष्टमात्रेभजेत्। अग्निप्रणयनवत्स्वग्निप्र
णयनेतएवभवति। उपविष्टमतिसर्जयते। अनुज्ञालाभार्थंमंत्रेणामंत्रयते। अध्वर्युरित्यर्थः। उपविष्टग्रहणं
प्रवेशकालज्ञापनार्थं। यस्मिन्कालेउपविष्टस्योपवेशनानंतरंअध्वर्युणातिसर्जनंभवतितस्मिन्काले प्रविशेदि
त्यर्थः। ब्रह्मन्नपः प्रणेष्यामीतिश्रुत्वाभूर्भुवः स्वर्बृहस्पतिः प्रसूत इतिजपित्वोंप्रणयेत्यतिसृजेत्सर्वत्र। अ
ध्वर्युमंत्रपाठेपृशब्दसहितेपियान्नावचनेप्रणयेत्यनुजानीयान्नापः प्रणयेत्येवं। श्रुत्वेतिवचनंश्रुत्वा
पश्चाज्जपेन्नसहेति। जपित्वेतिपूर्वस्योपांशुत्वायोत्तरस्यचतंत्रस्वरत्वाय। अतिसृजेदनुजानीयात्सर्वत्रेति

Indira Gandhi National
Centre for the Arts

सर्वेष्वनुज्ञावचनेषु अस्य विधेः प्रापणार्थं। यथा कर्मत्वादेशाः। सामस्याय्यं विशेषविधिः। यस्मै कर्मणे अनुज्ञा
२९ मिच्छति तद्देशानुज्ञानीयात्न प्रणयेत्येवं। यथाकर्मकर्मानुरूपमादेशाः कर्तव्या इत्यर्थः। प्रणवादुच्चैः। उत्तरविव
क्षार्थं। ऊर्ध्वं वा प्रणवात्। उच्चैर्भवतीत्यर्थः। अत ऊर्ध्वं वाग्यत आत आ हविष्कृत उद्वादनात्। प्रणीताप्रणयनो
पलक्षिता कालादूर्ध्वमा हविष्कृन्मंत्रोच्चारणाद्वाग्यतो भवेत्। आसद्दिति वचनं अमंत्रेष्वपि कर्मस्वस्मिन्नवस
रे आसनमेवेति नियमार्थं। आमार्जनासनौ। पत्नीवाग्निप्रणयनमारभ्य आचात्वालमार्जनाद्वाग्यतो भवेत्। सोमे
घर्मादि चाति प्रैषादि चासुब्रह्मण्यायाः। घर्ममारभ्य अतिप्रैषं चारभ्य आसुब्रह्मण्यायाः वाङ्नियमः। सोमग्रहणं
पश्वधिकारात्पशुनामक एव सोमे स्यादिति तन्निवृत्त्यर्थं सर्वसोमेषु प्रापणार्थं। प्रातरनुवाकाद्यांतर्यामात्। प्रातर
नुवाकलक्षितात्कालादूर्ध्वं आ अंतर्यामग्रहणात्। हविर्धानेषु सवनमेकायाः। तथा सवनत्रयेपि पुरोळा २९
शप्रचारमारभ्य आ पुरोळाशेळायाः। स्तोत्रेषु तिसर्जनात्यावषट्कारात्। स्तोत्रादेरुपाकरणं। तदादि

आ शस्त्रयाज्यावषट्कारानुमंत्रणाद्वाग्यतो भवेदित्यर्थः। ओदृचः पवमानेषु। पवमानस्तोत्रेषूपाकरणादार
भ्य आ उदृचः। उदृगिति समाप्तिरुच्यते। यत्तु किंचमंत्रवत्। सर्वत्र मंत्रवति कर्मणि वाग्यमनं भवति। होमाशिषः
। उक्तादन्यो यो विषयस्तत्राप्यस्य वाग्यमनं होतृतुल्यं भवति। आतो वाग्यमनमित्यादि नियमो स्याप्यधिक्रियत
इत्यर्थः। आपत्तिश्च। आपद्यातो देवा अवंतु न इति जपेदित्युक्तत्वादेतस्यां यस्मिन्समापत्तिरित्युच्यते। अनंतरो
क्तैर्नवभिः सूत्रैर्विहितस्य मनस्यन्नेव एतदेव प्रायश्चित्तमित्यर्थः। अन्यत्रैव परिसमाप्तिः। यत्राग्निः प्रणीय
ते। अपि ससोमेतदादि तत्र वाग्यमनं विहित एव वाग्यमनेतदादित्वमात्रमत्र विधीयते। पुरस्ताद्यथा तदपि
पि ससोमे सोमसहितेपि। अग्नीषोमीयप्रणयनेपीत्यर्थः। तत्र वचनं यस्मिन्हनि अग्निः प्रणीयते तस्मिन्ने
वाहनि कर्मप्रवृत्तौ तदादि वाग्यमनं। न पूर्वेद्युः प्रणयने तदादित्वनियमः। तथाह्यसद्यस्कालेषु पूर्वेद्युः प्रणी
यते वरुणप्रघासादिषु। दक्षिणतश्च व्रजं जपत्याध्रुः शिशान इति सूक्तं। सूक्तग्रहणं व्रजं जपतीति व्रजतो

Indira Gandhi National
Centre for the Arts

जपविधानाद्व्रजनसमाप्तावपि कृत्स्नस्य कर्मणो योगविधानार्थं। दक्षिणतो व्रजनविधानं दक्षिणतो व्रजतएवायं
३० जपः स्यान्नाग्निं सोमं वा प्रणयतः। तदाग्रेण गच्छतीति। समाप्त्योपवेशनाद्युक्तं॥ समाप्येति वचनं समाप्त्योप
वेशनादि यदुक्तं तदेव कुर्यात्। न सकृत्प्रवृत्तिं। गमनापरिसमाप्तावपीति। आदिग्रहणेन ब्रह्मजपः परिगृह्यते। उप
वेशनग्रहणेन निरसनमपि गृह्यते। सहचारित्वात्। एतच्च यमाग्निप्रणयनाग्नीषोमप्रणयनयोरंते विधीयते॥
नेनसूत्रेण। साग्नेयश्चोपवेशनमिस्तनेन साग्निप्रणयने पुपश्वादिकर्मस्वाग्निप्रणयनांत एव ब्रह्मजपो ना
न्यत्रेति नियम्यते। ननु सोमिके प्रणयने ब्रह्मजपः। सोमे यदग्निप्रणयनं तदंते। न ब्रह्मजपो भवति। तत्र निरस
नोपवेशने एव भवतः। अन्यच्च विसृष्टवाग्बहुभाषी यज्ञमनाः। यज्ञमनाः क्रियमाणपदार्थाभिमर्शी। विसृष्ट
वागपि यज्ञमनाः स्यादिति योगविभागः कृतः। विपर्यासे तरिते मंत्रे कर्मणि वाख्याते वोपलक्ष्य वाजान्वाच्याहु ३०
तिं जुहुयात्। विपर्यासो व्युत्क्रमः अंतरितोऽनुगमनं। मंत्रयोः कर्मणोर्वा विपर्यासे तरिते मंत्रे कर्मणि वाख्यमु

पलक्ष्य परेण वाख्याते दक्षिणं जान्वनुनिपात्य वक्ष्यमाणेन मंत्रेण वक्ष्यमाणाग्नावाहुतीं जुहुयात्। सर्वत्र जान्वनुनि
पातनमुपस्थस्योत्तानत्वाविरोधेन कर्तव्यं। नन्यभावेन केनचिदपकारेण शंबक्यादिना दोषनिबंधनात्। आ
ख्यातोपलक्षण ग्रहणमन्यस्मिन्नपि विषये यथा कथंचित् ज्ञाते एतस्याः प्रायश्चित्तं भवतीत्येवमर्थं। तेनैव म
स्य सूत्रस्यार्थो वगंतव्यः। सर्वेषु तंत्रेष्वेतत्प्रायश्चित्तं सामान्यरूपेण भवति। यदन्यद्दोषविशेषे विहितं तदस्या
पवादकं भवति। विपर्यासांतरितयोरत्र भेदेन ग्रहणात्तद्विषये विशेषेणास्य समुच्चयो भवति। सर्वेषां नैमित्ति
कानामयमुत्सर्गः। निमित्तादनंतरं कर्तव्यमिति। यस्य पुनर्बलवता प्रमाणेनानंतरं कर्तुमसंभवति तस्य याव
त्संभवमुत्कर्षो न संतमिति। याज्ञदृष्ट्यादिद्वारेण ज्ञात एव निमित्ते एतस्याः प्रायश्चित्तेन प्रयोक्तुः प्रायश्चित्तवद्वा
यतेपीति ज्ञापनार्थं। आहुतिमित्येकवचनं बहुष्वपि निमित्तेषु युगपत् ज्ञातेषु एकैवाहुतिः कर्तव्या॰ न प्रतिनि
मित्तमिति ज्ञापनाय। ऋत्कृ म्भेद्गुरिति गार्हपत्ये। यजुष्टो भुव इति दक्षिणे। आग्नीध्रीये सोमेषु। प्रागाग्नीध्री

यप्रणयनात्सोमेपि दक्षिणस्मान्वेवदक्षिणाग्न्यर्थत्वादाग्नीध्रीयप्रणयनस्य। सामतः स्वरिसाहवनीये। सर्वतोभि
३१ ज्ञातेवाभर्तृभिः स्वरिसाहवनीय एव। यदा सर्वेभ्योवेदेभ्योयुगपद्विषाआगच्छेयुः तदा समस्ताभिरेकाहुतिराहवनी
य एव कार्या। एवकारग्रहणं समस्ताभिरेकाहुतिराहवनीय एवेति ज्ञापनार्थं। अविज्ञात इति स्मार्त्ताग्नौ शौचाच
मनादौ नोत्रेयस्यज्ञापनार्थं। एते स्रुगादयः शब्दा वेदवचना न जातिवचनाः। प्राक्प्रयाजेभ्योंगारं बर्हिष्परिधि
निर्वृत्तं स्रुवदंडेनाभिनिदध्यान्मा तपो मा यज्ञस्तपन्मा यज्ञपतिस्तपन्नमस्ते अस्त्वायते नमो रुद्र परायते नमो यत्र नि
षीदसीति। प्राक्प्रयाजेभ्य इति स्रुगादापनात्प्राक् कृत्स्नं संगृह्यते। बर्हिष्परिधीत्यस्य परिधिशब्दस्य देशोप
लक्षणार्थत्वात् सर्वतो निर्वृत्तं गृह्यते। तच्च वक्ष्यमाणसत्रैः स्पष्टयति। अमुं माहिंसीरमुं माहिंसीरिति च प्रतिदि
शमध्वर्युयजमानौ पुरस्ताच्चेद्ब्रह्मयजमानौ दक्षिणतो होतृपत्नीयजमानान्पश्चादाग्नीध्रयजमाना उत्तरतः। ३१
अध्वर्युं माहिंसीर्यजमानं माहिंसीरित्येवमंतेन मातपइत्यनेन पुरस्तान्निर्गतमभिनिदध्यात्। एवमुत्तरेष्वपि प्र

योगो द्रष्टव्यः। चशब्दः अमुंमादेः पूर्वेण समुच्चयार्थः। दिगनुक्रमेण प्रतिदिशं ग्रहणार्थं सिद्ध एव यत्प्रतिदिशग्र
हणं करोति तज्ज्ञापयति सर्वदिक्संबद्धकर्माणेनक्रमेण कर्तव्यमिति। अथैनमनुप्रहरेदाहं यज्ञं ददे त्वि र्त्तं तेरुप
स्थानं देवेषु परिददामि विद्वान् सुप्रजास्त्वे शतं हिमामदंतस्त्वं नो देवामयि शर्मयच्छतेति। न स्वाहाकारांतं। तमभि
जुहुयात्सहस्रभृंगो वृषभो जातवेदाः स्तोमपृष्ठो घृतवान्त्सुप्रतीकः। मानो हिंसीद्धिंसितो नेत्वाजहामि गोपोषं च
नोवीरपोषं च यच्छ स्वाहेति। तमिति प्रहृतमेवांगारमभिजुहुयादित्यर्थः॥१२॥ प्राशित्रमाह्रियमाणमीक्षेत मि
त्रस्य त्वा चक्षुषा प्रतीक्ष इति देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यां प्रतिगृह्णामीति। तदंजलिना
प्रतिगृह्य पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थ इति। कुशेषु माग्रंदंडेविधाय अंगुष्ठोपकनिष्ठिकाभ्यामसंखा
दन्प्राश्नीयात्। अग्नेष्ट्वास्येन प्राश्नामि बृहस्पतेर्मुखेनेति। तदित्याहृतस्य प्रतिग्रहार्थं नाह्रियमाणस्येति। अंतर्वे
दिकुशेषु प्राग्दंडं [illegible] धायासंखादन्प्राश्नीयात्। असंखादन् दंतैरपीडयन्नित्यर्थः। आचम्यानाचा

Indira Gandhi National
Centre for the Arts

मेत्सस्येनत्वाभिजिघर्मि मा अप्सु तदेवतास्ता इदं नामयंतु चक्षुः श्रोत्रं प्राणान्मे मा हिंसीरिति। शौचार्थमाचमनं
३१ कृत्वा पश्चान्मंत्रेणापः पिबेत्। पुनरपि प्राग्वत् शौचार्थमाचमनं कुर्यात्। इदं हस्त्वा जठरे दधामीति नाभिमालभेत
प्रक्षाल्य प्राशित्रहरणं शिरनेनाप्यालमयो निनयते। प्रक्षालितेन प्राशित्रहरणेनात्माभिमुखेन हस्तेन चतस्राभ्
तेनात्मनः पुरतस्त्रिरपः सिंचेत्। मार्जयित्वास्मिन्ब्रह्मभागं निदध्यात्। सर्वैः कर्तृभिरिडाभक्षणं स्यात्। अनुष्ठेयत्वा
नदं गत्वाच्च मार्जनस्यास्मिन्नेवावसरे अयमपीडां भक्षयित्वा मार्जनं चकृत्वा ततः पश्चाच्चतुर्धाकरणे कृते ब्रह्म
णे आनीतं। ब्रह्मभागं प्राशित्रहरणे निदध्यात्। पश्चात्कुशेषु यजमानभागं। यस्मिन्देशे प्राशित्रहरणं निहितं त
स्य पश्चात्कुशेषु यजमानभागं निदध्यात् न प्राशित्रहरण इत्यर्थः। अन्वाहार्यमवेक्षेत प्रजापतेर्भागोस्यूर्जस्वान्पय
स्वानक्षितिरसि मा मे क्षेष्ठा अमुत्रामुष्मिंश्च लोके मुष्मिंश्च। इति सकाराध्याहारेण सच्छेदः। प्राणापानौ मे पाहि का मा व्ले
लास्य रान्नव धा गोपुष्टोपकृनिष्टिकाभ्यो ष्टिं गृहीत्वा ब्रह्मभागे निदध्यात्। अन्येनांगेनास्यग्रान्नवजिघ्रेत्। अन्वा ३१

हार्य प्राणापानावित्यादिना। शिष्टं पुरस्तात्कं गात्रं इत्यर्थः। तस्मात्प्रमन्वाहार्यात् गृहीत्वा ब्रह्मभागे निदध्यात्। ब्रह्म
न्प्रस्थास्याम इति श्रुत्वा बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्ट बृहस्पते यज्ञं मजगुपः स यज्ञं पाहि स यज्ञपतिं पाहि स मां पा
ह्यध्वर्युमं च पाठः प्रस्थास्यामः प्रस्थास्यामीति वा श्रुत्वा प्रतिष्ठस्वेत्यनुज्ञावचनं ब्रूयादित्येवमर्थः। भूर्भुवः स्वर्बृ
हस्पतिप्रसूत इति जपित्वा प्रतिष्ठेति समिधमनुजानीयात्। संस्थिते जघन्य ऋत्विक्सर्वप्रायश्चित्तानि जुहुयात्
तमितरेन्वालभेरन् भूर्भुवस्वरित्यादेः पाठः समनुज्ञार्थः। समिद्ग्रहणं समिधानानुज्ञानमपि सत्प्रतिष्ठेत्येवं रू
पमेव भवति। नाथेहीत्येवं रूपं। ऋत्विजां कर्मसु संस्थितेषूपरतेषु अनुपरते यजमानकर्मणि जघन्यः सन् सर्वप्रा
यश्चित्तानि जुहुयात्। अत्राग्नीध्रो न्वारभेत ब्रह्मणो बहुवचनं विकृत्यर्थं। होतारं वा। होतारं वेतरेन्वालभेरन्। एतयोर्नि
त्यहोमः। होम एवैतयोः कार्यो नान्वारंभः परस्परमित्यर्थः। सर्वे संस्था जपेनोपतिष्ठंत उपतिष्ठंते। सर्वे होमकर्तारो
न्वारंभकर्तारश्चेत्यर्थः। इत्याश्वलायनश्रौतसूत्रवृत्तौ प्रथमोध्यायः॥१॥ ॐ पौर्णमासेनेष्टिपशुसोमा उपदिष्टाः ;

Indira Gandhi National
Centre for the Arts

प्रथमेध्याये दर्शपूर्णमासौ व्याख्यातौ विध्यंतसहितौ। तदुत्तरत्र पशवः पशवश्च वक्ष्यंते विध्यंतरहिताः। तेषां च विध्यं
३२ तापेक्षास्ति। यथाह। नहि तत्करणं लोके वेदे वा किंचिदीदृशं। इतिकर्तव्यतासाध्यं यस्य नानुग्रहेर्थितेति। एवं च तद
पेक्षायां सत्यां तदपि वैदिकमेव श्रौतमेवेत्यपि सिद्धम्। श्रौतेषु चाग्निहोत्रिकदार्शपौर्णमासिकसौमिकेषु त्रिषु सत्स्वपि
दमिति विध्यंतविशेषग्रहणे चोदनासामान्यं स्वरूपसामान्यं चमुक्त्वान्यस्य विशेषलिंगस्याभावात्तैर्विशेषलिं
गैर्विध्यंतविशेषः परिगृह्यते। तानीमानि विध्यंतविशेषग्रहणलिंगानि। निर्वपेत्तद्धितश्चाज्यमौषधत्वं पयो दधि
।कपालानि च तत्संख्या देवताशब्द एव च। तस्मिन्नक्षरसंख्या च तद्धि चैकवत्क्वापि। द्रव्यं तं प्राकृतः शब्दो हविषः
प्रभवादि च। एतद्ब्राह्मणशब्दश्च तद्धितेषु प्रदेशनं। नामधेयं तथाऽप्यक्तचोदना चान्यदीदृशं। लिंगान्येतानि चा
न्यानि गुरूणि च लघूनि च। समीक्ष्य प्रकृतिश्चेयं विकृतिश्चेति कल्पना। द्रव्यदेवतयोर्यत्र विरोधस्तत्र निश्चये। तत्र ३२
द्रव्यं बलीयः स्याद्देवताया इति स्थितिः। यत्र सर्वासामिष्टीनां दर्शपूर्णमासौ प्रकृती तत्र विशेषलिंगात्कासांचि

द्दर्शः प्रकृतिः कासांचित्पौर्णमासी इत्येवं समीक्ष्य व्यवस्था कल्पनीया। एवं सर्वेषां पशूनां दर्शपूर्णमासावेव प्रकृती।
तद्धितादिविशेषलिंगात् अग्नीषोमीयस्य पशोरन्येषां च। अत्र न्यायविद आहुः। अग्नीषोमीयस्य पशोर्दर्शपूर्ण
मासौ प्रकृती। नान्येषां पशूनां। स चातिदेशिकैरौपदेशिकैश्च संबद्धोऽन्येषां पशूनां प्रकृतिः। एवं सत्युपकारप्रा
प्तिरखंडिता भवतीति समस्तमेषां न्यायविदां स्थितिः। किंत्वत्र कल्पसूत्रकाराणामेवं प्रवृत्तिः। सर्वेषु पशुषु दार्शपौर्ण
मासिको विध्यंतो दर्शपूर्णमासाभ्यामेव प्राप्नोति। अग्नीषोमीयाच्च पशोः पाशुक इति। अत एवास्मिं सूत्रेऽग्नीषो
मीयशब्दमनुक्त्वा पशुसामान्यवाचिनं पशुशब्दमेव प्रयुक्तवानाचार्यः। तेनैवायमतिदेशः सर्वेषां पशूनामाग्नीषो
मीयस्यैवेति गम्यते। अत एव भाष्यकारः अथ सवनीयेन तस्मिंस्तस्यैव देवताग्रहणस्येदं प्रयोजनमुक्तवान्। अ
नुक्तदेवतानामपि पशूनां सवनीयत्वप्राप्तौ तेषामपि समाम्नातत्वं भवतीति। समाम्नातत्वे च वार्त्रघ्नाज्यभागस्य
लाभः प्रयोजनं नान्यत्। अतः सर्वपशूनामतिदेश इति सिद्धं। तत्राग्नेयउपांशुयाजोऽग्नीषोमीय इति पूर्णमास

Indira Gandhi National Centre for the Arts

संज्ञका यागाः। आग्नेयउपांशुयाजऐंद्राग्नइत्यसंनयतो मावास्यायां। संनयतऐंद्राग्नस्य स्थाने ऐंद्रोमहेंद्रोवादधिप
३३ यसीइति। तयोः समुदाययोः पौर्णमास्यमावास्यानामनीभवतः। अनयोस्तंत्रं साधारणं। एतावानेवभेदः प्रधान
देवताः आज्यभागयोरनुवाक्ये च। यत्र प्रधानदेवताविकृतिषु प्रसक्तास्तत्रातिदेशव्यापारो नास्ति। अतः परिशे
ष्यादाज्यभागानुवाक्ययोरेवातिदेशः फलति। एवं स्थितेऽस्मिं छास्त्रे समाम्नाता इत्ययः पशावश्वस्य प्रकरणे
विशेषिताज्यभागाः चत्तेषां मध्ये केषांचिद्वचनाद्वार्त्रघ्नाज्यभागतां मत्वा तदुपदेशार्थमेतत्सूत्रं प्रणीतवानाचार्यः।
तस्यायमर्थः। उपदिष्टाः समाम्नाता इत्यर्थः। अनुवादत्वेन चायं शब्दः संबध्यते। अतोयमर्थः सूत्रस्य। यस्मिं छा
स्त्रे उपदिष्टा इत्यमः पशावश्वापि अविशेषिता आज्यभागास्ते सर्वे वार्त्रघ्नाज्यभागा इति। पौर्णमासेनेत्यस्यायम
र्थः। पौर्णमासेन व्याख्याता इति। वार्त्रघ्नाज्यभागा इत्यर्थः। तेन। समाम्नातानामिष्टीनां पशूनां च न्यायादेवतंत्र ३३
नियमः सिद्धो भवति। तथा चोक्तमिष्ट्ययनप्रकरणे। असमाम्नातास्वर्थात्तंत्रविकार इति। तच्चपशूनामपि प्रदर्श

नार्थत्वेनोक्तमिति द्रष्टव्यं। सोमग्रहणमुत्तरार्थं। अत्रापि किंचित्प्रयोजनमस्ति। याज्याधर्मानिरसनाद्ययश्चैवं
प्रकाराः श्रुतावनारभ्याधीता अप्यस्मिं छास्त्रे दर्शपूर्णमासप्रकरणे विहितास्तेषां प्रापणाये ति। तैरमावास्यायां
पौर्णमास्यां वा यजेत। तैरिष्टिपशुसोमैरमावास्यायां पौर्णमास्यां वा यागः कर्तव्य इति इष्टिपशूनां प्रकृति प्राप्त एवा
यं कालः पुनर्विधीयते। छ्यहकालतां निवर्त्य सद्यस्कालताप्राप्त्यर्थं। किंच दर्शप्रकृतेरमावास्यायां पौर्णमास प्रकृतेः
पौर्णमास्यामेवं नियमं निवर्त्य अनियमेन उभयकालताप्राप्त्यर्थं प्रकृत्यविरोधात्पर्वणस्तद्वदहोरात्रे विकृतिः कर्त
व्या यदाह्नः पूर्वभागे पर्व स्यात्तदा प्रकृतिं कृत्वा विकृतिः कार्या। यदापरभागे रात्रौ वा तदा विकृतिं कृत्वा प्रकृतिः कार्ये
ति। सोमस्यायमप्राप्तः कालो विधीयते। इत्यादि शब्दसंबंधादेवयजेतेत्यपि सिद्ध्यजेतेति वचनं सोमस्य याग एवान
योः कालयोः संपादनीयो नान्यदीक्षादीनि। राजन्यश्चाग्निहोत्रं जुहुयात्। क्षत्रियस्याग्निहोत्रहोमः पर्वणोरेव
कर्तव्यो नान्यस्मिन्काल इति। च शब्दाद्वैश्योप्यनयोरेव कालयोरग्निहोत्रं जुहुयात्। नान्यस्मिन्निस्यवगम्यते।

Indira Gandhi National
Centre for the Arts

कथमनयोरन्यस्मिन्काल इत्याह। तपस्विने ब्राह्मणायेतरं कालं भक्तमुपहरेत्। तपसा कर्मनिरतस्तस्मै ब्राह्मणा
३४ य। अतपस्विनेपि ब्राह्मणायैव दद्यात्। न जातु अन्तरायतपस्विने पीति। इतरं कालमिति। इतरेषु सर्वेष्वग्निहोत्रकाले
ष्वित्यर्थः। भक्तमुपहरेत् भक्तं पक्वौदनं। पक्वान्नमुपहरेद्दद्यात्। एतदुक्तं भवति। राजन्यवैश्ययोः पर्वण्यग्निहोत्र
कालद्वये वर्जयित्वा इतरेषु कालेषु ब्राह्मणायौदनं दातव्यं। न होमः कर्तव्य इति। अग्निधारणं तु क्रियत एव। क्र
तसत्यशीलः सोमसु सदा जुहुयात्। क्रतं वाङ्मनसयोः सत्यत्वं। सत्यं वा च एव। क्रतसत्यस्वभावः सोमयाजी
च यः क्षत्रियो वैश्यो वा स सदा जुहुयादग्निहोत्रं न पर्वणोरेव। क्रतशब्देनैव सत्यशब्दार्थे सिद्धे सत्यग्रहणं वाक्स
त्यस्वभावस्यापि सर्वदा होमसिध्यर्थं। बहुषु बहूनामनुदेशः आनंतर्ययोगः। समानानामिति शेषः। अनेकेषु वि
हितेषु तानुद्दिश्यानेकेषां समानानामनुदेशे पश्चाद्विधाने सत्यानंतर्ययोगः क्रमेण संबंधः स्यादित्यर्थः। द्वे द्वे ३४
सुयाज्यानुवाक्ये। याज्यानुवाक्ययोर्देवताभिरेवं आनंतर्ययोगो भवति। एकस्या एकस्या देवताया द्वाभ्यां द्वाभ्याम

भ्यां नैकैकस्या एकैकयेति। अदृष्टादेशो नित्यः। यदि क्वचिदनेका देवताविधायकस्याश्च देवतायास्तल्लिंगयोर्या
ज्यानुवाक्ययोर्विधिं न कुर्यात्। तदा नित्य गृहीतव्य इत्येकोर्थः। अयमप्यपरोर्थः। गृहीतत्वात्पुनस्ताभ्यां विहि
ताभिश्च सह देवताभिरानंतर्ययोग इति। आदेशो विधिरित्यर्थः। नित्य उक्त इत्यर्थः। अग्न्याधेयं। अग्न्याधेयप्र
भृति तत्कर्मणामनुष्ठानस्योक्तं अनुष्ठानक्रमेणैव व्याख्यानमपीत्युक्तं। तत्रोपोद्घातात् दर्शपूर्णमासौ व्याख्या
तौ। तत्प्रसंगादतिदेशस्तत्प्रसंगात्कालविधिः। तत्प्रसंगादेवाग्निहोत्रहोमप्रकारविधिः परिभाषाप्रसंगात्क
थंचिदानंतर्ययोगविधिः। सूत्रत्रयेणैवं गते सति प्रथमप्राप्तमाधानमुच्यते। विशिष्टकाले विशिष्टदेशे विशि
ष्टपुरुषेण विशिष्टमंत्रैर्गार्हपत्याद्यग्न्युत्पत्त्यर्थं यदंगारालोंनिधानं तदग्न्याधेयमुच्यते। अग्नीनामाधेयम
ग्न्याधेयं अग्न्याधेयं कर्तव्यमित्यर्थः। अस्मिन्काल इत्याह। कृत्तिकासु रोहिण्यां मृगशिरसि फल्गुनीषु वि
शाखयोरुत्तरयोः प्रोष्ठपदयोः। फल्गुनीष्विति पूर्वेउत्तरे च गृह्येते। अविशेषाद्बहुवचनाच्च। प्रोष्ठपदेत्युत्तरे

Indira Gandhi National
Centre for the Arts

व। अतः समेतानिनक्षत्राणितेषामेकस्मिन्नक्षत्रेग्न्याधेयंकर्तव्यमित्यर्थः।एतेषांकस्मिंश्चित्पर्वणि। ए
३५ तेषांकस्मिंश्चित्पर्वणिएवमेतत्सूत्रमर्थतो द्रष्टव्यं। उत्तरंचसूत्रं-वसंतेब्राह्मणआदधीतेति। एवंकृतेसर्वमनुगु पर्वणि
णंभवति। एतेषांनक्षत्राणांकस्मिंश्चिन्नक्षत्रेपर्वणिवाग्न्याधेयंकर्तव्यमितीदंसूत्रंपर्वनक्षत्रसमुच्चयमग्न्या
धेयस्यकालत्वेनविदधाति। पूर्वसूत्रंतकेवलंनक्षत्राणामेवाधानसंबंधंविदधाति। अतोद्वौपक्षौसूत्रः। तत्रस कौं...५
मुच्चयः प्रथमःकल्पः। तदसंभवेकेवलंनक्षत्रमेवेतिविनिवेशोयुक्तः। इदंपक्षद्वयंसोमाधानवर्जितेषुसर्वेष्वा
धानेषुभवति। वसंतेपर्वणिब्राह्मणआदधीत। इदमपिसूत्रमर्थतएवंभवति। अनेनवसंतेब्राह्मणगुणकमा
धानंविधीयते। ग्रीष्मवर्षाशरत्सुक्षत्रियवैश्योपकृष्टाः। वैश्यस्तक्षकर्मोपजीवीउपकृष्टइत्युच्यते। अस्मिं
न्सूत्रेत्रीण्याधानानिविधीयंते। ग्रीष्मेक्षत्रियगुणकं। वर्षासुवैश्यगुणकं। शरदिउपकृष्टगुणकंचेति। एतेवसं ३५
तादयः शब्दाऋतुवाचकाः। ऋतवोनामषट् वसंतग्रीष्मवर्षाशरद्धेमंतशिशिराः। तेचचैत्रमासमारभ्यद्वौद्वौमासा

एवीवांद्रमासाः

ऋतवोवसंतादयोमासाश्चैत्रादयएव। यस्मिन्कस्मिंश्चिद्दृतावादधीत। आदधीतेतिप्रकृतेपुनरादधीतेतिवचनं
आपत्कल्पोयमाधानविधिरितिदर्शयति। असंतापदिमुमुक्षोः सर्वेष्वृतुषुआधानंकर्तव्यं- नैवानाहिताग्निर्म्रियै
तेति। इदंचापरमाधानंपूर्वोक्तानिचत्वारितेषुसर्वेषुपर्वनक्षत्रविधयउपसंहर्तव्याः। नपर्वर्तुस्वातंत्र्येणाधानस्य
कालविधयोभवेयुः। अतएवचसूत्रकारः पर्वनक्षत्रविधीनामृतुविधिभिः संबंधानामेवाधानकालताप्रदर्श
नार्थमेव। एतेषांकस्मिंश्चिद्वसंतइतिपर्वनक्षत्रसमुच्चयविधीपरेसूत्रेपठितव्येपर्वशब्दंउत्तरसूत्रायपठि
तव्यंऋतुशब्दंव्यतिषज्यपठितवान्। पर्वनक्षत्रविध्योऋतुविध्युपसंहारेन्यायविरोधश्चनास्ति। तत्रैवतयोरं
तर्भावदर्शनादिति। सोमेनयक्ष्यमाणोनर्तुमृच्छेन्ननक्षत्रं। अद्यैवसोमेनयक्ष्यइतिसंकल्प्ययआधानमि
च्छेत्सआधानस्यकालंनापेक्षेतसोमोपक्रमकालएवादधीतेत्यर्थः। अयमपिमुख्यएवाधानकालः। ऋ
तुनक्षत्रनिरपेक्षवचनंपर्वणोरपिप्रदर्शनार्थं। अस्यचमूलंयदहरेवैनमितिश्रुतिः सोमाधानस्यविधायि

पे२

Indira Gandhi National
Centre for the Arts

पँगागापश्रेँ

का॰ नसोमस्य॰ तेनवसंतसंबंधित्वंसोमस्यनबाध्यते। इष्ट्युत्तरकालतातुबाध्यते। सोमाधानयोरानंतर्यंवि
धानादिति। अश्वत्थाच्छमीगर्भादरणी आहरेदनपेक्षमाणः। शम्याः गर्भः शमीगर्भः। तस्मादश्वत्थादरण्याहर
३६ णंकर्तव्यं। तच्चाधानार्थमाहरणे कृते अध्वर्युणा अरण्याहरणे क्रियमाणे तेनसहयजमानोप्यनेनमंत्रेणाहरे
त्। अनपेक्षमाणः पृष्ठतोनवेक्षमाणः। अयमपरोर्थः। कुर्यान्नकुर्यादितिनान्यदपेक्षमाणः। अध्यवसिता
धानइत्यर्थः। योअश्वत्थः शमीगर्भआरुरोहत्वेसचा। तंत्वाहरामिब्रह्मणायज्ञियैः केतुभिः सहेति। पूर्णाहुत्यंत
मग्न्याधेयं। पूर्णाहुतिरंतेयस्यतत्पूर्णाहुत्यंतं अग्न्याधेयंकर्तव्यमित्युक्तं। तच्चाग्न्याधेयमरण्याहरणादिपूर्णाहुत्यं
तं भवतीत्यर्थः। अस्यसूत्रस्य प्रयोजनं पूर्णाहुत्यंते आहिताग्निव्रतप्राप्तिः कथमितिचेत्॰ श्रुतावेवमाम्नातं।
अग्नयः पुरुषार्थसाध्याइतिप्रस्तुत्यवसंते ब्राह्मणोग्नीनादधीतेत्येवमादीनिवसंतादिकालानिब्राह्मणादिक ३६
र्तृकाणि। कर्तृगामिक्रियाफलयुक्तानिनिरधिकाराणि आधानानिविधाय ततो अरणी आहरेत्। संभारान्संभ

फलसमर्पकाणिआहिताग्नि

रेत्। अग्न्यायतनानिकुर्यात्। केशश्मश्रुवपते। ब्राह्मौदनिकं औपासनिकंनिदध्यात्। तस्मिन्ब्रह्मौदनंपचे
त्। समिधआदध्यात्। आयतनेषुसंभारान्निदध्यात्। ब्राह्मौदनिकमरण्योः समारोप्यमथित्वागार्हपत्या
दीनादध्यात्। तत्रकाश्चित्समिधआदध्यात्। अग्निहोत्रंजुहुयात्। पूर्णाहुतिंजुहुयात्। ततआग्नेयमष्टाकपा
लंनिर्वपेत्तदहरेव। तदहरादिसंवत्सरांतानांकालानांकस्मिंश्चित्कालेपवमानहवींषिनिर्वपेत्। ततश्चान्या
निहवींषीति। तथाहिताग्निः क्लिन्नंदारुनाभ्यादध्यात्। नानृतंवदेत्। इत्यादिआहिताग्निव्रतानिचाम्नातानि
। तथाग्निमतांयावज्जीवमग्निहोत्रादीनिनित्यनैमित्तिककाम्यानि कर्माणि तत्रतत्राम्नातानि। तत्रकस्मिन्न
वसरेआहिताग्निव्रतप्राप्तिः कस्मिन्नवसरेअग्निहोत्रादीनामारंभइति॰ तद्विवेकार्थमिदंसूत्रद्वयं। तत्रपूर्वेण
सूत्रेणश्रुत्यादिभिः प्रकरणरहितैः पंचभिः प्रमाणैर्यावंतः पदार्थाआधानविधिनासंबध्यंते तावत्सुसमाप्ते
ष्वाधानसमाप्तिः। आधानसमाप्तौ चाहिताग्निव्रतप्राप्तिरित्येतत्प्रतिपादयितुं पूर्णाहुत्यंतमग्न्याधेयमित्युक्तं

श्रुति॰ लिंग॰ वाक्य॰ स्थान॰ समाख्या॰

Indira Gandhi National
Centre for the Arts

वाना चार्यः। उत्तरेण चाग्निहोत्राद्यारंभकालं प्रतिपादितवान्। यदित्विष्टयस्तनुयुः अग्नीनेवेतिवाक्यशेषः।
३० यद्यनधिकारत्वादाधाननिषेधविनियोजकस्य प्रकरणस्याप्यारंभवादाधानागमिष्टयो न स्युः इष्टीनां चान
धिकारत्वादिष्टं गमाधानं न स्यात्। तथापि न कश्चिद्दोषः। अन्यार्थत्वेनैवोभयोरप्यनुष्ठानसिद्धेः। नन्विष्टीना
मग्निसंबंधाभावादन्यार्थतानसंभवतीति चेत्। न। यदाहवनीये जुह्वतीति एवमादिभिरग्निसंबंधोस्ति। नन्वे
षसंबंधः साधनत्वेन न दृश्यते। सत्यमेव न दृश्यते। तथाप्याहवनीयादिष्वग्निषु साध्यत्वबुद्धेरनुवर्तमानत्वा
दन्यस्य च साध्यस्यानवगमाद्ग्निसंनिधापेनाग्नय एवेष्टिभिः साध्या इत्येवमाश्रयितुं युक्तं आनर्थक्याश्रयणाद
धिकारांतरकल्पनाश्रयणं ज्यायः इति। तत्राधाने नेष्टिभिश्चाग्निसिद्धिर्भवति। न तयोरन्यतरेण। तेन सिद्धमग्निहो ३१
त्रादीनामग्निसाध्यानामिष्टिभ्य उत्तरकाल एवारंभ इति। अस्मिन्नर्थे एषा सूत्रयोजना। यद्यप्यासामिष्टीना
माधानांगता न स्यात्तथाप्याहवनीयाद्यग्निसंबंधान्नेवाग्नीनिष्टयस्तनुयुः। विस्तारयेयुः कुर्युः साधयेयुरित्य

तृ

र्थः। तु शब्दस्तु आसामाधानादेर्भेदं विशेषं दर्शयति। आधानेनाग्नीनां साध्यत्वेन संबद्धानामेव साध्यत्वमिष्टिषु सा
धनत्वेन संबंधानामपि कल्पनागौरवभयात्साध्यत्वमिति विशेषं गृह्णीमः। एवं यद्याधानेनेष्टिभिश्चाग्नय
एवाग्नयः साध्या इति। अनधिकारिणां कथमनुष्ठानसिद्धिरिति न्यायविदामेष उपालंभो नास्माकं। अस्माकं तु
साध्यसाधनसंबंधेवगते तदर्थिनां कर्तृत्वेनावगतानां ब्राह्मणादीनामेव कथंचिदधिकारकल्पनयानुष्ठान
सिद्धिः। अथवानधिकारिणामनन्यशेषाणामपि तत्साधनसाध्यरूपेणोपकारकत्वेन काम्यश्रुतिप्रयुक्त्यैव
एवंविधानामनुष्ठानसिद्धिरित्यलमिति विस्तरेण। प्रथमायामग्निरग्निः पवमानः। प्रथमायामिष्टौ
देवतेअग्निरेव प्रथमः केवलः। द्वितीयः पवमानगुणकोग्निः केवलस्याग्नेर्निर्लेख एव। अग्न आयूंषि पव
से अग्ने पवस्व स्वपाः एते द्वितीयस्य पवमानगुणविशिष्टस्य। स हव्यवाळमर्त्योग्निर्होता पुरोहित इति स्विष्टकृतः
संयाज्ये इत्युक्ते सोविष्टकृती प्रतीयात्। सो विष्टकृतो याज्यानुवाक्ययोरग्नेर्चारनेन संयाज्ये इति संज्ञा विधीयते।

Indira Gandhi National
Centre for the Arts

सर्वत्रदेवतागमेनिसानामपायः। सर्वत्रेतिप्रकरणांतरेपीतिदर्शयति। देवतागमइत्यत्रसमासनिर्देशस्यतुल्य
३८ त्वाद्देवतायाः देवतयोर्देवतानांचाऽऽगमइत्येवंभवति। निसानांप्राकृतीनामित्यर्थः। अपायउद्धारइत्यर्थः। एतदु
क्तंभवति। विकृतौदेवतायाएकस्य। आगमेद्वयोर्वाबह्वीनांवागमेपिप्राकृतीनांसर्वासामुद्धारइति। यस्यांपुनर्वि
कृतौइष्टिनोदनंकृत्वादेवतानविदधातितत्रनोद्धारसप्राकृतीनांतंत्रताएवदेवताभवंतीत्यर्थः। यथाग्रदित्नःसो
मेनपशुनेष्ट्वावेत्यादौ। यास्विष्टकृतमंतराज्यभागौचताःस्तत्स्थाने। निसानामपायउक्तः। तत्रकिंसर्वानिसाउद्ध
र्तव्याउतकाश्चिद्देवताइत्येतंसंशयंनिवर्तयतिआज्यभागौस्विष्टकृतंचांतरायादेवतायद्व्यास्ताउद्धर्तव्याः। याः
पुनर्विकृतौविहिताःतास्तत्स्थानेउद्धृतानांप्राकृतीनांस्थानेभवंतीति। तत्वचनात्। तद्धर्मिकाश्चभवंतीतिग ३८
म्यते। एषसमानजातिधर्मः। योयमुपदिष्टोविधिरेवदेवताभ्योन्यत्रापिससमानजातीयेषुभवति। समानजातीयए
ककार्याइत्यर्थः। द्वितीयस्यांवृधन्वंतौ। अग्निःपावकोग्निःशुचिःसनःपावकदीदिवोग्नेपावकरोचिषा। अग्निः

शुचिव्रततमउदग्नेशुचयस्तव। एकःपावकगुणोग्निः। अपरःशुचिगुणकः। साकान्निश्चाअभियुजोग्निमी
ळेपुरोहितमितिसंयाज्ये। तृतीयस्यांसामिधेन्यावावपतेप्रागुपोत्तमायाःपृथुपाजाअमर्त्यइतिद्वे। आवपतइतिवचना
त्। अधिकेएतेसामिधेन्योभवतः। प्रथमायांद्वितीयस्यांतृतीयस्यामितिवचनंचस्यामिष्टौयत्तंत्रेविहितंतस्यामेक
देवतायामपितत्तंत्रंभवति। नयथोक्तनानादेवतायामेवेति। धाय्येइत्युक्तएतेप्रतीयात्सुष्टिमंतावग्निनारयिमश्नव
द्यस्यानोअमीवहेति। अग्नीषोमाविंद्राग्नीविष्णुरितिवैकल्पिकानि। त्रयाणामेकोगृह्यते। अदितिः। अदितिश्च
न्या। अस्यांद्वेदेवते। उतत्वामदितेमहिमहीमषुमातरंसुव्रतानाम्। तस्यपत्नीमवसेहुवेम। तुविक्षत्रामजरंतीमुरू
चींसुशर्माणमदितिंसुप्रणीतिं। एषाकल्पजा। प्रेद्धोअग्नइमोअग्नइतिसंयाज्येविराजाविसुक्तएतेप्रतीयात्। इ
तितिस्रः। इत्येतास्तिस्रइष्टयोनुक्रांताइत्यर्थः। उक्तानुकीर्तनमुत्तरार्थं। यदाग्नेयत्तमेवैवस्याताम्। द्यावेतिपक्षस्तदा
पितिसृणामिष्टीनांयावत्योदेवतास्ताःसर्वायष्टव्याइत्येवमर्थं। आद्योत्तमपक्षेमध्यमायांयेदेवतेतेआद्यायामे

Indira Gandhi National
Centre for the Arts

वप्रक्षेप्तव्ये। यदा पुनराद्यैव तदा सर्वा देवता आद्यायामेव प्रक्षेप्तव्या इत्येवमर्थः। आद्यो नमेवैवस्यातां। इष्टी इति शेषः।
३९ आद्यावा। आद्यैवेष्टिर्भवतीत्यर्थः। तथा सति तस्यामेव धाय्ये विराजौ। यदाद्यैव भवति तदा द्वितीयतृतीययोरपि गौं
देवतास्तत्र भवंतीत्युक्तं। अतस्तस्यामेव धाय्ये विराजौ च भवतः। धाय्याविराजोमनुप्रवेशस्य निमित्तं तृतीयस्या इ
ष्टेर्देवतानुप्रवेश इत्येवमर्थं तथा सतीत्युक्तं॥ इति मात्रे विकारे वैराजतंत्रेति प्रतीयात्। पौर्णमासतंत्रायामिष्टौ धा
य्या विराण्मात्रे विकारे सन्निसेष्टिर्वैराजतंत्रेति। वेदितव्या। आधानाद्द्वादशरात्रमजस्रः। अत्राधानमिष्टी स्त्री
त्का आधानादूर्ध्वं द्वादशरात्रमजस्र इत्युक्तं। तस्यायमभिप्रायः। यावता कर्मसमुदायेनाग्नीनां सिद्धिर्भवति तावतः
कर्मसमुदायस्याधानशब्दो वाचक इति ज्ञापयितुं। तेनाग्न्याधेयं पुनराधेयं वेत्यत्र सेष्टिकस्याधानस्य ग्रहणं भव ३९
तीति सिद्धं। आधानेनेष्टिभिश्च सिद्धा अग्नयो द्वादशाहोरात्राणि सर्वे स्वरूपेणैव धार्यंते। एतदजस्रधारणमग्नि
होत्रपूर्वमेवाधाने भवति। अग्निहोत्रस्यैवानंतरमुच्यमानत्वात्। अनुष्ठानक्रमेणैव कर्मणां व्याख्यानमित्युक्त

त्वाच्च। इष्टिपूर्वे सोमपूर्वे च शास्त्रांतराण्यालोच्य विचारणीयं। तत्रायं विचारः। इष्टिपूर्वेऽजस्रधारणं नास्ति।
आपस्तंबवचनात्। अन्वमाहवनीयं प्रणीयाग्नीनन्वादधातीति। इत्यर्थतयान्यस्य प्रणयनस्य विधानात्। अ
पवृज्य श्वोभूते पौर्णमासेन यजेत इति अपवर्जनविधानाच्च। तथा सोमपूर्वेऽपि नास्ति। तस्माद्दीक्षितो द्वादशाहम
लिंतन्वीतेति। प्रकृतौ द्वादशादीक्षानियमादुपसद्भिः सुत्यया च सह षोडशाहानि प्रकृतेः कालः। अजस्रधारणं
तु द्वादशाहपरिच्छिन्नं। सोममध्ये विहरणस्य चासंभवः। दीक्षणीयासंस्कृतेष्वेवाग्निषु सोमयागविधानात्। अ
त इष्टिपूर्वे सोमपूर्वे चाजस्रधारणं नास्तीति सिद्धं। अग्निहोत्रपूर्वेऽपि यदा वाजिष्टिकाला द्वादशाहानि न पूर्यंते
तदा कथं तत्रैते पक्षाः। अजस्रेष्विष्टिकरणं। इष्टिलोपः। यथासंभवमजस्रधारणं। अजस्रलोप इति। तत्र य
थासंभवमजस्रधारणमिति पक्षो दुराश्रयः। तथाविध्यभावात्। द्वादशाहकालविशिष्ट एवासौ विधिः श्रूय
ते। नान्यकालविशिष्ट इति। तथेष्टिलोपपक्षोऽपि न संभवति। अग्निमन्नामां सिद्धमां पौर्णमासकाल आगते।

Indira Gandhi National
Centre for the Arts

तदनारंभे प्रमाणाभावात्। अक्रियायां प्रायश्चित्तोपदेशाच्च। एवं चेदजस्रेष्वेव पौर्णमासी भवतु को दोषः। उक्तो दो
षः। स्वार्थ एव प्रणीतेन्वाधानदर्शनात्। अपवर्जनविधानाच्चेति। नन्वग्निहोत्रमपि स्वार्थ एव प्रणीत आहवनी
४० ये भवति। अर्थायार्थायाग्निं प्रणयतीत्यस्याविशिष्टत्वात्। सत्यमविशिष्टं। तथाप्याधानानंतरधारणविधेः
प्रवृत्तत्वात्। तदवस्थेष्वेवाग्निष्वग्निहोत्राधिकारस्य प्राप्तस्य त्यागे प्रमाणाभावात्। तेष्वेवाग्निहोत्रे होमो युक्तः।
एतमेवन्यायमनुसृत्योक्तं भगवता बौधायनेन। द्वादशाहमजस्रेष्वग्निषु यजमानः स्वयमग्निहोत्रं जुहुयादि
ति। यथा प्रणीते चेदग्निहोत्रकाल एतस्मिन्नेवाग्निहोत्रं जुहुयादेवमन्यत्रापि प्रक्रांतेतंत्र इति। अग्निहोत्र
स्यान्यार्थेष्वपि प्रवृत्तिदर्शनान्नात्रायं दोष इति गम्यते। अतः अग्निहोत्रस्यान्यार्थेष्वपि प्रवृत्तिदर्शनादाधाना ४०
नंतरमग्निहोत्रस्यानन्यार्थाहवनीयासंभवात्। अजस्रेष्वेवाग्निहोत्रहोमो न विरुध्यते। पौर्णमास्याः
पुनर्द्वादशाहोत्तरकालवर्तिन्याः स्वार्थाहवनीयसंभवादजस्रेषु तस्याः प्रवृत्तिर्विरुध्यते। अतोजस्रेष्वि



ष्टिकरणमित्ययमपि पक्षो न संभवति। नन्वजस्रलोपपक्षेप्याधानात् द्वादशरात्रमजस्रा इति नित्यवदाम्ना
नं विरुध्यते। न विरुध्यते। अस्य नित्यत्वासंभवात्। उक्तं हि इष्टिपूर्वे सोमपूर्वे वा प्रवृत्तिकरणमिति। तस्मादस्य वि
ध्यंतरानुपरोधेन प्रवृत्तिदर्शनात्। अकरणे प्रायश्चित्तानाम्नानात्। अस्मिन्विषयेऽजस्रलोप एव श्रेयानिति व
क्तुं युक्तं। अस्यं तेनु गतश्रियः। अस्येतं यावज्जीवमित्यर्थः। त्रयो वै गतश्रियं इति श्रुता युक्ताः। गतश्रीणामग्न
यो यावज्जीवमजस्रा भवंति। न द्वादशाहमेवेति। द्वितीये प्रथमः खंडः।।१।। उत्सर्गे पराह्णे गार्हपत्यं प्रज्वल्य दक्षिणा
ग्निमानीय विदुलादि तवतो वैकयोनम इत्येके ध्रियमाणं वा प्रज्वल्यारणिमंतं वा मथित्वा गार्हपत्यादाहवनीयं
ज्वलंतमुद्धरेत्। उत्सर्गे अजस्रोत्सर्गे अग्निहोत्रहोमार्थं विहरेत्। नाजस्रेषु होमस्त्वजस्रेष्वपि भवतीत्युक्तं। एवं
स्थिते विहरणसहितमग्निहोत्रहोमप्रयोगं वक्तुकाम उत्सर्ग इत्युक्तवान्। अत्रापराह्णशब्देन अहश्चतुर्थो भागो
गृह्यते विहरणकाले गार्हपत्यं प्रादुष्कृत्य प्रज्वाल्य च दक्षिणाग्निं वैश्य गृहाद्वानयेत्। चतुर्णां वर्णानामन्यतम
स्य द्रव्यवतो वा गृहात्। गार्हपत्याद्वा। नित्यधार्यश्चेत्प्रज्वलयेत्। काले काले यदि निर्मथ्यस्तदा मंथेत्। एषां प्रका

Indira Gandhi National
Centre for the Arts

राणामुत्पत्तिवत्ता व्यवस्था। तेषामन्यतमेन प्रकारेण दक्षिणाग्निं साधयित्वा ततो गार्हपत्यात् ज्वलंतमग्निमाह
वनीयार्थमुद्धरेत्। पात्रांतरेण पृथक् कुर्यादित्यर्थः। देवं त्वा देवेभ्यः श्रिया उद्धरामीत्युद्धरेत्। अनेन मंत्रेणाग्निहोत्रार्थ
मुद्धरेत्। पर्युक्ष्योद्धरेदिति वचनस्येदं प्रयोजनं। गार्हपत्यं प्रज्वल्य तस्मादाहवनीयं ज्वलंतमुद्धरेदित्यंतस्य मंत्रवर्जितोद्ध
रणप्रकारस्य सर्वार्थत्वज्ञापनं। एवं सर्वार्थमुद्धरणं विदधतैतत् साधितं भवति। येनाग्निना यत्र प्रयोजनं तत्र तस्यो
द्धरणं कर्तव्यमिति। शास्त्रांतरे स्पष्टं वचनमस्ति। अर्थायार्थायाग्निं प्रणयतीति। उद्धरणमंत्रो यमग्निहोत्र एव
नान्यत्रेति सिद्धं। उध्रियमाण उद्धरपाप्मनो मा यदविद्वान्यच्च विद्वांश्चकार। अह्नायदेनः कृतमस्ति किंचित्सर्वस्मा
न्मोद्धृतः पाहि तस्मादिति प्रणयेत्। प्रणयेत् आदुर्येत्। अग्निं आहवनीयदेशं प्रत्यनेन मंत्रेण। अमृताहुतिममृता
यां जुहोम्यग्निं पृथिव्याममृतस्य योनौ। तयानंतं काममहं जयानि प्रजापतिः प्रथमो यं जिगाय्याग्नावग्निः स्वाहे
ति निदध्यात्। दिसमभिमुखः। आदित्याभिमुखो भूत्वानेन मंत्रेणाहवनीयायतनेग्निं निदध्यादित्यर्थः। एवं प्रात
र्व्युष्टायां तमेवाभिमुखः। एवमेव प्रातर्होमार्थमप्यादित आरभ्य निधानांतं कुर्यात्। तमेवाभिमुखो निधीयमा ४२

३

नमाहवनीयमेवाभिमुख इत्यर्थः। एवं सति प्रातःकाले आहवनीयायतनात् पश्चात् स्थितेन निधानं भवति। सायं
तु पुरस्तात् स्थितेन। व्युष्टायामुषसि उदितायामादित्योदयात् प्राक्। रात्र्यायदेन इति तु प्रणयेत्। प्रणयनमंत्रे अ
ह्नायदेन इत्यस्य स्थाने रात्र्यायदेन इत्येतत् तु कर्तव्यं प्रातःकाले। अत ऊर्ध्वमाहिताग्निर्व्रतचारी होमात्। सच्चि
धर्मी स्यात् तु मीस्य व्रतानि अत्र व्रतशब्देनोच्यंते। विहरणादूर्ध्वमग्निहोत्रहोमप्रयोगसमाप्तेर्व्रतचारी भव
त्याहिताग्निः। अनुदितहोमी चोदयात्। अनुदितहोमी चेत् प्रागुदयात् समाप्तेपि प्रयोगे आ उदयात् व्रतचारी भवे
त्। अस्तमिते होमः। अस्तमिते होमः कर्तव्यः। अंगान्यपि प्रधानकाले कर्तव्यानि यत्तु नरंगं विहरणवत्स्व
कालविशिष्टं तत् स्वकाल एव कर्तव्यं। नित्यमाचमनं। उक्तं प्राङ्मुखस्याचमनं यत्पुरस्तात् तदिदानीं कर्तव्यमसं
गत्वाय। ऋतं सत्येन त्वा पर्युक्षामीति जपित्वा पर्युक्षेत् त्रिस्त्रिरेकैकं पुनः पुनरुदकमादाय। पर्युक्षणमंत्रेपि
जपित्वा पर्युक्षेदिति पृथक् क्रियते। पर्युक्षणानि दिष्टे परिसमूहने मंत्रो माभूदिति। त्रिरेकैकमित्येतावदेवए

क्ष

४२ कैकस्याग्नेस्त्रिस्त्रिः पर्युक्षणे सिद्धे त्रिस्त्रिरिति वीप्सावचनं समस्यापि त्रिरावृत्तिर्भवतीत्येवमर्थं ।। उनः पुनरुदक
मादायेति वचनं सकृद्गृहीतेन त्रिः पर्युक्षेदित्येवमर्थं । आनंतर्येति विकल्पः । अग्नीनां पर्युक्षणादिषु कर्तव्ये
षु केनानंतर्येण कर्तव्या इत्यानंतर्यविशेषे ज्ञातव्ये नेन सूत्रेणाग्नीनामुत्पत्तिक्रमस्य होमक्रमस्य च विकल्पो
विधीयते । दक्षिणं लेव प्रथमं विज्ञायते पिता वा एषोऽग्नीनां यद्दक्षिणः पुत्रो गार्हपत्यः पौत्र आहवनीयस्तस्मादे
वं पर्युक्षेत् । पर्युक्षणे अयमेव क्रमः । दक्षिणाग्निं गार्हपत्यमाहवनीयमिति । तत्र श्रुतिमेव हेतुमुपन्यस्यतस्मा
देवं पर्युक्षेदित्युपसंहृतमनेन पर्युक्षणातिदिष्टे च परिसमूहने यमेव क्रमः ।। अन्यत्र यथोक्तो विकल्पः ।। अत्र
विशेषः । प्रधानानां सर्वेषामुत्पत्तिक्रमः ।। परेषां प्रधानक्रम इति । गार्हपत्यादविच्छिन्नामुदकधारां हरेत् मंत्रं तु तन्तु ४२
न्त्रजसो भानुमन्विहीत्याहवनीयात् । अस्मा कारो मर्यादायामनुपद्यानविशेषात् । पश्चाद्गार्हपत्यस्योपविश्यो
दगंगारानपोहेत् सुहुत कृतस्य सुहुतं करिष्यामीति । पश्चाद्गार्हपत्यस्य लक्ष्मीमेव दक्षिणेनोत्तरेण पश्चेनोपविश्य

विहरणकालिको गार्हपत्यादिक्रमः २

गार्हपत्यात्कतिपयानंगारान् हविः श्रपणार्थमुदक्पृथक्कुर्यात् । तेष्वग्निहोत्रमधिश्रयेदधिश्रितमभ्याधिश्रि
तमधिश्रितेऽ इति । तेष्विति पृथक्कृतेष्वंगारेष्वित्यर्थः ।। अग्निहोत्रमिति अग्निहोत्रहोमसाधनभूतं द्रव्यमुप
येचते । इळा पास्यदघृतवच्चराचरं जातवेदो हविरिदं जुषस्व । ये ग्राम्याः पशवो विश्वरूपास्तेषां सप्तानां मयि पुष्टि
रस्त्विति वा । अनेन वा मंत्रेणाधिश्रयेत् पूर्वेण वेति विकल्पविधिः ।। न दध्याधिश्रयेत् अधिश्रयेदित्येके । दध्यधि
श्रयेन्न वेत्येतावतैव सिद्धे गुरुसूत्रकरणं न्यायविकल्पोऽयमिति प्रदर्शनार्थं । अत्रैके आचार्याः प्रवृत्तिपरत्वा
च्छास्त्रस्य कार्यस्य चातीन्द्रियत्वाद्दलोपमाहुः ।। आचार्यस्तु कार्यार्थत्वात्प्रवृत्तेः ।। कार्यस्य च दृष्टस्य त्यागे प्रमाणाभा
वात् । न दत्यागे संस्कार्यस्वरूपविनाशात् । संस्कार्यसंपादकत्वात्संस्कारस्य लोप एव श्रेयानिति स्यात् ।। २ ।। पयसानि
त्यहोमः ।। नित्यश्चासौ होमश्च नित्यहोमः ।। स पयसा कर्तव्यः ।। अकामस्याग्निहोत्रहोमः पयसा कर्तव्य इत्यर्थः ।।
कामानुपदेशादेकस्य नित्यत्वे सिद्धे नित्यग्रहणमुत्तरार्थं । यवागूरोदनो दधि सर्पिर्ग्रामकामान्नाद्यकामेंद्रियका

Indira Gandhi National
Centre for the Arts

मते जस्कामानां॥यथासंख्येन ग्रामकामादीनां यवाग्वादीन्यग्निहोत्रहोमद्रव्याणि भवंति। ग्रामः प्रसिद्धः। अ
४३ न्नं च तदाद्यं च अन्नाद्यं खाद्यं तत्काम इत्यर्थः। इंद्रियं शुक्रं चक्षुरादीनि वा तेजस्कुविः। नित्यहोम इत्यत्रा
पि संबध्यते। तेन पुरुषार्थैरपि क्रियमाणो होमो नित्य एव स्यान्न काम्यार्थः। होमाश्रितानि द्रव्याण्येव कामा
श्रितानि भवंतीति। अधिश्रितमवज्वलयेत्। अधिश्रितग्रहणात्। अधिश्रितमात्र एवावज्वलयेन्न कालवि
क्षेपः कर्तव्य इत्यवगम्यते। अनधिश्रयं दध्यग्निहोत्रे जोमाहार्षीरिति। न अधिश्रयो यस्य तत् अनधिश्र
यं। अधिश्रयरहितमपि दधि अवज्वलयेदित्यर्थः। सर्वत्रावज्वलनमंत्रोयं अग्निष्टे तेज इति। दधि चेत्येतावु
ते वसिष्ठेग्रुरुस्सूत्रकाणां दध्यादीनां व्रीह्यादीनामपक्वानां संग्रहार्थं। स्रुवेण प्रतिषिंच्यान्नवाशं तिरस्यम
तमसीति। पयसा होमे दोहनपात्रप्रक्षालनं स्रुव आनीयते न प्रतिषिंचेत्। अग्निहोत्रद्रव्ये। अन्यत्रोदके नैवशं ४३
तिरिति मंत्रेण। न वा प्रतिषेकः कर्तव्यः। तयोरव्यतिचारः। तयोः प्रतिषेकाप्रतिषेकयोरित्यर्थः। अव्यतिचा

रो संकरः। एकस्मिन्पुरुष इत्यर्थः। एकः सर्वदा प्रतिषिंचेत्। अपरः सर्वदा न प्रतिषिंचेदित्यर्थः। पुनर्ज्वलनाय
रिहरेत्त्रिरंतरितं रक्षोंतरिता अरातय इति। पुनर्वचनात्। ज्वलता येनोल्मुकेनावज्वलनं कृतं तेनैव परिहरणम
पि कुर्यादिति गम्यते। उल्मुकादानं गार्हपत्यादेवनश्रपणार्थात् श्रपणार्थं पृथक्कृतस्य पुनः प्रक्षेपविधानात्।
अन्यत्र कार्यार्थं पृथक्कृतस्य कार्ये परिसमाप्ते त्याग एव कर्तव्यः। येनावज्वलनार्थं पृथक्कृतं अवज्वलने कृते
पृथगेव निधायते नैव परिहरणमपि कृत्वा सजेत्। समुदंतं कर्षन्निवोदगुद्वासयेद्दिवे त्वांतरिक्षाय त्वा पृथिव्यै
उन्नीतः ४ त्वेति निदधत्। सम्यक् उद्गतः अंतो यस्य द्रव्यस्य तत्समुदंतं द्रव्यम्। परितः स्थालीसंबंधप्रदेशोंत इत्युच्य
ते यदा पच्यमानं पय एवमवस्थं भवेत्। तदा कर्षन्निवोदगुद्वासयेत्। कर्षन्निवेति मंदगत्येत्यर्थः। निदधदि
ति त्रिभिर्मंत्रैस्त्रिर्निधानं कुर्वन् अवतारयेत्। प्रथमद्वितीयाभ्यामाकाशे धृत्वा तृतीयेन भस्मनि निदध्या
त्। सुहुतकृतस्य सुहुतमकार्ष्टेत्यंगारानतिसृज्य स्रुक्स्रुवं प्रतितपेत् प्रत्युष्टं रक्षः प्रत्युष्टा अरातयो निष्ट

Indira Gandhi National
Centre for the Arts

प्रैरक्षो निरूढा अराता इति। अतिसर्गो गार्हपत्ये प्रक्षेपः। उत्तरतः स्थाल्याः स्रुचमासाद्योन्नयानीत्यस
५६ तिसर्जयीत। स्थाल्या उत्तरतः स्रुचमासाद्य स्रुवहस्त एव सन्नोन्नयानीत्यनेन मंत्रेणाहिताग्निमतिसर्जयेत्।
आहिताग्निराचम्यापरेण वेदिमतिव्रज्य दक्षिणत उपविश्यैतच्छुत्वोन्नयेत्यतिसृजेत्। विहरणकाल एवा
हिताग्निश्चाध्वर्युः पत्नी च स्नात्वा चम्य तीर्थेन प्रविशंति। तत्राध्वर्युर्विहरणं कृत्वा होमकाले प्राप्ते निष्क्रम्य
प्राङ्मुख उदङ्मुखो वा आचम्य तीर्थेनैव प्रविश्य पर्युक्षणादि कुर्वीत। पत्नी तु गार्हपत्यस्य दक्षिणत आस्ते हो
मकाले प्राप्ते निष्क्रम्याचम्या परिसमाप्तेस्तत्रैवास्ते। आहिताग्निश्चाहवनीयविहरणकाले दक्षिणत उपविश्य
उद्धृताहवनीयमित्यध्वर्युसंप्रैषमुक्त्वास्ते। ततो होमकाले प्राप्ते निष्क्रम्य प्राङ्मुख उदङ्मुखो वाचम्य तीर्थेन
प्रविश्यापरेण वेदिं देशं पूर्वेण गार्हपत्यं उत्तरेण दक्षिणाग्निं च गत्वा वेदेर्दक्षिणत उपविशेत्। उपविष्टः सं
नेतदतिसर्जनवाक्यं श्रुत्वोन्नयेत्यतिसृजेत्। अतिसृष्टो भरिकामुवद्द्वा स्वरिक्षावृध इत्येतिस्रुचपर ५५

मुन्नयेत्। अतिसृष्ट इति वचनं प्रवसति यजमाने सोनैवातिसृष्ट उन्नयेत्। नानतिसृष्टस्येवमर्थं। चत्वार
ते मंत्राः समस्ताः संसर्गाणां अतश्चतुष्कृत्व उन्नयेत्। स्रुवपूरमिति णमुल् प्रत्ययप्रयोगाच्च। अग्नियमन्ति
यमिति उन्नयनभेददर्शनाच्च। स्रुवपूरमिति स्रुवं पूरयित्वा पूरयित्वेत्यर्थः। अत्र पंचमस्यमंत्रस्याभा
वात्संचावत्तिनां तूष्णीमेव पंचममुन्नीयते। पुरुषविशेषधर्मत्वादवदानविशेषसंबंधस्य। अग्नियमग्नि
यं पूर्णतमं यो नु ज्येष्ठमद्दिमिच्छेत्सुत्राणां। योयजमानः पूर्वजानुसारेण आत्मनः पुत्राणामद्दितारतम्यमि
च्छेत्। तस्य पूर्वः पूर्वः पूर्णतमो भवेत् अनेकपुत्रस्यायं काम्यः कल्पः। न चतुःपुत्रस्यैव। यो स्य पुत्रः प्रियः
स्यात्तं प्रति पूर्णमुन्नयेत्। प्राकृतानामेव पंचानां चतुर्णां वा एकं स्रुवं प्रियं पुत्रं ध्यात्वा पूर्णमुन्नयेत्। अयमपि
काम्यः। अयमेकपुत्रस्यापि भवति। स्थालीमभिमृश्य समिधं स्रुचं चाध्यधि गार्हपत्यं हृत्वा प्राणसंमिता
माहवनीयसमीपे कुशेषु प्रसाद्य जानुन्याच्य समिधमादध्यात् इजतां त्वाग्निज्योतिषं रात्रिमिष्टका मुपदधे स्वा

देति। स्थाल्याः स्रुवेण स्रुच्युन्नयनं कृत्वा स्थालीमभिमर्श्य स्रुचा सह समिधं च गृहीत्वाध्यधि गार्हपत्यं गा
५५ र्हपत्यस्योपरि समीपं हृत्वा आहवनीयस्यनेदीयसि नातिकासे विलंहरेत्। हृत्वा तस्य पश्चाद् दूरे कुत्रोपप
सायद्दक्षिणं जानु निपात्य ततः समिधमादध्यात् एजतामिति मंत्रेण। समिधमाधायविद्युदसि विद्यमे पा
प्मानमग्नोऽग्रेद्रेत्य पउपस्पृश्य प्रदीप्तां द्व्यंगुलमात्रे अभिजुहुयात् भूर्भुवः स्वरोमग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति।
समिधमाधायेत्युच्यते समिदाधानधर्मस्य जानुनिपातनस्यानुवृत्त्यर्थं। समिधमाधायेत्यनेनैव समिद्ग्रह
णे न पूर्वसूत्रे आदध्यादित्येवोक्तेऽपि समिध एवाधाने सिद्धे यत्पूर्वसूत्रे समिद्ग्रहणं करोति तद् ज्ञापयति। य
त्र यत्र समिधमादध्यात्तत्र तत्र जान्वाच्यादध्यादिति। विद्युदसीत्यप उपस्पृश्य प्रदीप्तां समिधं मत्वा तो द्व्यं ४९
गुलमात्रे अभिजुहुयात्। भूर्भुवः स्वरोमिति मंत्रेण। पूर्वामाहुतिं हुत्वा कुशेषु सादयित्वा गार्हपत्यमवेक्षेत प
शून्मे यच्छेति। हुत्वेति वचनं निपातितजानुरेवोत्तरमपि कुर्यादित्येवमर्थं। पूर्वामिति वचनं पूर्वाहुत्युत्तर

कालीनं स्रुचं सादयित्वैव कुर्यात्। उत्तराहुत्युत्तरकालीनं स्रुग्धस्त एव कुर्यादित्येवमर्थं। अथोत्तरां तूष्णीं
भूयसीमसंसृष्टां प्रागुदगुत्तरतो वा। अथेत्यानंतर्यवचनेन पूर्वाहुत्युत्तराहुत्योः संबंधः क्रियते। तेन जान्वाच्य
स्यानुवृत्तिर्लभ्यते। आधान्यं चोत्तराहुतेः। अतः पूर्वाहुतौ हुतायां द्रव्यदोषे सति उत्तराहुत्यर्थं द्रव्यमुत्सादयित
व्यमेव। भूयसी पूर्वाहुतेर्भूयो द्रव्यं। असंसृष्टां पूर्वया हुत्वा प्रागुदक् पूर्वाहुतेरुत्तरतो वा तस्या एव। प्रजापतिं
मनसा ध्यायात्तूष्णीं होमेषु सर्वत्र। यत्र तत्तूष्णीं शब्दविशिष्टो होमो विद्यते। तत्र प्रजापतिं देवतां ध्यायेत्। देवता
साध्यत्वाद्धोमस्य। ध्यानत्वादेव मानसत्वे सिद्धे मनोग्रहणं शब्दध्यानार्थं। तेन चतुर्थ्यंतं प्रजापतिशब्दं ध्यात्वा त
दनंतरं स्वाहेत्युपांशूक्त्वा जुहुयात्। होमेष्विति बहुवचनादेव प्रकरणादुत्कर्षे सिद्धे सर्वत्र ग्रहणं गार्हपत्या
पादनार्थं। भूयिष्ठं स्रुचि शिष्ट्वाग्निरनुप्रकंप्यावमृज्य कुशमूलेष्वनिमार्ष्टि पशुभ्यस्त्वेति। उत्तराहुतेर्भूयो द्रव्यं
पूर्वाहुतेर्भूयिष्ठं यथा भवति तथा भक्षार्थं स्रुचि शेषयेत्। पूर्वाहुत्यर्थं प्रक्षिप्तात् द्रव्यादुत्तराहुत्यर्थं भूयो भ

Indira Gandhi National
Centre for the Arts

वति। तस्माद्‌पिभ्यो भक्षार्थं भवति। तत्पूर्वाहुत्यपेक्षया भूयिष्ठमित्युच्यते। भूयिष्ठं द्रव्यं स्रुचि शेषयित्वा स्रु
४६ चमेवाहुतिदेशस्थां प्रकंपयेत्। ततः स्रुगातले पेपाणिना धोमुखेनावमृज्य पाणिगतं लेपं कुशमूलेषु निमा
र्ष्टि निमृजेत्। पशुभ्यः स्वेति। तेषां दक्षिणतउत्ताना अंगुलीः करोति प्राचीनावीती तर्हि स्वधा पितृभ्य इति वा।
तेषां कुशमूलानां दक्षिणतउत्ताना अंगुलीर्निदध्यात्। प्राचीनावीती भूत्वा स्वधा पितृभ्य इति मंत्रेण तर्हि वा।
अपोवनिनीय। एतावदेवस्त्रं। अपृष्ठ्व कुशमूलानां दक्षिणतो निनयेत्। अवाचीनेन पाणिना। एतावत्स्रुग्ध
स्त[illegible] एव करोति। एवं वा तेषां दक्षिणतउत्ताना अंगुलीः करोति। प्राचीनावीती॰ निनीय। वृष्टिरसि
वृश्च मे पाप्मानमृत्सुष्ठ्वे स्पउपस्पृश्य। इदमपि सत्रमेतावदेव निधाय स्रुचमपउपस्पृशेत्। आहिताग्निरनु
मंत्रयेत। अधिकारोयं। आधानमुक्तोतेन ऋषिणा तेन ब्रह्मणा तया देवतयांगिरस्वद्ध्रुवासीदेति समिधं। ४६
समिदाधानमंत्रेण तेन ऋषियोस्तेनेन मंत्रेण च समिधमाधीयमानमनुमंत्रयते। ता अस्य सूददोहस इति प्

श्री माहुतिं। एतयर्चा पूर्वाहुतिमनुमंत्रयते। उपोत्थाय यो न रों कांक्षे तेक्षमाणो भूर्भुवः स्वः सुप्रजाः प्रजाभिः
स्यां सुवीरो वीरैः सुपोषः पोषेः इति काराध्याहारेणसत्रच्छेदः। उत्तराहुते हूयमानायादेशतः कालत
स्य समीपे स्थित्वा कटाक्षेणेक्षमाणस्तामेवाहुतिमनुमंत्रयते। कांक्षेत इत्यूहुः कटाक्षवचनः। केचिदु
त्तराहुतिमीक्षमाणोनुमंत्रयते। तन्मंत्राभिहितान्कामान्कांक्षेत चेन्निवर्णयंति। आग्नेयीभिश्च। याभिः
काभिश्चभ्ववस्तभिराग्नेयीभिरुत्तरामेवाहुतिमनुमंत्रयते। अग्न आयूंषि पवस इतिति स्तभिः। संवत्सरे
संवत्सरे। पूर्णे पूर्णे संवत्सरे एताभिरधिकाभिः सकृदनुमंत्रयेत्। यवाग्वा पयसा वास्वयं पर्वणि जुहुया
त्। यवाग्वा पयसा वा स्वयं पर्वणि पौर्णमास्याममावास्यायां च सायं प्रातर्यजमानः स्वयमेवाग्निहोत्रं
जुहुयात्। अस्मिन्सत्रे पर्वणि द्रव्यनियमः स्वयंकर्तृनियमश्च विधीयते। स्व मंहो मे समिध इत्यनुमंत्र्य
विद्युदसीति पूर्वामाहुतिमनुमंत्र्य॰ पशून्मे यच्छेत्युत्तरामाहुतिमनुमंत्र्य॰ वृष्टिरसीत्येवं क्रमो भवति। य

Indira Gandhi National
Centre for the Arts

त्किंचिदग्निहोत्रद्रव्यं काम्यं वैकल्पिकं वा प्रयुज्यते तस्यापमुपक्रम्य प्रातरपवर्गं प्रयुज्यते । नान्यथेति ।
४१ प्रविनिधिस्त्वेकप्रयोगपर्यवसाय्येव । ऋत्विजामेकं इतरं काले । ऋत्विजां मध्ये एकः कश्चिदृत्विगितरस्मि
न्काले ग्निहोत्रं जुहुयात् । अंतेवासी वा । इतरस्मिन्काले ग्निहोत्रं जुहुयादिति शेषः । अंते समीपे वसतीति इ
सं तेवासी स पुनः पुत्रः शिष्यो वा । अत्र किंचिदुच्यते । ऋत्विजस्त्रिविधाः । देवभृताः पितृभृताः मनुष्यभृता
इति । ये कर्मणि कर्मणि व्रियंते ते देवभृताः ये ऽन्वयगताः ऋत्विजः ते पितृभृताः ये एकस्य पुरुषस्य सर्वा
णि कर्माणि कर्तुं व्रियंते ते मनुष्यभृताः तत्र यस्याहिताग्नेः पितृभृता मनुष्यभृता वा ऋत्विजः संति । तेषा
मृत्विजामेकः कश्चित्सर्ववर्जितेषु कालेषु जुहुयात् । यस्य देवभृतास्तस्यांतेवास्येवेति विनिवेशः । स्रुक्छे
दकमुदकं वृत्य भक्षयेत् । उक्तमेवोदकस्य दर्शनं कृत्वा उदगावृत्य स्रुग्गतं शेषं भक्षयेत् । उक्तसंकीर्तन ४१
माहिताग्न्यधिकारे सत्यपि होमकर्तृज्ञापनार्थं । अपरयोर्वा हुत्वा । भक्षयेदिति शेषः । आयुषे त्वा प्राश्नामी

ति प्रथमं । अन्नाद्याय त्वेत्युत्तरं । प्रथममुत्तरमिति भक्षयोः संबंधकरणार्थं । तेनोत्तरस्यापि मंत्रस्य प्राश्ना
म्यंतता भवति । तूष्णीं समिधमाधायाग्नये गृहपतये स्वाहेति गार्हपत्ये । जुहुयादिति ध्याहारः तूष्णीं ग्रहण
माहवनीये समिदाधाने होमे च येधर्मास्तानुनिपातनं प्रदीप्ताभिहोमो ध्यंगुलाभिहोमश्चेतेषां प्राप्तिसूचनार्थं ।
नित्योत्तरा । उत्तराहुतिं तूष्णीं भूयसीमित्येवमुक्ते स्यर्थः । तूष्णीं समिधमाधायाग्नये संवेशपतये स्वाहेति द
क्षिणे । अग्नयेन्नादायान्नपतये स्वाहेति वा । मंत्रविकल्पोयं । नित्योत्तरा । गतार्थमेतत् । भक्षयित्वाप्यात्मनपः
स्रुचा निनयते त्रिः सर्पदेवजनेभ्यः स्वाहेति । भक्षयित्वेति वचनं भक्षणानंतरमेव निनयनमपि स्यादित्ये
वमर्थं । अप्यात्मनपः स्रुचा निनयते त्रिः अ संस्कारकर्मत्वान्मंत्रोपि त्रिरावर्तते । अथैनां कुशैः प्रक्षाल्य
चतसृः पूर्णीः प्रागुदीच्योर्निनयेदृतुभ्यः स्वाहा दिग्भ्यः स्वाहा सप्तऋषिभ्यः स्वाहेतरजनेभ्यः स्वाहेति । अथे
त्यप्यात्मनि निनयनानंतरमेव इदमपि कर्तव्यमिति दर्शयति । एनां स्रुचमित्यर्थः । विहारस्य प्रागुदग्देशे पू

Indira Gandhi National
Centre for the Arts

र्णोभ्युतस्रुचो निनयेत्। एकैकेन मंत्रेणैकैकामिति। पंचमीं कुशदेशे पृथिव्याममृतं जुहोम्यग्नये वैश्वान
४८ राय स्वाहेति षष्ठीं पश्चाद्गार्हपत्यस्य प्राणममृते जुहोम्यमृतं प्राणे जुहोमि स्वाहेति। पंचमीषष्ठीमितिपूर्णी स्रु
क्संज्ञस्यार्थं। प्रताप्यांतर्वेदि निदध्यात्। प्रतपनमाहवनीयेऽन्तर्वेदि शब्दसमन्वयात्। प्रताप्य स्रुचमंतर्वेदि
देशे निदध्यात्। परिकर्मिणो वाभ्युपच्छेत्। परिचारकः परिकर्मीत्युच्यते। अग्रेणाहवनीयं परीत्य समिध आद
ध्यात्तिस्रस्तिस्र उदङ्मुखस्तिष्ठन्। पूर्वेणाहवनीयं विहारस्य दक्षिणदेशं गत्वा तस्य तस्याग्नेर्दक्षिणत उदङ्मु
खस्तिष्ठन् तिस्रस्तिस्रः समिध आदध्यात्। पुनः प्रत्येकं पर्युक्षणादि कुर्यात्। प्रथमा समंत्रा। सकृन्मंत्रेणेति
परिभाषा प्रधानकर्मसु न प्रवर्तत इति कृत्वा प्रथमां समंत्रामित्युक्तवानाचार्यः। आहवनीये दीदिहीति गार्ह
पत्ये दीदायेति दक्षिणे दीदिद्यायेति। सर्वे स्वाहाकारांताः कर्त्तव्याः। उक्तं पर्युक्षणं। यदुक्तं पर्युक्षणं तदिहापि ४८
कर्तव्यं। ताभ्यां परिसमूहने। पूर्वोक्तमिदं चेह पर्युक्षणे ताभ्यां परिसमूहने व्याख्याते इति। धर्मातिदेश एको

र्थः। परिसमूहने इति योगविभागात्स्वरूपसिद्धिर्भवति। मंत्रस्तु जपित्वेति पृथक्करणान्न भवति लिंगाभा
वाच्च। पूर्वे तु पर्युक्षणात्। ये द्वे परिसमूहने पर्युक्षणधर्मके विहिते तयोरनेन क्रमो विधीयते। पर्युक्षणात्पू
र्वे परिसमूहने भवत इति एवं प्रातः। सायंकालेऽग्निहोत्रविधिरुक्तः। एवं प्रातःकालेऽपि होमः कर्तव्य इत्यर्थः। त
त्र विशेषमाह। उपोदयं व्युषित उदिते वा। उपोदयमादित्योदयसमीपमित्यर्थः। व्युषिते उषस्युदित इत्यर्थः। उदि
ते आदित्यमंडले कृत्स्ने उदित इत्यर्थः। एते त्रयः प्रातर्होमप्रधानकालाः। तत्र यद्युपोदयमुदित इत्युच्यते।
उदित आदित्ये सति। उदयसमीप इति द्वाभ्यां पदाभ्यामेक एव कालो विहितः स्यात्। तद्भ्रांतिनिवृत्त्यर्थं। व्युषित
शब्दात्पूर्वमुपोदयशब्दं पठितवानाचार्यः। एतेषु त्रिषु कालेषु प्रधानं यथा संपद्यते तथांगानामेवोत्कर्षो
पकर्षौ वा द्रष्टव्यः। सत्यं त्वर्ताभ्यां त्वेति पर्युक्षणमोमुन्नेष्यामीत्यतिसर्जनं हरणे। त्वा सूर्यज्योतिषमहरिष्ट
कामुपदधे स्वाहेति समिदाधानं भूर्भुवः स्वरों सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति होम उन्मार्जनं च। एते प्रात

Indira Gandhi National
Centre for the Arts

र्मे मेदिशेषाः॥२॥ प्रवत्स्यन्नग्नीन् प्रज्वाल्य चक्रम्यातिक्रम्योपतिष्ठते। यस्मिन् ग्रामे अग्नय आसते। तस्मात् प्रदेशा
५९ द्ग्रामांतरे एकरात्राद्यमो वासः प्रवासः। तं करिष्यन् प्रवत्स्यन् भवति। अग्नीनिति बहुवचनात् सर्वान् विहृत्य प्रज्व
लयेत्। प्रज्वल्य चक्रम्य तीर्थदेशेन प्रपद्यातिक्रम्याग्नीनुपतिष्ठते। अतिक्रम्येति अप्यक्रो पस्थान देशम
तिक्रम्य असंतसमीपं गत्वा तं तमग्निमुपतिष्ठत इत्यर्थः। इदं कर्माहिताग्निः स्वयमेव कुर्यात्। इदमनेनेत्या
ह। आहवनीयं शंस्य पशून्मे पाहीति। गार्हपत्यं नर्य प्रजां मे पाहीति। दक्षिणमथर्व पितुं मे पाहीति। गार्हपत्या
हवनीयावीक्षेते मान्मे मित्रावरुणौ गृहान् गोपायतं युवं। अविनश्यन् विहृतान् पशून्नभिरक्षत्वस्माकं पुनरा
यनादिति। दक्षिणाग्निमुपस्थाय तत्रैव तिष्ठन् गार्हपत्याहवनीयावीक्षेत। इमान्मे मित्रावरुणाविति। उत्तर
त्र यथेतं प्रसेति वचनात् तत्रैव तिष्ठन्निति लभ्यते। द्विवचनलिंगात् युगपदेवेक्षेत। यथेतं प्रत्येत्य प्रदक्षिणं ५९
परीत्याहवनीयमुपतिष्ठते। मम नाम प्रथमं जातवेदः पिता माता च दधतुर्यदग्रे। तत्त्वं बिभृहि पुनरा म

मैतोस्तवाहं नाम बिभराण्यग्न इति। आहवनीयमुपस्थाय उत्तरेण विहारं गत्वा गार्हपत्यस्य प्रत्युदग्दे
शे असंतसमीपं गत्वा तमुपस्थाय तद्देशस्थित्वा दक्षिणाग्निमुपस्थाय तत्रैव तिष्ठन् गार्हपत्यमाहवनीयं
चेक्षणं कृत्वा पुनस्तेनैव मार्गेणाहवनीयसमीपं गत्वा ततो गमनाय प्रदक्षिणमावर्तमान आहवनीय
मुपतिष्ठते। मम नाम प्रथममित्यनेन मंत्रेण। प्रव्रजेदनपेक्षमाणो मा प्रगामेति सकृज्जपन्। पृष्ठतोग्नी
न्नेक्षमाणो मा प्रगामेति सकृज्जपन् यथेष्टं गच्छेत्। सकृद्ग्रहणमनभ्यासार्थं। आरादग्निभ्यो वाचं विसृ
जेत्। अग्निभ्यो दूरं कृत्वा वाचं विसृजेत्। यावत्तेग्न्यागारच्छदिर्न दृश्यते तावदत्राराच्छेन्नो यते।
अत्र वाग्विसर्गविधानादितः प्राक् वाग्यत एव सर्वं कुर्यात्। सदासुगः पितुमाँ अस्तु पंथा इति पंथान
मवरुह्य जपेदिति शेषः। योऽभिलक्षितदेशगामी पंथास्तस्मिन्नित्यर्थः। अनुपस्थितानग्निप्रेत्य या
समापद्येते देवसंतत्रसंतत्याग्ने हृदा वाचा मनसा चाबिभर्मि। तिरो मा संतं मा प्रहासीर्ज्योतिषा त्वा

Indira Gandhi National
Centre for the Arts

उपस्थायेत्यस्य साकांक्षत्वान्मात्रगामीति ।
भवति । वाग्विसर्गोन भवति अग्नीनामभा ।
वादिति सिद्धांतभाष्ये ३

आचमनादि सर्वं तत्रैव भवतीति केचित् २

५० वेश्मान्तरेणोपतिष्ठत इति प्रतिदिशमग्नीनुपस्थाय गच्छेदिति शेषः । यदि कदाचिद्यथोक्तोपस्थानमकृ
त्वैव गंतव्यं स्याद्वा न्मात्रुपाद्यनिमित्तात्तदा तत्रैवस्थितः इहैवसन्तस्तनेन मंत्रेणउक्तक्रमेण तं तमग्निं
ध्यात्वा तां तां दिशमग्नीनभिमुख उपस्थाय गच्छेत् । अपि पंथामगन्महीति प्रत्येत्य । ब्रूयादिति शेषः प्र
वासं कृत्वा प्रत्येत्य स्वग्रामसमीपं प्राप्यापि पंथामगन्महीति ब्रूयात् । समित्पाणिर्वाग्यतोग्नीज्वलतः श्रु
त्वाभिक्रम्याहवनीयमीक्षेत । विश्वदानीमाभरंतो नातुरेण मनसा । अग्ने मा ते प्रतिवेशा रिषाम । नमस्ते
अस्तु मीढुषे नमस्त उपसद्वने । अग्ने शुंभस्व तन्वः संमा रय्या सृजेति । वाक्यतः समिधो गृहीत्वा पुत्रेण
शिष्येण वा पूर्वं प्रस्थापितेनाग्नीन्विहृतान्प्रज्वलतश्श्रुत्वा स्वयमाहिताग्निराचम्य शुचिर्भूत्वा तीर्थेन प्रप ५०
द्या व्यक्तदेशाद्दसंतं समीपदेशमभिक्रम्याहवनीयमीक्षेत विश्वदानीमिति द्वाभ्यां मंत्राभ्यां । अग्निषु स
मिध उपनिधायाहवनीयमुपतिष्ठते । मम नाम तव च जातवेदो वाससी इव विवसानौ चरावः । ते द्विभयो

दक्षसे जीवसे च यथायथं नौ तन्वौ जातवेद इति । इदानीमानीताः समिधो विभज्य तस्य तस्याग्नेः समीपे
निधाय तत आहवनीयमुपतिष्ठते । मम नाम तव चेत्यनेन मंत्रेण । ततः समिधोभ्यादध्यात् । उपनिहिता ए
वास्मिन्ननेने स्वाहा । आहवनीये । अगन्म विश्ववेदसमस्मभ्यं वसुवित्तमं । अग्ने सम्राळभि द्युम्नमभि सह आ
यच्छस्व स्वाहेति । गार्हपत्ये । अयमग्निर्गृहपतिर्गार्हपत्यः प्रजाया वसुवित्तमः । अग्ने गृहपतेभि द्युम्नमभि सह
आयच्छस्व स्वाहेति । दक्षिणे । अयमग्निः पुरीष्यो रयिमान्पुष्टिवर्धनः । अग्ने पुरीष्याभि द्युम्नमभि सह आयच्छ
स्व स्वाहेति । गार्हपत्याहवनीयावीक्षेते मान्मे मित्रावरुणौ गृहाञ्जुगुपतं युवं । अविनष्टानविहतान्पूषैना
न्प्यरक्षीदास्माकं पुनरायनादिति । दक्षिणाग्निसमीपे स्थित इत्युक्तं । यथेतं प्रत्येत्य । परिसमुह्योदग्विहारा
दुपविश्य भूर्भुवः स्वरिति वाचं विसृजेत । यथेतमित्युक्तार्थं । यथेतं प्रत्येत्य सर्वस्य विहारस्य परिसमूहनं कृ
त्वा तस्योत्तरत उपविश्य वाचं विसृजेत् । भूर्भुवः स्वरित्यनेन । असत्यति प्रवासनिमित्ते एवं प्रयोगक्रमः ।

Indira Gandhi National
Centre for the Arts

सवितुस्तं निमित्तेपथे तेप्रसेत्य तं नैमित्तिकं कृत्वा परिसमूहनवाग्निसंसर्गौ कुर्यात्। एवमेवस्त्रस्य रूपं
५१ विविच्यं। प्रोष्यभ्यो दशरात्रा चतुर्गृहीतमाज्यं जुहुयात् मनोज्योतिर्जुषतामाज्यं मे विच्छिन्नं यज्ञं समिमं द
धातु। याइष्टाउषसो या अनिष्टास्ताः संतनोमि हविषा घृतेन स्वाहेति। दशरात्रादूर्ध्वं प्रवासे कृत्वा जुहुयात्
चतुर्गृहीतं गृहीत्वा तया जुहोति। मनोज्योतिरित्येतया ऋचा। चतुर्गृहीतशब्दादेवाज्यद्रव्यसिद्धेः तस्या मा
ज्यग्रहणं तूष्णीमुत्पवनलाभार्थं। अग्निहोत्रहोमे च। अग्निहोत्रहोमविच्छेदे चैतामाहुतिं जुहुयात्। विशे
षाभावात् एकस्य द्वयोर्बहूनामपि विच्छेदे एषैव प्रायश्चित्तिः कार्या। प्रतिहोममेके। परिसमुह्योदग्निहो
रादुपविश्य भूर्भुवः स्वरिति वाचं विसृजेत। चशब्दोऽत्राध्याहार्यः। एतामाहुतिं हुत्वा प्रतिहोमं च कुर्यादित्य ५२
र्थः। प्रतिहोमो नाम यावंतः कालाः होमेन विच्छिन्नास्तावतामेकैकं कालं प्रत्येकैको होमः कर्तव्यः। इत्येवं प
रिसमुह्येत्यादि पूर्वमेव व्याख्यातं। गृहानीक्षेताप्यनाहिताग्निर्गृहामा बिभीतोपवः स्वस्यैवोऽस्मासु च प्रजाय

ध्वं मा च वो गोपतीरिषदिति प्रपद्येत गृहानहं सुमनसः प्रपद्ये वीरघ्नो वीरवतः सुवीरान्। इरां वहंतो घृत
मुक्षमाणास्तेष्वहं सुमनाः संविशानीति शिवं शग्मं शंयोः शंयोरिति त्रिरनुवीक्षमाणः। ईक्षणं प्रपदनं
चानाहिताग्निरपि कुर्यात्। गृहामा बिभीतेतीक्षेत। गृहानहमिति प्रतिपद्येत। प्रपद्यमान एवं प्रपद्ये
त शिवं शग्मं शंयोः शंयोरिति त्रिरनुवीक्षमाणः। अनुवीक्षणमनुमंत्रणं। मंत्रेण प्रकाशनं। यस्तुन तै४
मंत्रेणाविना कर्तुं न शक्यत इति मंत्रोऽपि त्रिरावर्तते। विदितमप्यलीकं न तद्गृहज्ञापयेयुः। अलीकम
अपिगम्यादनवंगतं४ प्रियमवगतमप्यप्रियं प्रवासादागतस्य तस्मिन्नहनि न निवेदयेयुः। विज्ञायते भयं वो भयं मे स्विसेवोप
तिष्ठेत प्रवसन् प्रत्येत्याहरहर्वैति। वाराहद्ध्वर्गस्यार्थे। प्रपद्येत इमं नेन मंत्रेण प्रवत्स्यन् प्रवासादा
गतस्याहरहरग्निहोत्रहोमे च उपतिष्ठेतेति श्रुतिरेवोपन्यस्ता विज्ञायत इति। अस्मिन्पक्षे प्रयोगक्रमः।
विहृत्य प्रज्वल्याचम्य तीर्थेन प्रपद्य तत्रैवास्थित्वा सर्वानग्नीन्स्वकुदेशोपस्थाप प्रदक्षिणमावृत्य ती

Indira Gandhi National
Centre for the Arts

र्थेनैवनिष्क्रम्यमाग्रगामेतिजपन्प्रक्रम्यसदासुगइति पंथानंप्राप्यजपात्।प्रसेत्यअपिपंथामितुस्को।
५२ विहतानज्वलितानतीर्थेनैवप्रपद्यतत्रैवस्थित्वाअभयंवइत्युपस्थायपरिसमूहनादिशेषंप्रवर्तेत।अ
तिप्रवासोक्लिनेतत्स्यनेमितिकमपिकुर्यात्।अग्निहोत्रहोमेचदक्षिणाग्निहोमानंतरंअभयंवइत्युपति
ष्ठेत।पूर्वोक्तस्ययाजमानस्यानुमंत्रणत्वादस्यचोपस्थानत्वान्नविकल्पः।तेनसमुच्चयएव।अनुपस्थि
ताग्नेः प्रवासेइहैवसन्निस्सेतावदेव।नान्यत्किंचित्॥४॥अमावास्यायामपराह्णेपिंडपितृयज्ञः।अमावा
स्याशब्दः प्रतिपत्संचंद्रमसोः संधिवचनोयत्रापराह्णशब्दसमन्वयात्तदहोरात्रेवर्तते।तत्रापराह्णेअह
श्चतुर्थभागेपिंडपितृयज्ञः कर्तव्यः।औपवसथ्येहनियजनीयेवाहनि।यजनीयेचेत्वार्थएवदक्षिणा
ग्निः प्रणीयते।यदापुनरहोरात्रसंधौतिथिसंधिःस्यात्तदौपवसथ्यएवाहनिक्रियते।दक्षिणाग्नेरेको ५२
ल्मुकं प्राग्दक्षिणाप्रणयेद्येरूपाणिप्रतिमुंचमानाअसुराःसंतःस्वधयाचरंति।परापुरोनिपुरोयेभरंत्यग्निष्टा

लोकात्प्रणुदात्वस्मादिति।एकोल्मुकंएकतः प्रदीप्तमुल्मुकंप्राग्दक्षिणाप्राक्दक्षिणस्यांदिशीत्यर्थः।
दक्षिणाग्नेःसकाशादेकोल्मुकंगृहीत्वातस्मादेवप्राक्दक्षिणस्यांदिशिप्रणयेत्।येरूपाणीत्यनेनमंत्रेण।
सर्वकर्माणितांदिशं।अवशिष्टदिक्षानिसर्वाणिकर्माणितामेवप्राक्दक्षिणांदिशमभिमुखानिकर्तव्या
नि।उपसमाधायोभौपरिस्तीर्यदक्षिणाग्नेः प्राग्उदक्प्रसव्यदर्भैकैकशः पात्राणिसादयेच्चरुस्थालिशूर्पस्फ्या
रूखलमुसलस्रुवध्रुवकृष्णाजिनसकृदाछिन्नेध्ममेक्षणकमंडलून्।उभयोरुपसमाधानंपरिस्तरणंच
कर्तव्यं।मध्यगतस्योभावितिशब्दस्यविशेषसंबंधेकारणाभावात्।पात्राणीतिचरुस्थाल्यादीन्युच्यंते।तेन
शब्देनसंव्यवहारार्थं।चरुश्रपणार्थास्थालीचरुस्थाली।चरुस्थालीध्रुवाशब्दोपोह्यांदसंहृत्यतां।एकेनप्र
यत्नेनछिन्नाःकुशाः सकृदाछिन्नाः।दक्षिणतोग्निष्ठमारुह्यचरुस्थालींव्रीहीणांपूर्णांनिम्रजेत्।तिम्र
ज्यादितिप्राप्तेनिम्रजेदितिछांदसः।अग्निसमीपेतिष्ठतीत्यग्निष्ठंशकटं।प्रयाणकालेवाह्ययोयत्रतिष्ठं

Indira Gandhi National
Centre for the Arts

थेर्नै वनिष्क्रम्य मा प्रगा मेति जपन् प्रव्रज्य सदा सुग इति पंथा ने प्राप्य कृपात् प्रसेत्य अपि पंथामिसुक्ता।
५२ विहृतान् ज्वलितान् ती थेर्नै व प्रपद्युत त्रैव स्थित्वा अभयं वइस्तु पस्थाये परिसमूहनादि शेषं पूर्ववत्। अ
ति प्रवासोस्त्विचेत् तस्य नैमित्तिकमपि कुर्यात्। अग्निहोत्र होमे च दक्षिणाग्नि होमानंतरं अभयं वइस्तु पति
ष्ठेत। पूर्वोक्तस्य याजमानस्यानुमंत्रणत्वाद् स्य चोपस्थानत्वान्वैकल्पश्च। तेन समुच्चय एव। अनुपस्थि
ताग्नेः प्रवासे इहैव सन्निसेतावदेव। नान्यत्किंचित्॥४॥ अमावास्यायाम पराह्णे पिंडपितृयज्ञः। अमावा
स्या शब्दः प्रतिपत्से च द्वयोः संधिवचनो पत्रापराह्ण शब्द समन्वयात्त दस्य होरात्रे वर्तते। तत्रापराह्णे अह
श्चतुर्थभागे पिंडपितृयज्ञः कर्तव्यः। औपवसथ्येहनि यजनीयेवाहनि। यजनीयेचेत्वार्थ एव दक्षिणा
ग्निः प्रणीयते। यदा पुनरहोरात्र संधौ तिथि संधिः स्यात्तदोपवसथ्य एवाहनि क्रियते। दक्षिणाग्नेरेको ५२
ल्मुकं प्राग्दक्षिणा प्रणयेद्ये रूपाणि प्रतिमुंचमाना असुराः संतः स्वधया चरंति। परापुरो निपुरो ये भरंत्यग्निष्टा

लोकात्प्रणुदात्वस्मादिति। एकोल्मुकं एकतः प्रदीप्तमुल्मुकं प्राग्दक्षिणा प्राक्दक्षिणस्यां दिशी त्यर्थः।
दक्षिणाग्नेः सकाशादेकोल्मुकं गृहीत्वा तस्मादेव प्राक्दक्षिणस्यां दिशि प्रणयेत्। येरूपाणीत्यनेन मंत्रेण।
सर्वकर्माणि तां दिशं। अवशिष्टदिक्षा निसर्वाणि कर्माणि तामेव प्राक्दक्षिणांदिशमभिमुखानि कर्तव्या
नि। उपसमाधायोभौ परिस्तीर्य दक्षिणाग्नेः प्रागुदक् प्रत्यगुदग्वैकैकशः पात्राणि सादयेच्चरुस्थालीं शूर्पस्फ्यमा
लूखलमुसलस्रुवध्रुवकृष्णाजिनसकृदाछिन्नेध्ममेक्षणकमंडलून्। उभयोरुपसमाधानं परिस्तरणं च
कर्तव्यं। मध्यगतस्योभावितिशब्दस्य विशेषसंबंधे कारणाभावात्। पात्राणीति चरुस्थाल्यादीन्युच्यंते। तेन
शब्देन संव्यवहारार्थं। चरुश्रपणार्था स्थाली चरुस्थाली। चरुस्थाली ध्रुवाशब्दयोश्छांदसं ह्रस्वत्वं। एकेन प्र
यत्नेन छिन्नाः कुशाः सकृदाछिन्नाः॥ दक्षिणतोग्नि प्रमाणस्य चरुस्थालीं व्रीहीणां पूर्णां निर्वपेत्। ति स्र
ज्यादिति प्राप्ते निर्वपेदिति छांदसः॥ अग्निसमीपे तिष्ठतीत्यग्निष्ठं शकटं। प्रयाणकाले यात्र यो य त्रतिष्ठं

Indira Gandhi National
Centre for the Arts

॰ विवेचो नाम व्रीहितंडुलानां पृथक्करणं तस्य प्रतिषेधः ४

ति। तदग्निष्ठं दक्षिणत आहृत्य तत्रैव श्रपयेत्स्थालीं निधाय व्रीहिभिराप्यायेत्। तावर्णानि मृज्यात्। यथोप

५२॥ रितनाद्धिलदेशा छूर्पोपरि पतंति। परिसन्नान्निदध्यात्। स्थाल्यां स्पदे शाछूर्पोपरि पतंतितान्व्रीहीन्परिसन्नां

छकटेनिदध्यात्। कृष्णाजिनउलूखलं कृत्वेतरान्पत्न्यवहन्यादविवेचं। कृत्वा निधायेत्यर्थः। इतरान्स्थाल्यंत

र्गतानित्यर्थः। अविवेचं। अविविच्याविविच्येत्यर्थः। अवहतांस्तत्कस्त्रक्षाल्यदक्षिणाग्नौ श्रपयेत्। अवहतेषु।

श्यामाकादकृतुषापसरणेप्रीकरणं तन्नेत्यर्थः ५ अवहतवचनं फलीकरणनिवृत्त्यर्थं। दक्षिणाग्नौ श्रपणवचनं यच नाहते गार्हपत्य एव श्रपणमितिज्ञापना

र्थं। अर्वागतिप्रणीतास्स्मेयनलेखामुल्लिखेदपहता असुरा रक्षांसि वेदिषद इति। दक्षिणाग्न्यतिप्रणीतयोरंत

रालउल्लिखेदित्यर्थः। तामस्युक्ष्य सकृदाछिन्नैरवस्तीर्यासादयेदभिघार्य स्थालीपाकमाज्यं सर्पिरनुत्पूतं नवनी

तंवोत्स्तं ध्रुवायामाज्यं कृत्वा दक्षिणतः। आज्यं सर्पिरित्यादि ध्रुवायामाज्यं कृत्वा दक्षिणत इत्येव मंतःपद ५२

समूहः। आसादयेदभिघार्येत्यस्मात्पुरस्तादर्थतो द्रष्टव्यः। तेनायमर्थः। तां लेखामस्युक्ष्य सकृदाछिन्नैरवस्ती

र्याज्यं सर्पिर्गृहीत्वा ध्रुवायां कृत्वा दक्षिणतो दक्षिणाग्नेर्निधाय। तेनाज्येन स्थालीपाकमभिघार्य दक्षिणाग्नेः प

श्चादासादयेत्। यदि नवनीतमाज्यकार्यार्थं स्यात्तदास्य विलापनमात्रं कृत्वान्यस्मिन्पात्र आनीय पवित्राभ्यां तत्स्थाली

मुत्पूय ततो ध्रुवायां कृत्वा दक्षिणतो दक्षिणाग्नेर्निधाय तेनाभिघार्येत्यादि समानं। द्वितीयस्याज्यग्रहणस्येदं

प्रयोजनं। पात्रांतरस्थमुत्पूय पश्चाद्ध्रुवायां ग्रहणमित्येवमर्थं। पूर्वमाज्यग्रहणं कार्यलक्षणार्थं। सर्पिः प

क्वं नवनीतमपक्वं। आंजनाभ्यंजनकशिपूपबर्हणानि। दक्षिणत इत्यत्रापि संबध्यते। विशेषाग्रहणादपेक्षि

तत्वाच्च। आंजनादीनि च दक्षिणतो दक्षिणाग्नेर्निदध्यात्। पूर्वसूत्रे अयथाविधिक्रमेण सूत्रप्रणयनं। दक्षि

णत इत्यस्योभयार्थत्वायैव। प्राचीनावीती ध्ममुपसमाधाय मेक्षणेनादायावदानसंपदा जुहुयात्सोमाय पि

तृमते स्वधा नमोऽग्नये कव्यवाहनाय स्वधा नम इति। इध्मः पंचदशसंख्याकः। मेक्षणेनादायेतेनैव जुहुया

त्। अवदानसंपदा अवदानसंपन्नाम उपस्तरणं द्विरवदानं अभिघारणं प्रत्यभिघारणं च। तयेत्थं भूतं जु

Indira Gandhi National Centre for the Arts

जुयात्। नात्रस्वाहाकारः। स्वधानमः शब्दस्य प्रदानार्थत्वात्। स्वाहाकारेणाग्निं पूर्वं यज्ञोपवीती। स्वधान
५२ मः शब्दस्य स्थाने स्वाहाशब्दं वा कृत्वा जुहुयात्। अस्मिन्पक्षे मंत्रविपर्ययः व्यत्यासः। यज्ञोपवीतत्वं च भव
ति। अग्निं पूर्वमिति। अग्नये कव्यवाहनाय स्वेतं मंत्रं पूर्वं कुर्यादित्यर्थः। मेक्षणमनुप्रहत्य प्राचीनावीती ले
खांत्रिरुदकेनोपनयेत् शुंधंतां पितरः शुंधंतां पितामहाः शुंधंतां प्रपितामहा इति। प्राचीनावीतीग्रहणं स्वाहा
कारपक्षेपि मेक्षणानुप्रहरणे तत्काले प्राचीनावीतित्वप्रापणार्थं। उभयस्मिन्पक्षेपि मेक्षणमग्नावनुप्रह
त्यैवमेव त्रिभिर्मंत्रैस्त्रिर्निनयेत्। पिंडस्थानेषु। तस्यां पिंडान्निदध्यात्स्वराचीनपाणिः पित्रे पितामहाय प्र
पितामहायेति तेसौ ये च त्वामत्रान्विति। अधिकृतायां लेखायां लेखासंप्रत्ययार्थं तस्यां ग्रहणं क्रियते। नाधि
कारात्लेखासंबंधोस्तीतिज्ञापनार्थं। तेन हविरासादनमग्नेः पश्चादिति साधितं भवति। तथैवोक्तं च। निदृ ५३
णीयाद्यादित्यर्थः। निपरणं पिण्डेणैवतीर्थेन पाणेरुत्तानत्वमजहदेव पित्र्येणतीर्थेन यदा कुर्यात्तदाप

राचीनपाणिर्भवति। असावित्यस्य स्थाने संबुध्यंतानि पित्रादीनां नामानि गृह्णीयात्। तस्मै तस्मै य एषां
प्रेताः स्युरिति गाणगारिः प्रत्यक्षमितरानर्चयेत् तदर्थत्वात्। त्रयाणां मध्ये प्रेतानां पिंडदानं जीवानां प्रत्यक्षा
र्चनमिति गाणगारेर्मतं पितृयज्ञ स्यार्थत्वात्कर्मण इति। सर्वेभ्य एव निपृणीयादिति लौगाक्षिः क्रियागुणत्वा
त्। पित्रादिभ्यस्त्रिभ्यः प्रेतेभ्यो जीवद्भ्यश्च सर्वेभ्यो निपरणं लौगाक्षिर्मन्यते। क्रियायामुद्देशकारकत्वेन चगु
णभूताः पितरः न तेषां प्रीतिः शास्त्रतो लोकतो वा गम्यत इति। अपि जीवंत आत्रिभ्यः प्रेतेभ्य एव निपृणी
यादिति गौतमः क्रियाद्यर्थकारिता। आदिमध्यांतशब्दैः पितृपितामहप्रपितामहा उच्यंते। जीवः अंतो यस्य
स जीवांतः अपिशब्देन जीवादिर्जीवमध्यश्चापि लभ्यते। जीव सर्व इति च। त्रयाणामेकस्मिन्द्वयोः सर्वेषु वा
जीवत्सु वा यावदर्थं परान्पितॄन्गृहीत्वा प्रेतेभ्यस्त्रिभ्यो दद्यादिति गौतमो मन्यते। क्रियास्वर्थकारितामरण
पदार्थे प्रवृत्ता यस्मात् क्रियेत्यर्थः। उपायविशेषो जीवन्मृतानां। पित्रादीनां जीवानां मृतानां च पिंडदाने उ

Indira Gandhi National
Centre for the Arts

पायविशेषोवस्यतइत्यर्थः। उपन्यस्तान्पक्षान्दूषयितुमाह। नपरेभ्योनधिकारात्। न प्रत्यक्षं। नजीवे
भ्योनिपृणीयात्। गौतमगाणगारितौल्वलीनांक्रमेणदूषणानि। नजीवांतर्हितेभ्यः। जीवव्यवहितेभ्यो न
५४ निपृणीयादित्यर्थः। सर्वपक्षव्यापीदंदूषणं सर्वत्रानधिकारादित्ययमेवहेतुः। अनधिकाराद्योग्यत्वादि
त्यर्थः। क्वचिद्विध्यभावात्क्वचिन्निषेधाद्योग्यत्वमवगम्यते। अयमुपायविशेषउच्यते। जुहुयाज्जी
वेभ्यः। जीवेभ्योजुहुयात्येतेभ्योनिपृणीयादित्यर्थः। नजीवंतमतीयाद्द्द्यादित्यत्रापिनिषेधोस्ति। तेनजी
वपितुः जीवपितामहस्यजीवोभयस्यवायमपिपक्षोनास्ति। तत्रहोमांतमनारंभोवा। अथ सर्वेषुजीव
त्सु कथमित्याह। सर्वहुतंसर्वजीविनः। सर्वहुतमितिसर्वेपिंडाहोतव्याइत्यर्थः। पिंडहोमोनिपरणमंत्रेणस्वा ५५
हाकारांतेनकर्तव्यः। अत्रदूषणीयपक्षाणामुपन्यासेप्रयोजनं। सपिंडीकरणेपितामहेजीवतिपितरिमृते
संवत्सरादिषुकालेषुतस्यावश्यकर्तव्यत्वात्तत्रैषांपक्षाणामुपयोगइत्येवमर्थः। एवमाद्यान्यन्यान्यपिप्रयो

जनानिचिंत्यानि। नामान्यविद्वांस्ततपितामहप्रपितामहेति। पित्रादीनांनामाज्ञानेततादयः शब्दानामस्था
नेप्रयोक्तव्याः। निपृतानतुमंत्रयेतात्रपितरोमादयध्वंयथाभागमावृषायध्वमिति। निपृत्तीनितिप्राप्ते नि
पृतानितिछांदसोनिर्देशः। निपृतानेवपिंडाननुमंत्रयेतनहुतानित्येवमर्थंनिपृतानित्युच्यते। तेनसर्वहोमे
नेदमनुमंत्रणंभवति। अस्मिन्प्रकरणेयद्यपिपिंडमात्रमेवानुमंत्रणमुपस्थानंप्रवाहणंचविधीयते। तथापि
मंत्राणांपितृलिंगत्वात्पिंडाएवपितरइतिकृत्वापितरएवैतैर्मंत्रैरभिधातव्याः। सव्यावृदुदङुावृत्यथाशक्त्य
प्राणंनासित्वानिपर्यावृत्यामीमदंतपितरोयथाभागमावृषायीषतेति। अनुमंत्रयेतेतिशेषः। सव्यावृदुदङ्
ित्येतावतैवसव्यावृदुदङ्मुखत्वयोःसिद्धयोरावृत्येतियचनमावृत्त्यैवोच्छ्वासोनपर्वमिति। एतदर्थंयथाशक्त्यनु
छ्वसन्नासित्वापुनरभिपर्यावृत्यामीमदंतपितरइत्यनुमंत्रयते। आवृषायीषतेतियकारः पठितव्यः। वि
तिः प्रमादजा। चरोः प्राणभक्षंभक्षयेत्। तत्प्रीमेवात्रप्राणभक्षणंकार्यं। निलेनिनयने। यदुदकोपन

Indira Gandhi National
Centre for the Arts

यनमुक्तं शुंधंतां पितर इत्यादिकं तदत्र निनयनमित्युच्यते। तदत्र कर्तव्यमित्यर्थः॥ असावभ्यंक्ष्वासावंक्ष्वेति पिं
५५ डेष्वभ्यंजनांजने। दद्यादिति शेषः॥ वासो दद्याद्दशामूर्णास्तुकां वा पंचाशद्वर्षतायाः ऊर्ध्वं स्वलोमेतद्वः पितरो वासो
मानो तोऽन्यत्पितरो युंग्ध्वमिति। एतेषामन्यतमं द्रव्यं वासोर्थं पिंडेषु दद्यादित्यर्थः॥ दशां वस्त्रस्याग्रदेशं। ऊर्णा
स्तुकां वा अविलोमानि। पंचाशद्वर्षतायाः॥ पंचाशद्वर्षेष्वतीते ऊर्ध्वं जीवनस्थ्वीयमेव लोम यथा सोर्थं दद्यात्। मंत्र
स्त्वयमेव सर्वेषु द्रव्येषु सकृदेव भवति। अथैनानुपतिष्ठते नमो वः पितर इषे नमो वः पितर ऊर्जे नमो वः पितरः
शुष्माय नमो वः पितरो घोराय नमो वः पितरो जीवाय नमो वः पितरो रसाय। स्वधा वः पितरो नमो वः पितरो न
म एतद्युष्माकं पितर इमा अस्माकं जीवा वो जीवंत इह संतः स्याम। इतिकाराध्याहारेण सूत्रच्छेदः संतः स्यामेति ५५
मंत्रः पठितव्यो वकारं वर्जयित्वा। मनो न्वाहुवामह इति च तिसृभिः॥ उपतिष्ठेतेति शेषः॥ अथैनान्प्रवाहयेत्
परेतन पितरः सोम्यासो गंभीरेभिः पथिभिः पूर्विणेभिः॥ दत्तायास्मभ्यं द्रविणेह भद्रं रयिं च नः सर्ववीरं निय

च्छतेति। अत्रापि पिंडस्थानित्वेनैव प्रवाहयेत्। अग्निं प्रसेयादग्ने तमद्याश्वं न स्तोमैरिति। प्रसेयादिति वचन
सामर्थ्याद्दक्षिणामुखेनात्र किंचिदनुव्रजनं कर्तव्यं। अग्निं प्रसेयादग्ने तमद्याश्वं न स्तोमैरित्यविशेषवचनेन दक्षि
णाग्निमेव। इतरयोर्विशेषानभिधानात्। गार्हपत्यं यदंतरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिंसिम। अ
ग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुंचतु करोतु मामनेनसं। इति प्रसेयादिति शेषः॥ वीरं मे दत्त पितर इति पिंडानां
मध्यमं। आदद्यीतेति शेषः। पत्नी प्राशयेदाधत्त पितरो गर्भं कुमारं पुष्करस्रजं। यथायमरपा असदिति। तमेव मध्य
ममिति शेषः। पत्न्येव मंत्रं ब्रूयादाधत्तेति। अप्स्वितरौ। प्रक्षिपेदित्यर्थः॥ अतिप्रणीते वा। प्रक्षिप्य दाहयेत्।
यस्य वा गंतुरन्नकाम्याभावः स प्राश्नीयात्। आगंतुरभिनवः निर्निमित्तएवान्नेच्छाभावो यस्य स चेत्तरो प्राश्नीया
त्। महारोगेणवाभिभूतः प्राश्नीयादन्यतरां गतिं गच्छति। क्षयकुष्ठादिनाऽसाध्य परिहारेणातिपीडितः प्राश्नी
यादिति पुनर्वचनं पूर्वेणास्य संबंधनिवृत्त्यर्थं। तेनान्यत्रामिषत्वेनैव भवति। अन्यतरां गतिं गच्छतीत्यर्थः॥ सद्य

Indira Gandhi National
Centre for the Arts

एवअरोगोभवेत्म्रियेतवेति। एवमनाहिताग्निर्निसे॥ अनाहिताग्निरप्येवंपिंडपितृयज्ञंकुर्यात्। निसेऔ
५६ पासनेइत्यर्थः॥ श्रपयित्वाति प्रणीयजुहुयात्। तस्यायंविशेषः॥ हविः श्रपणं कृत्वाति प्रणायनं कर्तव्यं। त
स्येवाति प्रणीतस्योपसमाधानं परिस्तरणं कृत्वा ततोवागतिप्रणीतादिसादिसमाने। जुहुयादित्यमनुवा
दः। अयं चात्रविशेषः। यदंतरिक्षमित्यस्मिन्मंत्रे गार्हपत्यशब्दउहर्तव्यः। तच्छब्दस्यप्रवृत्तिनिमित्तस्य संस्का
रस्यात्राभावादिति। द्विवसात्राणामुत्सर्गः। द्विश इत्यर्थः॥ तूष्णं द्वितीयमुद्दिक्ते। एकस्मातिरिक्तस्यतूष्णे नद्विलं
संपाद्योत्सर्गः कर्तव्यइत्यर्थः॥५॥ दर्शपूर्णमासावारप्स्यमानो न्वारंभणीयां। पूर्वं दर्शपूर्णमासयोः स्वरूप
मात्रमुक्तं। इदानीं तयोरनुष्ठानारंभउच्यते। इदानीं तावारप्स्यमानस्या न्वारंभणीयाविधानात्। यस्मादाधा ५६
नानंतरमजस्याग्निहोत्रपिंडपितृयज्ञानुक्त्वाऽनयोरारंभउच्यते। तस्मादेतत्साधितं भवति। पौर्णमास्यामा
धानमिष्टिं चकृत्वाततोजस्रधारणमथाग्निहोत्रहोमं च कृत्वामावास्यायां पिंडपितृयज्ञं चकृत्वा पौर्णमास्यां

तयोरारंभइति। तत्रयदापस्तंबवचनं पौर्णमास्यां तु पूर्वस्मिन्पर्वणि सेष्टिसान्वारंभणीयमपवृज्य श्वोभूते
पौर्णमासेनयजतइति। अस्यायमर्थः। पौर्णमास्यामादधानः। तदहरेव पौर्णमासीमारभेतेति। तस्यायंवि
षयः। यस्यां पौर्णमास्यामन्वारंभणीयापर्यंतं सर्वं प्रतिपत्सं चदर्शीसंधिक्षणात्प्रागेवकर्तुंशक्यते तस्यविष
यः। संध्यनपगमात्पौर्णमासाधिकारप्राप्तिरिति। एकस्मिन्नहनियउत्तरस्मिन्क्षणेदर्शपूर्णमासावारभते स
तस्मात्पूर्वस्मिन्क्षणे तावारप्स्यमानइत्युच्यते। तस्यान्वारंभणीयाकर्तव्यासेयं पुरुषार्थानकर्मार्था। श्रुत्या
दीनामभावात्। दर्शपूर्णमासावारप्स्यमानइत्यनेनचकर्मसंबंधोवक्तुं नशक्यते। निमित्ततयाधिकारिवि
शेषणत्वेन उपक्षयात् उद्देशकं नभवितुमर्हति। तस्मादनंगंतयोरन्वारंभणीया। तथापितत्संबंधिपुरुष
संबंधात्तयोरेवाधिकारित्वेन पुरुषं संपादयतीति। युक्तमुक्तं। अतोदर्शपूर्णमासावृत्तौ विकृतिषु चनपु
नःपुनः कार्यातिदेशाभावात्। कार्यसंबंध्यतिदिश्यते नपुरुषार्थसंबंधमपीति। अग्नाविष्णूसरस्वतीस

Indira Gandhi National
Centre for the Arts

रस्यानग्निर्भगी भगीस्यग्नेर्गुण ः। अग्नाविष्णू सजोषसेमा वर्द्धन्तु वां गिरः। द्युम्नैर्वाजेभिरागतं। अग्नाविष्णू म
५७ हिधामप्रियं वां वीथो घृतस्य गुह्या जुषाणा। दमेदमे सुष्टुतिर्वावृधाना प्रति वां जिह्वा घृतमुच्चरण्यत्। पावका
नः सरस्वती पावीरवी कन्या चित्रायुः पीपिवांसं सरस्वतो दिव्यं सुपर्णं वायसं बृहंतमासवंसवितुर्यथा सनो
राधांस्याभरेति। इष्टेर्याज्यानुवाक्याः। आधानाद्यग्निमपावीयदिवार्थात्र्यर्थेरस्तु नराधेय इष्टिः। आमया
वी उदरव्याधिमान्। अर्थव्यथा अर्थहानिः। अर्थाः पुत्रपश्वादयः। आधानानंतरं तस्मिन्नेव संवत्सरेय
द्येतानि निमित्तानि स्युः तदा पुनराधेयं कर्तव्यमिति। अयमर्थोस्मिं स्त्रत्रे र्थाल्लभ्यते। तस्मिन् पुनराधेये
वक्ष्यमाणलक्षणा इष्टिः कार्येत्यर्थः। तस्यां प्रयाजानुयाजान्विभक्तिभिर्यजेत्। तस्यामिति वचनं तस्यामेवे
ष्टौ नान्यस्यां वक्ष्यमाणो विधिः स्यादित्येवमर्थं। तेन ज्ञायते ऽनैकेष्टिकं पुनराधेयमिति। विभक्तिभिः सहिता ५७
न्प्रयाजानुयाजान् कुर्यात्। का विभक्तिः कथा प्रदेशो प्रयोक्तव्या किं सर्वेष्वृत्तत्त्वपर्ययेष्विति। एतेषां संश

यानां निवृत्तये चतुरः प्रयाजान्विभक्तिभिः सहितान्पठित्वा द्वावनूयाजौ च विभक्तिभिः सहितौ पठिष्यति
अपठितयोरेवाविकृतत्वसिद्ध्यर्थं। समिधः समिधोग्नेऽग्न आज्यस्य व्यंतु। तनूनपादग्निमग्न आज्यस्य वेतु।
इळो अग्निनाग्न आज्यस्य व्यंतु। बर्हिरग्निरग्न आज्यस्य वेत्विति। नराशंसिनां नराशंसोग्निमग्न इति भवति
विभक्तिविधानस्याविशेषात्। पाठस्य चोत्तमप्रयाजानुयाजव्यावृत्त्यर्थत्वात्। समिधाग्निं दुवस्यते द्वृत्रु
वाणित इत्याग्नेयावाज्यभागौ। सोमस्थाने प्यग्निरेव। तयोरेते अनुवाक्ये। वृधन्मरिं दुमंता विस्ता चक्षते।
आज्यभागयोरेतौ गुणौ। तथानुवृत्तिः। निगमेषु सगुणयोरेवानुवृत्तिरित्यर्थः। इज्या च। इज्याशब्देन या
ज्यायां देवतादेश उच्यते। स च सगुणयोरेव कर्तव्यः। केचिदिहानुवृत्तिशब्देन वदेवतादेशस्यापि ग्रहण
मभ्युपगम्य इज्या चेत्यनेन याज्यामध्यगतस्य अग्निशब्दस्य सगुणोच्चारणमिच्छंति। नित्यं पूर्वमनुब्राह्मणे
नः। नित्यः केवलोग्निः। अनुवाक्यायामग्निर्वृत्राणी त्यनुब्राह्मणिन आचार्याः। अग्न आयूंषि पवस इत्युत

रस्यानग्निर्भगी। भगीत्यग्नेर्गुणः। अग्नाविष्णू सजोषसेमा वर्द्धन्तु वां गिरः। द्युम्नैर्वाजेभिरागतं। अग्नाविष्णू म
५७ हि धाम प्रियं वां वीथो घृतस्य गुह्या जुषाणा। दमे दमे सुष्टुतिर्वामियाना प्रति वां जिह्वा घृतमुच्चरण्यत्। पावका
नः सरस्वती पावीरवी कन्या चित्रायुः पीपिवांसं सरस्वतो दिव्यं सुपर्णं वायसं बृहंतमासवं सवितुर्यथा सनो
राधांसाभरेति। इष्टेर्याज्यानुवाक्याः। आधानाद्यद्याम यावीयदि वार्थव्यथेरन्तु नराधेय इष्टिः। आमया
वी उदरव्याधिमान्। अर्थव्यथा अर्थहानिः। अर्थाः पुत्रपश्वादयः। आधानानंतरं तस्मिन्नेव संवत्सरे य
द्येतानि निमित्तानि स्युः तदा पुनराधेयं कर्तव्यमिति। अयमर्थोऽस्मिं सूत्रेऽर्थाल्लभ्यते। तस्मिंस्तु पुनराधेये
वक्ष्यमाणलक्षणा इष्टिः कार्येत्यर्थः। तस्यां प्रयाजानुयाजान्विभक्तिभिर्यजेत्। तस्यामिति वचनं तस्यामेवे ५७
ष्टौ नान्यस्यां वक्ष्यमाणो विधिः स्यादित्येवमर्थं। तेन ज्ञायतेऽनैकेष्टिकं पुनराधेयमिति। विभक्तिभिः सहिता
न्प्रयाजानुयाजान्कुर्यात्। का विभक्तिः क्व वा प्रदेशे प्रयोक्तव्या किं सर्वेषु तत कतिपयेष्विति। एतेषां संश

यानां निवृत्तये चतुरः प्रयाजान्विभक्तिभिः सहितान्पठित्वा द्वावनूयाजौ च विभक्तिभिः सहितौ पठिष्यति
अपठितयोरेवाविकृतत्वसिद्ध्यर्थं। समिधः समिधोऽग्नेऽग्न आज्यस्य व्यंतु। तनूनपादग्निमग्न आज्यस्य वेतु।
इडो अग्निनाग्न आज्यस्य व्यंतु। बर्हिरग्निरग्न आज्यस्य वेत्विति। नराशंसिनां नराशंसोऽग्निमग्न इति भवति
विभक्तिविधानस्याविशेषात्। पाठस्य चोत्तमप्रयाजानुयाजव्यावृत्त्यर्थत्वात्। समिधाग्निं दुवस्यत इत्यत्र
वाजित इडाग्ने याज्याज्यभागौ। सोमस्यानेप्यग्निरेव। तयोरेते अनुवाक्ये। बुद्धिमदिंदु मंतारिवत्या चक्षते।
आज्यभागयोरेतौ गुणौ। तथानुवृत्तिः। निगमेषु सगुणयोरेवानुवृत्तिरित्यर्थः। इज्या च। इज्याशब्देन या
ज्यायां देवतादेश उच्यते। स च सगुणयोरेव कर्तव्यः। केचिदिहानुवृत्तिशब्देनैव देवतादेशस्यापि ग्रहण
मभ्युपगम्य इज्या च इत्यनेन याज्यामध्यगतस्य अग्निशब्दस्य सगुणोच्चारणमिच्छंति। नित्यं पूर्वमनुब्राह्मणि
नः। नित्यः केवलोऽग्निः। अनुवाक्या चाग्निर्वृत्राणीत्यनुब्राह्मणिन आचार्याः। अग्न आयूंषि पवस इत्युत

Indira Gandhi National
Centre for the Arts

रं।उत्तरोपि केवलोग्निरियं चानुवाक्या अनुब्राह्मणिनामेवाभिप्रायेण। निसत्तन्तरे हविः शब्दः। उत्तरेयाज्यामं
५८ त्रे हविः शब्दस्य सोमधर्मत्वात्तन्निवृत्तौ तस्य निवृत्ति प्रसंगे तस्यानापन्नत्वादग्नेरपि तद्धर्मसंबंध इति मत्वा नित्य
स्विस्सुकवान्। आग्नेयं हविः। अथाह्यग्ने क्रतोर्भद्रस्याभिष्टेअद्य गीर्भिर्गणं तत्वभिर्नो अर्कैरग्ने तमद्याश्वंन
स्तोमैरिति संयाज्ये देवं बर्हिरग्नेर्वसुवनेवसुधेयस्य वेतु देवो नराशंसो ग्नो वसुवने वसुधेयस्य वेत्विति। गतार्थ
मिदं॥६॥ आग्रयणं व्रीहिश्यामाकयवानां। अग्रे अयनं भक्षणं येन कर्मणा तदाग्रयणं। प्रथम द्वितीययोर्दृ
स्वदीर्घत्वमत्ययः। एषां त्रयाणां द्रव्याणां संवत्सरे प्रथम निष्पन्नानामाग्रयणं नाम कर्म कर्तव्यमित्य
र्थः। व्रीहिशब्दस्य प्रथमनिपातो व्रीहीणां प्राधान्यस्थापनार्थं तेन कालचोदना व्रीह्याग्रयणस्यैव भव
ति। श्यामाकशब्दस्य मध्यनिपातो व्रीहिकाला यवकालो भिन्न इति ज्ञापयति सस्यं नाश्नीयादग्निहोत्रमहुत्वा। ५८
सस्यं नव निष्पन्नं। तन्नाश्नीयात् आग्रयणेनानिष्ट्वा। यद्याग्रयणेनानिष्ट्वतो नवनिष्पन्नेनान्नेन विना नि

यदावर्षस्येत्यादि

वौहो न स्यात्। तदानेषां द्रव्याणां तत्कालनिष्पन्नेन सायं प्रातरग्निहोत्रं हुत्वाश्नीयात्। ततः काल आगते आग्र
यणं कुर्यात्। अग्निहोत्रमहुत्वा नाश्नीयादिति वचनादाग्रयणेनानिष्ट्वाप्यग्निहोत्रं हुत्वाश्नतो न दोष इति गम्य
ते। सस्यग्रहणेन व्रीह्यादिभ्योऽन्यदपि यन्नवनिष्पन्नं तस्य सर्वस्य प्रतिषेधार्थं। यदावर्षस्य तृप्तः स्यादथाग्र
यणेन यजेत। यदा वर्षतृप्तिर्लोकस्य भवति तदाऽग्रयणेन यजेत। अनेन प्रकारेण व्रीह्याग्रयणस्य शरत्काल
उक्तो भवति। एतमेव कालं श्रुत्या समर्थयति। अपि हि देवा आहुस्तृप्तो नूनं वर्षस्याग्रयणेन हि यजत इति। अ
ग्निहोत्रीं वेनानादपि वात्सल्याः पयसा जुहुयात्। अथाग्रयणेन यजेतेति। इष्टिरेवाग्रयणशब्देनोक्ता। इदानी
मिदमप्युच्यते। अग्निहोत्रहोमार्था धेनुरग्निहोत्री लुच्यते। तां व्रीहिश्यामाकयवानां अन्यतमं आशयित्वा त
स्याः पयसा सायं प्रातरग्निहोत्रं जुहुयात्। इष्टिः प्रथमकल्पस्तदसंभवे अयमनुकल्पः इति द्वावेवाग्रयण
कल्पावुच्येते। अपि वाऽक्रियायषेषु यवैराग्रयणस्य क्रिया वा भवेत्। अक्रिया वेति विकल्पः। इष्टिस्तु

Indira Gandhi National
Centre for the Arts

राज्ञः।त्रायाणांवर्णानामविशेषेणकल्पद्वयेप्राप्ते॰राज्ञोविशेषउच्यते।इष्टिरेवनान्यइति।सर्वेषांचैके।
५९ सर्वेषामपिवर्णानामिष्टिरेवेत्येकेमन्यंते।श्यामाकेष्टौसोमप्रश्वरुः॥श्यामाकाग्रयणेष्टौसोमदेवत्यश्चरुर्भ
वति।कालोवर्षाऋतुःशास्त्रांतरेचदर्शनात्।सोमयास्तेमयोभुवोयातेधामानिदिवियापृथिव्यामिति।अ
वांतरेडायानिरसंजपमुष्टिसव्येपाणौकृत्वेतरेणाभिमृशेत्त्वजायतयेत्वाग्रहंगृह्णामिमह्यंश्रियैमह्यंयश
सेमह्यमन्नाद्याय।इतिकाराध्याहारेणसूत्रच्छेदः।निरसजपशब्देनेडाभागमितिमंत्रउच्यते।तस्यनिरसत्वेस
र्पिनिरसयचनं।एतेनभक्षिणइतिविध्यतिदेशोतद्वर्जितस्यप्रापणार्थं।भद्रान्नःश्रेयःसमनैष्टदेवास्त्व
यावसेनसमशीमहित्वा।सनोमयोभूःपितवाविशेहशंनोभवद्विपदेशंचतुष्पदइतिप्राश्याचम्यनाभिमा ५९
लभेतामोसिप्राणतदृतंब्रवीम्यमासिसर्वानसिप्रविष्टः।समेजरांरोगमपनुद्यशरीरादमामएधिमामृथा
मइंद्रेति।स्मृतिप्राप्तस्याचमनस्यविधानंयस्मिन्देशेआचमनंकृतंतस्मिन्नेवदेशेस्थितस्यनाभ्यालंभनसि

ध्यर्थं।एतेनभक्षिणोभक्षांस्तर्यत्रनवभोजने।एतेनविधानेनसर्वभक्षेषुसर्वेभक्षिणःसर्वान्भक्षान्भ
क्षयेयुः।सर्वत्रवचनंप्रकरणादुत्कर्षार्थं।नवभोजनवचनं।लौकिकेपिनवभोजनेप्रापणार्थं।सर्वत्रव
चनात्प्रकरणादुत्कृष्टमपिनवभोजनवचनाल्लौकिकएवव्यवतिष्ठते।वैदिकेग्निहोत्रहोमेनवानांसवनीया
दिसत्रनप्राप्नुयात्।तत्रापिप्रापणार्थंभक्षणवचनं।अथव्रीहियवानांधाय्येविराजौ।अथानंतरंव्रीहीणां
यवानांचाग्रयणेष्टिरुच्यते।तत्रव्रीह्याग्रयणस्यकालउक्तः।वसंतोयवाग्रयणस्य।तत्रहितेषांप्रथमःपाक
इतितंत्रेविशेषाभावात्।उभयोःसहवचनं।तयोर्धाय्येविराजौचभवतः।इतरस्पौर्णमासंतंत्रं।वैराजमिसे
तावतेवोक्तेपितावन्मात्रविकारसिद्धेःसत्यांधाय्याविराड्ग्रहणंविकल्पेनवृधन्वंतोरपिप्रापणार्थं।अग्नीद्रा
विंद्राग्नीवाविश्वेदेवाःसोमोयदितत्रश्यामाकोद्यावापृथिवी।आद्ययोर्विकल्पेनैतादेवताग्रहणं।यदिश्या
माकाग्रयणमस्यामेवेष्टौसमानतंत्रेणक्रियतेतदासोमस्तृतीयोभवति।आद्यायेअग्निमिंधतेसुकर्माणः

Indira Gandhi National
Centre for the Arts

स्य

मुरुन्नोदेवयंतो विश्वेदेवास आगतयेके चज्मा महिनो अहिमायामहीद्यौः पृथिवी च नः प्रपूर्वजे पितरा नः सी

६० इति भिरिति। इंद्राग्न्योः सोमस्य चोक्ता या ज्यानुवाक्याः॥७॥ अथ काम्याः॥ अथानंतरं काम्यादृष्टयो वक्ष्यंते प्राक्चातु

र्मास्येभ्य इत्यर्थः॥ काम्याधिकारवचनमनिर्दिष्टकाम्या अपि नैमित्तिका॥ शास्त्रांतराद्वपिता सा कामो नेष्ट्य इत्येवम

र्थं। आयुष्कामेष्ट्यां जीवातुमंतो। आयुष्कामस्य इष्टिः आयुष्कामेष्टिः तस्यां आयुष्कामेष्ट्यां अस्मिन्प्रकरणे काम

ग्रहणानामेतत्प्रयोजनं। यद्देवतासंयुक्तायामिष्टौ यन्मंत्रं विहितं तद्देवतासंयुक्ता या मप्यन्यकामसंयुक्तायां तन्मंत्रम

वतीति ज्ञापनार्थं। आ नो अग्ने सुचेतुना त्वं सोम महे भगमिति। अग्निरायुष्मानिंद्रस्त्राता। इंद्रदेवते आयुष्मानित्सग्ने

र्गुणः॥ त्राते तींद्रस्य गुणः॥ आयुष्टे विश्वतो दधदयमग्निर्वरेण्यः। पुनस्ते प्राण आयातु परायक्ष्मं सुवामिते। आयु ६०

र्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि। घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभिरक्षतादिमं।

त्रातारमिंद्रमवितारमिंद्रं मा ते अस्यां सहसावन्परिष्टावघाय भूम हरिवः परादै। अग्ने त्वं पारया नव्यो अस्मा



न्निति संयाज्ये स्वस्त्ययन्यां रक्षितवंतो। स्वस्तिगमनसाधनीभूतायां स्वस्त्ययनीष्टिः। अग्निरक्षाणो अंहसस्त्वं नः सोमवि

श्वत इति। त्वं नः सोम विश्वत इति रक्षालिंगा ज्ञेतमस्येव। अग्निः स्वस्तिमान्। स्वस्ति नो दिवो अग्ने पृथिव्या आरे अस्मद

मतिमारे अंह इति। पूर्वयोक्ते संयाज्ये। पाहि न इत्येते। पुत्रकामेष्ट्यामग्निः पुत्री। पुत्रकामेष्टौ अग्निः पुत्री देवता। पु

त्रीत्यग्नेर्गुणः। यस्मै त्वं सुकृते जातवेदो यस्त्वा हृदा कीरिणा मन्यमानः। अग्निस्तु विश्रवस्तममिति द्वे संयाज्ये। आ

ग्नेय्या उत्तरे। ये उत्तरे इष्टी वक्ष्यंते ते मूर्धन्वते कामायेति च ते अग्निदेवत्ये भवत इत्यर्थः॥ पूर्वस्यामग्नेर्मूर्धन्वान्गुणः।

उत्तरस्यां कामो गुणः। नित्ये मूर्धन्वतः॥ अग्निर्मूर्धा भुवो यज्ञस्येत्यर्थः। तुभ्यं ता अंगिरस्तम अश्याम तं काममग्ने त

वोतीति कामाय। कामगुणकस्याग्नेस्तुभ्यं ता अंगिरस्तम अश्याम तं काममिति याज्यानुवाक्ये। वैमृध्या उत्तरे। उत्तरे

द्वे इष्टी वैमृध्यो भवतः। तयोर्वक्ष्यमाणे याज्यानुवाक्यायुगले ते इंद्रदेवते भवतः॥ स चेंद्रो विमृद्गुणकः। वैमृध

गुणको वा भवति। अत एते इष्टी वैमृध्या इत्युच्यते। वि न इंद्र मृधो जहि मृगो न भीमः कुचरो गिरिष्ठाः सघन्निमि

Indira Gandhi National
Centre for the Arts

द्रसच्युतिं प्रच्युतिं जघनच्युतिं। प्रनाकाफानआभर। प्रपप्सुं निवसकथ्यो विन इंद्रम्भोजहि। चनीखुदग्रथासप
६९ मभिनः सुष्टुतिं नयेति। एतेपुरिका मस्य याज्यानुवाक्ये। इंद्रयदा त्रेतुनद्री त्रेवा। इंद्रो दाता सपुनर्दाता वादेवताभवति।
उभयथाप्येते एव याज्यानुवाक्ये वचनसामर्थ्यात्। यानि नो धनानि क्रुद्धो जिनासि नन्तुना। इंद्रानुविद्धि न स्तान्यने न
हविषा पुनः। पुनर्न इंद्रो मघवा ददातु धनानि त्रा क्रोधनीः सुराधाः। अस्मत्र्यकक्रणु तां याचितो मनः स्पृष्टीन इंद्रो
हविषामधातीति। आशानामाशापालेभ्यो वा। आशा आशापाला वादेवता। अत्रापि याज्यानुवाक्ययोरैक्यं। आशानां
माशामालेभ्यश्चतुर्भ्यो अमृतेभ्यः। इदं भूतस्याध्यक्षेभ्यो विधे महविषा वयं। विश्वा आशा मधुना संसृजाम्यनमीवा आ
पओषधयः संतु सर्वाः। अयं यजमानो मृधो व्यस्यत्वगृभीताः पशवः संतु सर्व इति। लोकेष्टिः। इष्टिनामेदं। पृथिव्यंतरि
क्षं द्यौरिति देवताः। देवताग्रहणं पृथिव्यादीनां पृथग्देवतात्वसिध्यर्थं। त्रिलिंगत्वाद्याज्यानुवाक्ययोस्तिस्रः सहि ६९
ताएका देवता मा भूदिति। तेनैतत्साधितं भवति। याज्यानुवाक्यालिंगाद्देवतानिर्णयः कार्य इति। पृथिवीं मातरं महीमं

तरिक्षमुपब्रुवे। बृहतीमूतये दिवं। विश्वं बिभर्ति पृथिव्यंतरिक्षं वि पप्रथे। दुहे द्यौर्बृहती पयः। वर्म मे पृथिवी मह्यं
तरिक्षं सप्रथाः। द्यौर्मे शर्म महि श्रवः इति तिस्रस्त्रयाणां। एतास्तिस्र ऋचस्त्रयाणां हविषां याज्यानुवाक्या भवंति। उत्त
रस्त्रेविनिवेशसामर्थ्या देवास्यार्थस्य सिद्धेः सत्संवचनमिदमन्यत्रापि तिस्रस्त्रयाणां विहिता एवं विनिवेशयितव्या
इत्येवमर्थं। एवं भवंतीत्याह। प्रथमे प्रथमस्योत्तमे मध्यमस्योत्तमा प्रथमा चोत्तमस्य॥८॥ मित्रविंदा महावैराजी॥ मित्रा
णि यया विंदते सा मित्रविंदा। गुणनामैतत्। महावैराजी तस्या नामैव। अग्निः सोमो वरुणो मित्र इंद्रो बृहस्पतिः सविता
पूषा सरस्वती त्वष्टेत्येकप्रदानाः। दशैता देवता एकप्रदानाः महावैराज्यां भवंति। एकप्रदानशब्द उक्तार्थः। अग्निः सो
मो वरुणो मित्र इंद्रो बृहस्पतिः सविता यः सहस्री। पूषा नो गोभिरवसा सरस्वती त्वष्टा रूपेण समनक्तु यज्ञं। इत्यनुवा
क्या। प्रतिलोममादिश्य यजे द्येयजामहे त्वष्टारं सरस्वतीं पूषणं सवितारं बृहस्पतिमिंद्रं मित्रं वरुणं सोममग्निं त्वष्टा
रूपाणि दधती सरस्वती भगं पूषा सविता नो ददातु। बृहस्पतिर्ददिंद्रः सहस्रं मित्रो दाता वरुणः सोमो अग्निरिति। ए

Indira Gandhi National
Centre for the Arts

तादेवताः प्रतिलोममादित्यस्य जेद्येयजाम ह इति वचनं याज्यास्नामेव प्रतिलोमत्वं नान्येषु निगमेषु इत्येवमर्थं। प्र
६२ तिलोमविधानादेव प्रतिलोमत्वे सिद्धे प्रतिलोमपाठस्येदं प्रयोजनं। उत्पत्तियागक्रमयोर्विरोधे पूर्वेषूत्पत्तिक्रमः। उत्तरे
षु यागक्रम इत्यस्यन्यायस्यैंद्रामारुतानुकल्पादुत्तरेषु निगमेषु प्रतिलोमत्वं स्यादिति तन्निवृत्त्यर्थं। इदं च पाठप्रयोजनं
वरुणस्याप्सु पांशुत्वं भवतीति। त्वष्टा रूपाणीति याज्या। अष्टौ वैराजतंत्राः। आग्नेय्या उत्तरे इत्येवमाद्याम हा वैराज्यं ता इष्ट
यो वैराजतंत्राः। तासामाद्याः षट्के कहविषः। अनुवादोयं प्राप्तत्वात्। प्राप्तानुवादे प्रयोजनं हविः शब्देन प्रधानहविषा
मेव ग्रहणमिति ज्ञापनार्थं। स्नुषाश्वशुरीयमाभिचरन्यजेत। स्नुषाश्वशुरीं नामेष्टिः। तयाभिचरन् शत्रुं मारया
मीति संकल्पमन्यजेत। इंद्रः स्वरो अतरद्ज्जो सित्स्नुषा सपत्ना श्वशुरो हमस्मि। अहं शत्रूं जयामि जर्हषाणो हं वाजं जया ६२
मि वाजसातौ। इंद्रः स्वरः प्रथमो विश्वकर्मा मरुत्वां अस्तु गणवां त्सजातैः। ममस्नुषाश्वशुरस्य प्रशिष्टौ सपत्ना
वानं मनसउपासतां। याज्यानुवाक्ययोर्लिंगादेवास्या देवताकल्प्या। सा चेंद्रः स्वरगुणो वा। जुष्टो दमूना अग्ने शर्द्धम

हतेसौभगायेति संयाज्ये विमतानां संमत्यर्थं संज्ञानी। विमतानां विमनस्कानां संमतिप्रयोजनार्थं संज्ञानी नामेष्टिः
कार्या। अग्निर्वसुमान् सोमो रुद्रवानिंद्रो मरुत्वान्वरुण आदित्यवानित्येकप्रदानाः। चतस्रो ग्न्याद्याः सगुणा देवता ए
कप्रदाना वेदितव्याः। अग्निः प्रथमो वसुभिर्नो अव्यात्सोमो रुद्रेरभिरक्षतु त्मना। इंद्रो मरुद्भिर्ऋतुथा कृणोत्वादित्यै
र्नो वरुणः शर्म यंसत्। समग्निर्वसुभिर्नो अव्यात्संसोमो रुद्रियाभिस्तनूभिः। समिंद्रो रातहव्यो मरुद्भिः समादित्यैर्व
रुणो विश्ववेदा इति। एषा संज्ञानी नामेष्टिः कार्या स्वामिभृत्योः संमत्यर्थं। यः समानैर्मिथो विप्रियः स्यात्। तमेतया
याजयेदिति श्रुतेः। ऐंद्रामारुतीं भेदकामाः। इंद्रश्च मरुतश्च देवतेयस्याः सा ऐंद्रामारुती सेवात्र विग्रहः। केवलानां म
रुतां याज्यानुवाक्याद्वारेनादिंद्रस्य च पूर्वोक्तयोर्ग्रहणेन द्विदेवत्येयमिति निश्चीयते। भेदकामाः। रातां च विशां च। लो
के आहिताग्नयो यदि स्युः। तेषामस्यामधिकारः। एकैकस्यैव। मरुतो यस्य हि क्षये प्रशर्द्धा यमारुता यस्व भानव इ
ति। इंद्रस्य निसे एव। ऐंद्रीमनूच्य मारुत्या यजेन्मारुतीमनूच्यैंद्र्या यजेदिंद्रश्चैव निगमेषु मरुतो वा। प्रधानक्रम ए

वांगानां क्रम इति प्रसिद्धो न्यायः। अत्र तु प्रधानयोः परस्परव्यतिक्रमसिद्ध्योः क्रमो नास्ति। याज्यानुवाक्याभ्यामुभा
६३ भ्यां यागक्रियावयवभूतस्य उद्देशभागस्य सिद्धेरिति मन्यमानो विकल्पमुक्तवान्। बृहस्पतेनं। इंद्रं वा। प्रधानादूर्ध्वम
न्तः। सत्समुत्पत्तिक्रमाभावे प्रधानक्रम एवांगानां भवति। उत्पत्तिक्रमे तु सति स एवानुपजातविरोधित्वात्प्रधाना
त्प्राक् भवति पश्चात्तु प्रधानक्रम एवेति न्यायः। अत्र तु प्रधानयोः क्रमो स्त्येव याज्यायाम् एवो द्देश्यतया प्रतिपादकत्वा
त्। आवाहनादिवदनुवाक्यायादेवताद्रव्यस्वरूपप्रतिपादकत्वान्मारुत एवात्र यागः पूर्वं क्रियते। पश्चादैंद्र इति विनिवे
शमुक्तवानाचार्यः। वात्राबोत्रपक्षव्यावृत्त्यर्थः। प्रकृत्वा संपत्तिकामाः संज्ञानी च। यथाहिताग्नयो राजविशौ संपर्नि
कामयेरन् तदा तेएते देवते प्रकृत्यैव यजेरन्। पूर्ववदेकैक एव ते। ततः संज्ञानीं चकुर्युरेव मेव। ऐंद्राबार्हस्पत्यां प्रध्य
माणाः। शत्रुभिरभिभूयमानाः। आनइंद्राबृहस्पती अस्मे इंद्राबृहस्पती इति याज्यानुवाक्ये। इन्द्राय चोदयेयुः। यद्यैंद्राबार्हस्प ६३
त्येन निरूप्य इंद्राय चोदयेयुः। उभयोरपि पक्षयोरेते एव याज्यानुवाक्ये भवत इत्यर्थः। ५। पवित्रेष्ट्यां। एतत्सर्वं मन्त्रन
अथर्वे। यद्बार्हस्पत्यं निरूप्य इंद्राय चोदयेयुः।

दृष्टं। ८। वर्षकामेष्टिः कारीरी। वर्षकामस्य कारीरीनामेष्टिः कार्या। तस्यां प्रतिसंचारुमध्वरमीळे अग्निं स्ववसं नमो
भिरितिधाय्ये। तस्यामिति कारीर्यामेवेत्यर्थः। अत्रव हुदेवत्यामाम्नानात्। अन्यदा इयमेव कारीरी एकदेवत्या भवति।
तस्यामपि प्रापणार्थं तस्यां ग्रहणं कृतं। याः काश्च वर्षकामेष्टौ प्रयुक्ताः। एतौ वर्षकामेष्टिमात्रे भवतः। अप्स्वग्ने सधिष्ट
वाप्सु मे सोमो अब्रवीदिति। अत्र पूर्वस्या गायत्रीत्वात्तस्याः तृचत्वादुत्तरापि गायत्र्येव गृहीतव्येति। तथा चोत्तरत्र वक्ष्यति।
अप्सु मे सोमो गायत्र्याविति। इदमेव वाक्याम्नायमनुसरन्। अग्निर्धामच्छन्मरुतः सर्पः। धामच्छदित्यग्नेर्गुणः। तिस्रश्च
पिंड्य उत्तराः। उत्तरास्तिस्रः पिंड्यश्च भवंति। पिंड्य इति पिंडीद्रव्या मरुद्देवत्यास्त्रयो यागा इत्यर्थः। हिरण्यकेशो रजसो वि
सार इति द्वे त्वं त्या चिदच्युता धामं ते विश्वं भुवनमधिश्रितमिति वा बाभ्रेव विद्युन्मिमाति पर्वतश्चिन्महि वृद्धो विभाय
स जेनिरश्मिमो जसा ता हि श्रेष्ठेभिर्विं हरन्या सितं तु मुदीरय यथा मरुतः समुद्रतः प्रवोमरुतस्तविषा उदन्यव आप्यं नरः सुदान
वो ददाशुषे विद्युन्महसो नरो अश्मदिद्यवः कृत्स्नं नियानं हस्यः सुपर्णा निमुत्तं तो ग्राम जितो ध्यायानरः। धामच्छदो मान्या

नुनास्मात्पुगलद्वयं व्यवस्थया योजनीयं। यदा केवलोग्निस्तदा दर्शयदाग्निर्धाम च्छत्रदो नरामिति। अग्नेर्बाधस्वविमृधो
६४ विदुर्गहायं त्वा देवापिः शुशुचानो अग्न इति संयाज्ये। ऋचो न त्वयजुर्भिरेके यजंति। पिंडीयागानिति शेषः। एके शा
खिन ऋच एवानुवाक्या उक्ता यजुर्भिरेव पिंडीयागं कुर्वतीत्यर्थः। अत्र विशेषस्तेभ्य एवाधिगंतव्यः। संस्थितायां सर्वा
दिश उपतिष्ठेता छावदतवसं गीर्भिराभिरिति चतसृभिः प्रत्यृचं। एके कांदिशं सर्वा दिश इत्युपक्रम्य चतसृभिः प्रत्यृच
मित्युपसंहारादन्यत्रापि दिशां सर्वत्वं चतसृष्वेव पर्यवस्यतीति गम्यते। सूक्तेन सूक्तेन वा। एके कां दिशं कृत्स्नेन सूक्तेनो
पतिष्ठेते स्वेवं वा॥११॥ अत ऊर्ध्वमिष्ट्ययनानि। अत ऊर्ध्वं यानि वक्ष्यंते स्मिन्नध्याये तानीष्ट्ययनसंज्ञानीति विद्यात्।
इष्टिभिरयनं गमनं येषु कर्मसु तानीष्ट्ययनानि। सांवत्सरिकाणि। संवत्सरेण क्रियंते संवत्सरैर्वा क्रियंत इत्युभ
यथाविग्रहः कर्तव्यः। दाक्षायणयज्ञचातुर्मास्यानामनेकसांवत्सरिकत्वसिध्यर्थं। तेषां फाल्गुन्यां पौर्णमास्यां चै ६४
त्र्यां वा प्रयोगः। फल्गुनीभिर्युक्ता पौर्णमासी फाल्गुनी चित्रया युक्ता चैत्रीति तेषां सांवत्सरिकाणामागंतुकानाम

स्मिन्काले प्रारंभः कर्तव्यः। दर्शपूर्णमासगुणविकाररूपाणां दाक्षायणयज्ञादीनामारंभे कालनियमो नास्तीति
तेषामित्युच्यते। तुरायणं। तुरायणं नामेष्ट्ययनमित्युच्यते। अग्निरिंद्रो विश्वेदेवा इति पृथगिष्टयोनुसवनमहरहः।
अग्निदेवत्या इंद्रदेवत्या विश्वेदेवदेवत्या चैतास्तिस्र इष्टयः। त्रिषु सवनेषु यथासंख्यमेकैकेष्टिः कार्या। अहन्यहनि। अह
रहरिति वचनं पौर्णमास्यमावास्ययोर्बाधनार्थं। एका वा त्रिहविः। एताभिरेव देवताभिर्युक्ता एकैवेष्टिस्त्रिहविष्का
हन्यहनि प्रातःसवने कर्तव्या वेत्यर्थः। दाक्षायणयज्ञे द्वे पौर्णमास्यौ द्वे अमावास्ये यजेत। दाक्षायणयज्ञः कर्तव्य इ
त्ययमर्थोर्थाल्लभ्यते। तस्मिन्दाक्षायणयज्ञे द्वे पौर्णमास्यौ द्वे अमावास्ये यजेतद्वितीया निर्देशात् प्रतिपन्नयोर्द्वित्वं गुणे
विधीयते। नाप्रतिपन्नयोर्द्वित्वविशिष्टयोर्विधानमत्रेति गम्यते। एतदुक्तं भवति। या पौर्णमासी या अमावास्या ते
एव स्वस्वकाले द्विरावर्तयितव्ये इति। नित्ये पूर्वे यथा संनयतो मावास्यायां। आरंभयोः पूर्वे यते उक्ते एव न यविकृते। त
त्रामावास्याद्वित्वे असंनयतो यासेव नियम्यते। उत्तरयोरैंद्रं पौर्णमास्यां द्वितीयं। उत्तरयोर्विकार उच्यते। पौर्णमास्यां

Indira Gandhi National
Centre for the Arts

यद्द्वितीयं हविस्तद्दैंद्रंभवति। मैत्रावरुणममावास्यायांअमावास्यायांयद्द्वितीयंतन्मैत्रावरुणंभवति। आनोमित्राव
६५ रुणायद्दूरिङ्गेनातिविधेसुदानइति प्राजापत्यद्वादधः। इन्द्राद्धोनामेष्टयनं। तत्प्रजापतिदैवत्यं। तत्सर्वाणि पर्वाणि क
र्तव्यं विशेषविध्यभावात्। प्रजापतेनत्वदेतान्यन्यस्तवेमे लोकाः प्रदिशोदिशश्चपरावतोनिवतउद्वतश्च। प्रजाप
ते विश्वसृज्जीवधन्यइदंनोदेवप्रतिहर्यहव्यमिति। द्यावापृथिव्योरयनं। इदमपीष्टयनंनाम। तस्यस्वरूपमुच्यते।
पौर्णमासेनामावास्यादामावास्येनापौर्णमासात्। स्वकालेपौर्णमासंकृत्वा तेनैवाहरहर्यजेत। आऽमावास्यायाः
कालात्। ततोमावास्यांस्वकालेकृत्वातयैवाहरहरापौर्णमासात्। एवंसंवत्सरेसमापयेत्। अत्रापिदर्शपौर्णमासयोः
पुनःक्रियानास्ति। असमाम्नातास्वर्थात्तंत्रविकारः। अस्मिंश्चास्त्रियाअसमाम्नाताइष्टयःतास्वर्थात्तंत्रविकारो
भवति। इष्टिप्रकरणात्स्त्रीलिंगाच्चेष्टिष्विसवगम्यते। अर्थात्सामर्थ्याद्द्रव्यदेवतादेश्चोदनासामान्यात्स्वरू
पसामान्याच्चेत्यर्थः। तदुक्तंप्रकृतिविकारभावस्यलक्षणं। निर्देशेनाद्धितेनवाम्नासिसादिना। तेनविकारश्चतंत्रान्यत्वं ६५

एकेआचार्याअग्निमंथनसंहितेनवैराजतंत्रेणापिकेचिद्धाय्येएवमन्यतइतिमन्यते। धाय्यासिद्धमात्रेवैराजतंत्रेतिवचनादुभयमपिभवतीत्यन्ये ८५

पौर्णमासादित्यर्थः। उपदिष्टानामिष्टिपशूनांतंत्रमुक्तं। अनुपदिष्टानांकथमित्यपेक्षायांतन्निश्चयार्थमिदंसूत्रच
तुष्टयमारब्धं। अस्यार्थस्यन्यायलभ्यत्वात्सूत्रनामप्येतत्प्रदर्शनार्थत्वेनव्याख्येयं। अध्वर्युर्वायथास्मरेत्। अध्वर्युश
ब्देनयजुर्वेदउच्यते। तच्च प्रदर्शनार्थं। तेनैवंभवतियत्रक्वापिवेदेऽस्येततंत्रमित्याम्नातंस्यात्तस्यतदेवतंत्रंभवेत्। नन्या
यतस्तंत्रकल्पनेति। वाशब्दोऽवधारणार्थः। वैराजंत्वग्निमंथने। अग्निमंथनसंयुक्तायामिष्टौवैराजमेवतंत्रंभवति।
तुशब्दोऽवधारणार्थमेव। धाय्येत्वेवैके। अग्निमंथनेसत्यपिधाय्येएवकेवलेनियम्येतेनवैराजं। धाय्याभ्यामन्यत्र
न्यायकल्प्यमेवतंत्रमिति। असमाम्नातासुतंत्रलक्षणमित्युक्तेदानींयाज्यानुवाक्यालक्षणमित्युच्यते। देवतलक्ष
णायाज्यानुवाक्याः। देवतलक्षणेतिछांदसोह्रस्वः। लक्ष्यतेभिधीयतेविहितदेवतायेनपदेनतल्लक्षणं। देवताया
लक्षणेनास्त्यृक्षुतायाज्यानुवाक्याभवंति। विहितदेवतावाचकपदवत्यइत्यर्थः। व्यधिकरणेयंबहुव्रीहिः। गायत्र्यावती
हृतवत्सुपोक्तवतीपुरस्ताल्लक्षणानुवाक्या। इदमनुवाक्यालक्षणं। गायत्रीछंदः। आइत्येतत्पदवतीआवतीहृतवती

Indira Gandhi National
Centre for the Arts

निष्ठांतग्रहणेधातुमात्रग्रहणंभवतीतिसार्वत्रिकमेतत् हूतइतिक्तेभोरूपं। उपोक्तवतीउपपूर्वस्यवचेरिदंरूपं। उपो
६६ नवतीतिप्रमादपाठः॥ पुरस्ताल्लक्षणाःस्वचः पूर्वभागेदेवतापदंयस्याः सापुरस्ताल्लक्षणा। त्रिष्टुप्वतीवीतवतीजुष्ट
वत्सुपरिष्टाल्लक्षणायाज्यापिवान्यस्मछंदसः। असंभवेविहितछंदसोन्यस्यवायाज्यानुवाक्याः कर्तव्याः। नतुयाज्या
ह्रसीयसी। सर्वथातायदनुवाक्यायायाज्याह्रसीयसीनभवति। नोह्निड् बृहती। नोह्निड् बृहतीयाज्येत्यर्थः। क्षामन
स्वहतदध्वतीस्तुवर्जयेत्। एकवचनाधिकारेबहुवचनंयाज्यानुवाक्यापरिग्रहणार्थं। व्यक्तेतुदैवतेतथैव। सर्व
लक्षणसंपादनान्नाक्तौस्वपदार्थपर्यवसितकार्येदेवतापदेसतितथैवाश्रयणीयंनलक्षणं। तरमन्वेषणीयमित्यर्थः।
लक्षणमपिवाव्यक्ते। अथवाएवंभवति। अव्यक्तेदेवतापदेसतिलक्षणंगायत्र्यादाश्रयणीयमित्यर्थः। अव्यक्त ६६
इतिचोदितनामधेयपर्यायेवावज्रहस्तधूमकेत्वादिपदेचोदितनामधेयेवापरार्थेसतीत्यर्थः। अधिगच्छेत्सर्वशः।
उभयथाप्यभावेसर्वशोधिगंतव्याः। शाखांतरादाहर्तव्याइत्यर्थः। अनधिगमआग्नेयीभ्यां। एवमप्यसंभवेयाभ्यां

काभ्यांचिदाग्नेयीभ्यांयजेतानुब्रूयाच्चेत्यर्थः। व्याहृतिभिर्वा। तत्रानुब्रूयाद्यजेच्चेत्यर्थः। एवंव्याहृतिभिरित्यादि। देव
तामादिश्यप्रणुयाद्यजेच्च। पुरस्ताल्लक्षणत्वायअनुवाक्यायांदेवतांद्वितीययाविभक्त्यादिश्यततोभूर्भुवःस्वरोमितिब्रू
यात्। याज्यायामागुरस्वस्त्यातनोदेवतांततोव्याहृतीः पुनस्तांदेवतामुपरिष्टाल्लक्षणत्वायततोवषट्कारइति। नम्राभ्यां
वा। नम्रेइतिनामधेयमत्रोर्वक्ष्यमाणयोः। इममाग्नणुधीहवंयंत्वागीर्भिर्हवामहे। एदंबर्हिर्निषीदनः। स्तीर्णंबर्हिरश
न्वषगासदेतदुपेक्षानाइहनोअद्यगच्छ। अहेकतामनसेदंजुषस्ववीहिहव्यंप्रयतमाहुतंमइतिनम्रौ। एतेनम्रसंज्ञे।
पुनर्नम्रेइतिवचनमेतयोर्नमनप्राप्त्यर्थं। नम्रेनमनशीलेऊह्येइत्यर्थः। आग्नेय्यावनिरुक्ते। देवतापदरहितेइ
त्यर्थः। तथाप्यग्निर्देवस्यएतेस्वचौभवतइत्यर्थः॥१२॥ चातुर्मास्यानिप्रयोक्ष्यमाणः पूर्वेद्युर्वैश्वानरपार्जन्यां। चातुर्मा
स्यानीतीष्टयननाम। तानिचवैश्वदेवादीनिचत्वारिपर्वाणितानिफाल्गुन्यांचैत्र्यांवाआरभ्यमानः तस्याः पूर्वस्मिन्न
हनिवैश्वानरपर्जन्यदेवत्यामिष्टिंचातुर्मास्यानामारंभार्थंकुर्यात्। द्वेएतेदेवतेयाज्यानुवाक्यायुगलद्वयदर्शनात्। वै ते५

Indira Gandhi National
Centre for the Arts

श्वानरोग्नेर्गुणः। याज्यानुवाक्ययोरग्निलिंगत्वात्। यद्यध्वर्युरेवं केवलं वैश्वानरं कुर्यात्तदा कृतावानं वैश्वानरं ना
५७ भिं यज्ञानां सदनं रयीणां। याज्यानुवाक्ये भवतः। वैश्वानरो अजीजनदग्निर्नो नव्यसी मतिं। क्षमया वृधान ओजसा। पृष्टो
दिवि पृष्टो अग्निः पृथिव्यां पर्जन्याय प्रगायत प्रवातावांतिपतयंति विद्युतः इति। अग्न्याधेयप्रभृत्या तदुपांशु हवि
षः। अग्न्याधेयं प्रभृतिं कृत्वा वैश्वानरपार्जन्ययोरिष्ट्योः यास्ता उपांशुहविषः उपांशुप्रधाना इत्यर्थः। सौमिक्यः।
सोमो तन्त्राः। प्रायश्चित्तिक्यः। प्रायश्चित्तप्रकरणोत्पन्नाः। अन्वायात्ये ककपालाः। अन्वायात्ये ककपालानामिष्टि
त्वासंभवात् याग विशेष्यंते अन्वायात्या एककपालाश्च ये यागास्ते उपांशुप्रयोक्तव्या इत्यर्थः। सर्वत्र वारुणवर्जं। स
र्वत्र विषये वारुणं वर्जयित्वा उपांशुत्वं भवति। न क्वचिदपि विषये वारुण उपांशुर्भवतीत्यर्थः। सावित्रश्चातु
र्मास्येषु। चातुर्मास्येषु सावित्र उपांशुर्भवति। प्रधानहवींषि चैके। हवींषि ते तावता प्रधानप्रसक्ते सिद्धे प्रधानव ५७
चनं प्रधानांतरस्य संप्रत्ययार्थं। अतो ये चतुर्णां पर्वणां व्यपदेशहेतवो वैश्वदेववरुणप्रघासमाहेंद्रशुनासीरी

यास्ते प्रधानशब्दवाच्यास्तेषामुपांशुत्वं भवतीत्यर्थः। पित्र्योपसदः सतंत्राः। तंत्रेण सहैता उपांशु भवंति। पौनराधे
यिकी च प्रागुत्तमादनुयाजात्। याः स्माभिराम्नाता पुनराधेयेष्टिः। सा चोत्तमादनुयाजात् प्राक् सतंत्रोपांशु भव
ति। अपि वासु मंद्रतंत्राः। यासु सतंत्रमुपांशुत्वं विहितं ताः सर्वाः सुमंद्रतंत्रा वा भवेयुः। सुमंद्रतंत्रा इति मंद्रेष्विये प
र्वतरां यमास्तेः प्रयोक्तव्यं ता सा प्रधानं तत्पांश्वेवेत्यर्थः। आगूः प्रणववषट्कारा उच्चैः सर्वत्र। प्रणवशब्देनात्रानुवा
क्याप्रणव एव गृह्यते आगूर्वषट्कारसाहचर्यात्। आगुरादयः सर्वत्र विषये उच्चैर्भवंति न क्वचिदपि विषये तेषामुपांशु
त्वं स्यात्। तथाग्रयणेग्रियं। अग्रे भवमग्र्यं। आग्रयणे यत्प्रथमं हविः आग्नेंद्रं ऐंद्राग्नं वा तदुच्चैर्भवति। आहार्यस्तु
प्राणसंततः प्रणवः पुरोनुवाक्यायाः। पुरोनुवाक्यायाः प्रणवस्योच्चैष्ट्वं विहितं। स प्रणवः पुरोनुवाक्यायाः प्राणसं
ततः कार्यः। तथागूर्वषट्कारो याज्यायाः। तथैतौ याज्यायाः प्राणसंततौ कार्यावित्यर्थः। आगुरादिभिः प्रसिद्धोच्चैस्त्व
रैर्याज्यानुवाक्ययोः प्राणसंतानविधिसामर्थ्यादेवोपांशुत्वं सिद्धं भवति। प्राणसंततः प्रणवः। तथागूर्वषट्कारावित्येता

Indira Gandhi National
Centre for the Arts

वर्तेत याज्यानुवाक्ययोरुपांशुत्वस्य प्राणसंतानस्य च सिद्धेस्तयामपि याज्यानुवाक्याया ग्रहणं करोतीति तत् ज्ञापय
५८ ति। अनुवाक्या याज्याना श्वप्रत्यृचं सप्राणसंतानेन आगुः प्रणव वषट्कारा वक्तव्या ऋगंतेभ्य ऋगादेश्च प्लुतैर
न्यः संहितो विकारो माभूदिति॥ तंत्रस्वराण्युपांशोरुच्चानि। तंत्रस्वरा आतो मंद्रे गोस्ते वमादिभिर्विहिताः ते तंत्राय
यवसंबद्धत्वात्तंत्रस्वरा इत्युच्यंते। शेषेषां तानि तंत्रस्वराणि उपांशुयाजसंबंधीनि मान्युच्चानि आवहादीन्यागुरादीनि
च तानि तंत्रस्वराणि भवंति। मंद्राण्युपांशुतंत्राणां। उपांशुतंत्राणां तान्युच्चानि मंद्रस्वराणि भवंति न तंत्रस्वराणि भवंती
त्यर्थः॥१३॥ प्रातर्वैश्वदेव्यां प्रेषितोग्निमंथनीया अन्वाह पश्चात्सामिधेनीस्थानस्य पदमात्रे वस्थायाभिहिंकृत्य।
प्रातरित्युच्यते प्रयोक्ष्यमाणः पूर्वेद्युरित्यनद्यतनविभक्तिदर्शनात्। पूर्वेद्युरेव वैश्वदेव्या अपि यागः प्राप्नोतीति तं निर
स्यर्थं। अतः पूर्वेद्युरुपक्रम्यापरेद्युः प्रातर्वैश्वदेव्या यष्टव्यमित्यर्थः। अग्निमंथनार्था ऋचः अग्निमंथनीयास्ताः ५८
प्रेषितोनुब्रूयात्। प्रेषितवचनमस्यानुवचनस्य प्रैष एव निमित्तं नाम्नानं। अनाम्नानेपि प्रेषितोनुब्रूयादेवेति। सा

मिधेनीस्थानस्य पश्चादवस्थाये स्तेनावर्तेत पदमात्रेवस्यानस्य सिद्धेस्तत्पदमात्र इति वचनं पदमात्रेऽतीत इति ज्ञापना
र्थं। अभिहिंकृत्येति वचनमस्यानुवचनस्याभिहिंकारप्रतिषेधे सत्यपि हिंकृतिसिध्यर्थं। तथा च वक्ष्यति। प्रातरनुवा
समनभिहिंकृतानीति। अभि त्वा देव सवितर्मही द्यौः पृथिवी च न स्त्वामग्ने पुष्करादधीति तिसृणामर्धर्चे शिष्ट्वा र
मेद्यासंप्रैषात्। त्वामग्न इति तिस्र ऋचः। तासामुत्तममर्धर्चं शिष्ट्वा यदवसानं तत्रावसाय्यारमेत्। आसंप्रैषात्। आसं
प्रैषश्रवणात्। नोत्तरामाददीतेत्यर्थः। अन्यत्राप्येतदृचोवसाने जायमाने त्वेतस्मिन्नेवावसाने। अन्यत्रापि विषये ऋ
चोमध्येऽवसाने यत्रारमेदिति विधिरस्ति तत्राप्यासंप्रैषात् नोत्तरामाददीत। अग्ने हंसि न्यत्रिणमिति सूक्तमावपेत पुनः
पुनराजन्मनः। मथ्यमानोग्निर्यदि न जायते तदा तत्रैवावसाने स्थित्वा अग्ने हंसीत्यावपेत्। पुनः पुनरसकृदप्यावपे
त्। अग्नेराजन्मनः। आजन्मन इति वचनात् जाते सति संप्रैषात्प्रागपि सूक्तस्य कांचिदप्यृचं नारभेत्। एतस्मिन्नेवाव
सान इति वचनात् एतस्मिन्नेवार्धर्चावसाने ऋगंतरमावपेन्नान्यत्र अन्यत्र ऋगंत एव ऋगंतरमावपेतेति गम्यते। ते

Indira Gandhi National
Centre for the Arts

नयद्यापृपसंस्कारेषुंजनोत्क्षूपणपरिव्ययणेषुपदार्थानुसमयंकुर्वीतिवद्भूपैकमेणितदा॰ग्नेतेकर्गतराप्रापः
५९ ह सिद्धोभवति।पादत्रेणस्रुक्स्रुग्रहणयोःप्रयोजनंआघापेपूर्वावधिरेकाऋकः।परावधिःस्रुक्।तत्रैकस्मादेकोर्वेहू
नोवाऋचोस्रुक्स्यवाऽघापःसिद्धोभवति।आवृत्तेवस्रुकं समाप्येवावृत्तिरिलेवमादि।ज्ञातंप्रुत्वानंतरेणप्रणवेन
।शिष्टमुपसंतनुयात्।ज्ञातश्रवणानंतरमग्नेहंसीत्यस्यस्रुक्स्ययःप्रणवआगच्छतितेनाशिष्टमर्द्धर्चमुपसंतनुया
त्।शिष्टेनोत्तरां।अनाघापपक्षेज्ञातश्रवणानंतरमेवशिष्टेनार्द्धर्चेनोत्तरांऋचमुपसंतनुयात्।उत्तन्तुवंतुत्रंत्रवआ
यंहस्तेनखादिनमित्यर्द्धर्चआरभेत।प्रदेयंदेववीतयइतिद्वेअग्निनाग्निःसमिध्यतेत्वंह्यग्नेअग्निनातंमर्जयंतसु
क्रतुंयज्ञेनयज्ञमयजंतदेवाइतिपरिदध्यात्।यज्ञेनेलनयर्चापरिदध्यात्।समापयेदित्यर्थः।सर्वत्रोत्तमांपरिधा
नीयेतिविद्यात्।सर्वत्रशस्त्रादिषुयाउत्तमाऋक्तांपरिधानीयेतिविद्यात्।धाय्येविराजौनवप्रयाजाः प्राग्उत्तरा ५९
माद्भुतुरआवपेतदुरोअग्नआ।ज्यस्यव्यंतूषासानक्तोग्नआज्यस्यवीतांदैव्याहोतारोग्नआज्यस्यवीतांतिस्रोदेवीरग्नआ

ज्यस्यव्यंत्विति।बर्हिरग्नइतिप्रयाजानंतरमेतानावपेत्।अग्निःसोमःसवितासरस्वतीपूषामरुतःस्वतवसोविश्वेदेवा
द्यावापृथिवी।अष्टौदेवताः।स्वतवसइतिमरुतांगुणः।आविश्वदेवंसत्पतिंवाममद्यसवितर्वामिमुश्वःस्वतवसेयंपशुक्रे
तेअन्यद्यजतंतेअन्यदिहेह्वःस्वतवसःप्रवित्रमर्कंगणंतेतुराययेति।अस्मिन्पर्वणिनिर्गुणानामपिमरुतामेतेएवभव
तः।प्रकरणपठितत्वात्।गुणशब्दस्यचसुसर्थतयाप्यन्वयसंभवात्।नवानुयाजाःषडूर्ध्वंप्रथमाद्देवीर्द्वारोवसुधे वनेवसु ४
यस्यव्यंतुदेवीउषासानक्तावसुवनेवसुधेयस्यवीतांदेवीजोष्ट्रीवसुवनेवसुधेयस्यवीतांदेवीऊर्जाहुतीवसुवनेवसु
धेयस्यवीतांदेवादैव्याहोतारावसुवनेवसुधेयस्यवीतांदेवीस्तिस्रस्तिस्रोदेवीर्वसुवनेवसुधेयस्यव्यंत्विति।अनुयाजा
नामेषदेशःकृतः।अनुयाजानांसूक्तवाकस्यशंयुवाकस्यचोपरिष्टादूजिभ्योवाजिनमनावाह्यादेशः।त्रयाणामन्यत
मस्मिन्कालेवाजिभ्योयागःकर्तव्यः।वाजिनंचतस्यद्रव्यं।द्रव्यशब्देनकर्मणःसंव्यवहारार्थंतद्वचनम्।अनावाहे
स्यावाहनप्रतिषेधोयमनुवादः।अपूर्वत्वादस्यकर्मणः।अपूर्वत्वेचपूर्वत्वेकारणाभावात्।द्रव्यदेवतासंबंधमा

Indira Gandhi National
Centre for the Arts

त्र मन्त्रचोद्यते। नैतावता प्राकृतधर्मसंबंधोस्ति। उक्तं च प्राकृतधर्मसंबंधकारणं निर्वपेत्यादि। तस्य चात्राभावः। तेना
७० पूर्वत्वं निश्चीयते। इष्टिशब्दवाच्यता चास्य नास्ति। तेनापूर्वत्वं। तस्मादपूर्वत्वादुत्तरेष्वपि निगमेषु निगमनं नास्ति। आदे
शवचनं वाजिनो यागानाम न्वायास्यत्वसंज्ञापनिवृत्त्यर्थं। तत्रायं संशयः। किं यस्य कस्य चित्प्रधानस्यानुपश्चाद्दीया
स्यते क्रियते तत्सर्वमन्वायास्यमुतान्वायास्यशब्दचोदितमेवेति। तत्र तच्छब्दचोदिते चातच्छब्दचोदिते चान्वायास्यशब्द
प्रवृत्तिनिमित्तस्य विशेषाभावाद्यत्किंचिदन्यानुप्रवेशितत्सर्वमन्वायास्यमिति कृत्वा वाजिनामप्यन्वायास्यत्वाद
नादेशः प्राप्नोति। एवं प्राप्तेनुप्रवेशिनामादेशं विदधन्नानुप्रवेशित्वमन्वायास्यत्वे निमित्तमिति दर्शितवानाचार्यः।
अतस्तच्छब्दचोदितमेवान्वायास्यमिति सिद्धं। एतदेवादेशवचनस्य प्रयोजनं। नान्यदितिमन्तव्यं। शंनो भवंतु वाजिनो १७०
हवेष्वाजेवाजेवत वाजिनो नद्युर्ध्वज्ञुरनवानं याज्या। ऊर्ध्वज्ञुः ऊर्ध्वजानुः। याज्याग्रहणस्य प्रयोजनमनुवषट्का
रे ऊर्ध्वज्ञुता माभूदिति। अग्नेवीहीत्यनुवषट्कारो वाजिनस्याग्नेवीहीति वा यत्र क्वचैकसंप्रैषेद्वौ वषट्कारौ समस्तावेवत

२ ऊर्ध्वज्ञुरनवानं याज्यामित्यस्यायमर्थः। याज्याग्रहणं अनुवाक्यावषट्कारेषु ऊर्ध्वज्ञुता माभूदिति। न त्वनुवषट्कारे स्यात्। न स्यात्। याज्यामित्येकवचननिर्देशात्। ऊर्ध्वज्ञुतां विधाय पश्चादनुवषट्कारनिर्देशाच्च। अनुवषट्कारेप्यूर्ध्वज्ञुतापत्तावपि हि। अनुवषट्कारमपि विधाय पश्चादूर्ध्वज्ञुरनवानमित्यवक्ष्यत्। याज्ये इति वा वक्ष्यत्। तस्माद्दक्षिणोत्तरेणोपस्थेनागूर्योर्ध्वज्ञुर्याज्यां पठित्वा पस्थेनाविश्य वषट् कुर्यात् इति। २

त्रहिरनुमंत्रयेत। संव्यवहारार्थमिदं। यत्र क्वच विषये एकस्मिन्नेवाध्वर्युसंप्रैषे तुल्यरूपावनुत्यरूपौ वा द्वौ वषट्का
रौ भवतस्तत्र तौ वषट्कारौ समस्तावेव वागोजइत्यादिनाद्विरनुमंत्रयेत। न चाग्रकृत्तरस्मिन्याज्या दावागर्भवतीत्युक्त
त्वादनुवषट्कारेप्यागूः प्राप्तो निषेधः। आगुरः प्रतिषेधो याज्याधर्माणामितरेषां प्रापणार्थः। वाजिनभक्षमिच्छाभि
वप्रतिगृह्योपहवमिच्छेत। इष्टशिष्टं वाजिनं भक्षार्थं पात्रेणानीतं। इच्छामि वांजलिना प्रतिगृह्यांजलौ निधायोपहव
मिच्छेत। भक्षणानुज्ञापनार्थं वाजिनभक्षसंबंधिनः सर्वान्याचेतेत्यर्थः। सर्वेषु भक्षसंबंधिषु उपहवयाचनं कर्तव्य
मित्युक्तं। तदनेन क्रमेणैवं प्रकारेण वाक्येनेत्याह। अध्वर्यउपह्वयस्व ब्रह्मन्नुपह्वयस्वाग्नीदुपह्वयस्वेति। वचनसा
मर्थ्याद्देवेषामयं क्रमः। एते आदितोन्ये भक्षिणः। वाक्यं च एवं प्रकारं कर्म नामधेयमित्युक्तमित्येतत्सर्वमवग
म्यते। अतो नं ततो यजमानोपह्वयस्वेति। एतदपि लब्धं भवति प्रतिनिवर्तं शब्दस्यास्मिंश्छास्त्रेनुक्तत्वात्तस्य चापे
क्षितत्वाच्छास्त्रांतरोक्तस्योपहूत इति शब्दस्य ग्रहणं भवति। यन्मेरेतः प्रसिच्यते यद्वा मे अपिगच्छति यद्वा जाय

लेप्रनः। तेनमाशिवमाविश तेनमावाजिनंकुरु। तस्यतेवाजिपीतस्योपहूतस्योपहूतोभक्षयामीतिप्राणभक्षं
७१ भक्षयेत्। तस्यवाजिनस्यकिंचिदामाशेनमंत्रेणाजिघ्रेत्। एवमध्वर्युर्ब्रह्माग्नीध्रः। एतेचप्राणभक्षंभक्षये
युः। अध्वर्युग्रहणंभक्षणेपिक्रमोस्तीतिज्ञापनार्थं नतस्यापिप्राणभक्षणनियमार्थं। अतोहोतुर्भक्षणानंतरंअ
ध्वर्य्वादेः क्रमेणभक्षणंसिद्धंभवति। यजमानः प्रत्यक्षमितरेचदीक्षितां। यजमानादितरेचयत्रदीक्षिताभवंति
तत्रसर्वेप्रत्यक्षमेवभक्षयेयुः। तच्चसत्रेसंभवति। तत्रगृहपतेश्चान्येषांचप्रत्यक्षमेवेत्यर्थः। तत्रचक्रमोमुख्यादिग होत्री
हपत्यंतः। पौर्णमासेनेष्ट्वाचातुर्मास्यव्रतान्युपेयात्। यस्मिन्नहनिवैश्वदेवीक्रियतेतस्मादपरस्मिन्नहनिपौर्ण
मासेनेष्ट्वातदानीमेववक्ष्यमाणानिव्रतानिकर्तुमारभेत। पौर्णमासीयागवचनंव्रतारंभकालविधानार्थं। नित्या
नामनिवर्तकत्वात्विकृतीनामिति। व्रतशब्देनमानसोनियमउच्यते। अतः केशानिवर्तनादीनिकरिष्ये। म ७१
ध्वादीनिवर्जयिष्ये इतिदृढसंकल्पोभवेत्। एतद्व्रतरूपं। निवर्तनादीनिचकुर्यात्। मध्वादीनिवर्जयेच्च। नकेव

लंसंकल्पमात्रमेव। केशान्निवर्तयीतनिवर्तनंकर्तव्यं। श्मश्रूणिवापयीत। अधःशयीत। मधुमांसलव
णस्त्र्यवलेखनानिवर्जयेत्। केशप्रसाधनादीनिस्वैरिकर्माणि। अवलेखनशब्देनोच्यंते। पूर्वाणित्रीणिकार्याणि
पराणिपंचवर्जनीयानि। एतानिचातुर्मास्यव्रतानि। चातुर्मास्यव्रतवचनंसर्वेषांपर्वणामेतानिव्रतानिनैकस्यै
वसन्निहितस्यपर्वणइत्येवमर्थं। स्त्रीभार्यामुपेयात्। स्त्रीशब्देनप्रतिषिद्धस्यकालविशेषेप्रतिप्रसवोयं। वा
पनंसर्वेषुपर्वसु। उत्तरविवक्षार्थोयमनुवादः। आद्योत्तमयोर्वा। आद्योत्तमयोर्वापर्वणोर्वापनंनमध्यमयोरित्य
र्थः। अनुवादाभावेआद्यंतयोरेववापनंस्यात्। तच्चविकल्पेनमध्यमयोर्वापनप्रसंगएवनास्तीतिगम्यते। तेना
द्यंतयोर्वापनंनित्यंमध्यमयोरनित्यमितिसिद्धंभवति। १४। पंचम्यांपौर्णमास्यांवरुणप्रघासैः। यस्यांपौर्ण
मास्यांवैश्वदेवीकृतातामारभ्ययापंचमीपौर्णमासीतस्यांवरुणप्रघासकैर्यष्टव्यमित्यर्थः। पश्चाद्दर्शपौ
र्णमासिकायावेदेरुपविश्यप्रेषितोग्निप्रणयनीयाःप्रतिपद्यते। वेदेः पश्चादितिप्रदर्शनार्थं। प्रणीयमान

Indira Gandhi National
Centre for the Arts

स्याग्नेः पश्चादित्यर्थः। प्रेषितवचनमुक्तप्रयोजनं। अग्निप्रणयनीयाः अग्निप्रणयनार्थाः। प्रदेवं देव्याधियेति
७२ स्त्र इत्यास्त्वा प्रदेवयमग्नेविश्वेभिः स्वनीकदैवैरित्यर्द्धर्च आरभेत। आसीनः प्रथमामन्वाहोपांशुसप्रणवां। उप
विष्टस्यैवासीन इति वचनं व्रजत्स्वपि प्रथमामसमाप्यनानुव्रजनायोत्तिष्ठेदित्येवमर्थं। सप्रणवां समानप्रणवा
मित्यर्थः। प्रथमायास्तृतीयप्रणवेऽवसानेपि त्रिमात्र एवेत्यर्थः। तत्रस्थानात्स्थानसंक्रमणे प्रणवेनावसायानुद्रु
त्योत्तरां प्रतिपद्यते। तत्र प्रणवेनावसायेत्येतावतैव सिद्धे स्थानात्स्थानसंक्रमण इति वचनमस्य विधेः सर्वार्थ
त्वाय। तत्रोपांशुस्वरस्थानात्स्वरांतरस्थानसंक्रमणे प्रणवेनावसाय अनुद्रुत्यैवोत्तरामन्वमारभेत। ऋगंते श्वा
सस्यप्राप्त्यभावे सत्यप्यनुद्रुत्यैवचनमवसानविधिबलादुद्रुत्योपि प्राप्नोतीति तं निवृत्त्यर्थमनुद्रुत्यविधानं।
तेनावसानविधानमनुद्रुत्यार्थं साधितं भवति। अतो यत्रोद्रुत्य सप्रतिषेधः। तत्रावसानमपि न कर्तव्यं भवेद्दग ७२
वानादौ। अग्निमंथनाग्निप्रणयनादयो मंद्रस्वरेण प्रयोक्तव्याः। प्राथम्यात्तस्य स्वरस्य तदतिक्रमणे का

रणाभावात्। आतो मंद्रेणेत्यत्र एवावधेरभावात्। प्राणसंततं भवतीति विज्ञायते। यदिदमवसायानुद्रुत्यो
त्तरामारभेतेति तत्प्राणसंततं भवतीति विज्ञायते। श्रूयत इत्यर्थः। उत्तरमग्निमनुव्रजन्तुत्तराः अनुब्रूयादि
ति शेषः। द्वयोः प्रणीयमानत्वादुत्तरमिति विशेष्यते। अग्निद्विले प्याहवनीयद्वित्वाभावान्मंत्राणामूहो नास्ति। इ
मं महे विदथ्याय शूषमयमिह प्रथमो धायि धातृभिरिति तु राजन्यवैश्ययोर्याज्ये समानजातीयत्वादेताभ्यां याधः
प्रदेवमित्यस्याः। अयं राजन्यवैश्ययोर्विशेषः। अन्यत्समानं। पश्चादुत्तरस्या वेदेरवस्थाय। शेषं समापयेदि
ति शेषः। वेदिद्वित्वादुत्तरस्या इत्युच्यते। उत्तरवेदेस्तु सोमेषु। पश्चादवस्थाय समापयेदिति शेषः। निहितेग्नौ सी
दहोतः स्व उलोके चिकित्वान्निहोता होतृषदने विदान इति द्वे परिधाय तस्मिन्नेवासन उपविश्य भूर्भुवः स्वरिति वा
चं विसृजेत। अत्र निहितेग्नावित्युत्तरादानस्यानिमित्तं नाध्वर्युसंप्रैषः। तस्मिन्नेवेति यस्मिन्निदमनुवचनमार
ब्धं तस्मिन्नेवेत्यर्थः। अन्यत्रापि यत्रानुब्रुवन्ननुव्रजेत्। तत्राप्येवं कर्तव्यमिति शेषः। अनुब्रुवन्निति व

Indira Gandhi National
Centre for the Arts

चनं अनुवचनएवैतस्या न्वाभिष्टवनादिष्विलेवमर्थः॥ तिष्ठत्संप्रैषेषुनथैववाग्विसर्गः। तिष्ठतः संप्रैषेतुति
७३ ष्ठत एववाग्विसर्गोभवति। अग्निमंथनादिसमानावैश्वदेव्याः इत्यमिष्टिर्वैश्वदेव्या समाना भवति। द्वयोरपिम
थ्यमानयोरग्निद्वित्वंनास्ति। एकस्यैवायमग्नेर्विभागइतिकृत्वा। नहेनाहवनीयाभिधायिनां प्रयोगसिध्यर्थम
ग्निमंथनादिसमानावचनं। हविषांतुस्थाने षष्ठप्रभृतीनामिंद्राग्नीमरुतोवरुणः कः। अयमत्र विशेषः। षष्ठ्या
द्या स्तिस्रउद्धत्यइंद्राग्न्यादयश्चतस्रः कर्तव्या इति। इंद्राग्नी अवसागतंअथदक्षमुतसनोतिवाजं मरुतो यस्य
हिक्षयेगराइवेदवरमोअहेवेमंमेवरुणस्तुधितत्वायामिब्रह्मणा वंदमानः कयानश्चित्रआभुवद्धिरण्यगर्भः
समवर्तताग्र इति। प्रतिप्रस्थातावाजिनेतृतीयः। उपहवमाचनेयंतृतीयोभवति। भक्षणेचतुर्थः। उपहव ७३
याचनंहोत्रादियजमानांतं। होतुरध्वर्यो॥ यजमानस्याग्नीदंतं। भक्षणंतुहोत्रादियजमानं। तमेव। वैश्वदे
व्यामप्येवमेव। संस्थितायामवभृथंव्रजंति। संस्थितायामिष्टौ। अवभृथकर्मार्थमुदकंगछंत्यध्वर्युवद्

स्यर्थः। तत्रावभृथेष्टिः कृताकृता। कृतिरेवकृतंकृतं चाकृतं चयस्याः साकृताकृता अनित्येत्यर्थः। इष्ट्यभावे
यदन्यद्चवधानादितत्सर्वंभवति। तामुपरिष्टाद्व्याख्यास्यामो द्वयोर्मासयोरैंद्राग्नः पशुः। वरुणप्रघासपौ
र्णमासीमारभ्य तृतीयस्यां पौर्णमास्यामित्यर्थः। अनेनचातुर्मास्यांगत्वेनपश्वंतरं विधीयते। नानेननिरूढप
शोविधीयते। अतोनिरूढोपिस्वकालेकर्तव्य एव। ५॥ तथाततः साकमेधाः। यथावरुणप्रघासेभ्यः ऐंद्राग्नः त
थैंद्राग्ना साकमेधाः। द्वयोर्मासयोरित्यर्थः। अनीकवदादीनामादित्यांतानां साकमेधा इति नाम। पूर्वेद्युस्तिस्र
इष्टयोनुसवनं। यस्यां पौर्णमास्यां साकमेधायष्टव्यास्तस्याः पूर्वेद्युः सवनेसवनेएकैकेष्टिः कार्या। प्रथमा
यामग्निरनीकवान्। अनीकवंतमूतयेग्निंगीर्भिर्हवामहे। सनः पर्षदतिद्विषः। सेनानीकेनसुविदत्रो अस्मे इति
उत्तरस्यां वृधन्वंतौ मरुतः सांतपनाः सांतपनाइदंहविर्योनोमरुतोअभिदुर्हृणायुरिति। मरुद्भ्यो गृहमेधेभ्यउत्त
राज्यभागप्रभृतीक्रांता। मरुतोगृहमेधादेवताः। आज्यभागप्रभृतिश्चसाइक्रांताचेति आज्यभागप्रभृतीक्रां

Indira Gandhi National
Centre for the Arts

ता। गृहमेधास आगत प्रबुध्या वर्ईरते महांसीति। आम्नातत्वादेते एव गृहमेधिभ्यो भवतः। पुष्टिमंतौ विराजौ संयाज्ये अनिगदे। इहविराजौ संयाज्ये इत्युक्ते तेसंयाज्ये अनिगदे निगदरहिते भवत इत्यर्थः। निगद इति अयाक्
७४ याज्ये अनिगदे। इहविराजौ संयाज्ये इत्युक्तेतेसंयाज्ये अनिगदे निगदरहिते भवत इत्यर्थः। निगद इति अयाक
ग्निरिसादिजुषतां हविरित्येवमंतउच्यते। अन्यत्राप्यनावाहने। गृहमेधीयादन्यत्रापि यत्रावाहनं नास्ति तत्राप्य
निगदे संयाज्ये भवतः। अन्यत्रापीति योगविभागार्थमुच्यते। तस्य प्रयोजनं। अन्यत्रानावाहने निगदे भवतः।
इहत्वावाहने अनावाहने वा अनिगदे एवेत्येवमर्थं। अत एवात्र पक्षे आवाहनमप्यस्तीति ज्ञापितं भवतीति ग
म्यते। पूर्वसूत्रे संयाज्याग्रहणस्येदं प्रयोजनमिदमनिगदत्वविधानं संयाज्यामात्रस्य न विराज एवेति ज्ञापना
र्थं। आवाहनेपि पित्र्याम्पशौ च। अनयोरावाहनेसत्यपि अनिगदे एव भवतः। बहु चैतस्यां रात्र्यामन्नं प्रसु ७५
वीरन्। प्रसुवीरन्निति बहुवचनं। लोकेयष्टारो बहव इति प्रसुवीरन्दद्युरित्यर्थः। एतस्यां रात्र्यामिति वचना
दात्राविवेष्टिः परिसमाप्यत इति गम्यत इति। तस्या विवासे पौर्णदर्वं जुहुयुः। विवासो रात्र्याः पश्चाद्भागः।

पौर्णदर्वमिति कर्मनाम। तत्तस्मिन्काले कर्तव्यं। ऋषभेरवाणे। ऋषभे रुवति। स्तनयित्नौ वा। मेघे वा रु
वति। आग्नीध्रं हैके रावयंति ब्रह्मपुत्रं वदंतः। तस्याप्यभावे ब्रह्मपुत्रशब्देनाग्नीध्रं संबोध्य रावयंति। ब्रह्मपु
त्र रोरुहीत्येवं। यदि होतारं चोदयेयुस्तस्य याज्यानुवाक्ये। पूर्णा दर्वि परापत सुपूर्णा पुनरापत। वस्नेव विक्रीणा
वहा इषमूर्जं शतक्रतो। देहि मे ददामि ते नि मे धेहि नि ते दधे। अपामित्यमिव संभर क्षेत्रं बादददते ददिति। एत
त्कुर्वंतो ध्वर्मवो यदि होतारमपि चोदयेयुः। अनुब्रूहि यजेति तदेते याज्यानुवाक्ये भवतः। शतक्रतुलिंगा
छास्त्रांतरे ऐंद्रं पौर्णदर्वमित्याम्नानाच्च। इंद्रोस्य देवता भवति। मरुद्भ्यः क्रीडिभ्य उत्तरा। इष्टिरित्यर्थः। उतस्तुवं
तुजंतवो यं रुद्रस्तु रगभीत इति परोक्षयात्र्यो। आज्यभागौ परोक्षवार्त्रघ्नौ भवतः। क्रीडं वः शर्द्धो मारुतमत्यासो न
येमरुतः स्वंचः। क्रीडिनामेते आम्नाते। अक्रीडिनाम प्येते याज्यानुवाक्ये भवतः। जुष्टो दमूना अग्ने शर्द्ध मह
तेसो भगायेति संयाज्ये। वाजिनावभृथवर्जं माहेंद्रुक्तावरुणप्रघासैः माहेंद्रीति शिनाम। आमिक्षाभावादेव

Indira Gandhi National
Centre for the Arts

७५ वाजिनाभावे सिद्धे वाजिनप्रतिषेधं कुर्वन् वाजिनस्य प्रधानसंबंधं दर्शयति। तेन वाजिनस्य मध्यमः स्वरः सा
धितो भवति। हविषां तु सप्तमादीनां स्थाने। इंद्रो वृत्रहेंद्रो महेंद्रो वा विश्वकर्मा। वृत्रहा वृ इंद्रस्य गुणः। आद्या
स्तिस्रो विकल्पंते। विश्वकर्मा त्वष्टुः। अतोष्टावत्र देवताः। आ त न इंद्र वृत्रहन्न नु ते दा यिमह इंद्रियाय विश्वकर्म
न्हविषा वावृधानो या ते धामानि परमाणि यावमेति ॥१६॥ दक्षिणाग्नेरग्निमतिप्रणीय पित्र्या। दक्षिणाग्नेर
ग्निमानीयातीत्य तं देशमन्यत्र निधाय तस्मिन्नग्नौ पित्र्या नाम कर्म कर्तव्यं। अतिप्रणीय पित्र्येति वचना
त्तस्मिन्नेव पित्र्या भवेत्। नैमित्तिकं त्वाहवनीयादिष्वेव। आहवनीयोप्यत्र विहरणीयः। उत्तरत्रोपस्थानदर्श
नात्। साग्न्यंत्ता। साग्रहणं योगविभागार्थं। योगविभागप्रयोजनमनतिप्रणीतचर्यायामापि शंयुंतादिध
र्मप्रापणार्थं। लुप्तजपा होतारमवृथा च षड्गुणत्वमंत्रणाभिहिंकारवर्जं। जपशब्देनात्र न केवलो जप एव गृ ७५
ह्यते। किंतु अत्र मंत्रणलोपप्रतिषेधात् जपादीनां वर्णामुपलक्षणार्थं इति गम्यते। नान्यस्योपांशुप्रयोज्यस्या

पि। तेनैकाग्निगदस्यालोपः सिद्धो भवति। लुप्तजपाय स्याः सा लुप्तजपा होतारमवृथा इत्यस्य निगदैकदेशस्यो
पांशुत्वसिध्यर्थं न जपेदिति वचनेन जपशंकया लोपशंकानिवृत्त्यर्थं। तद्वर्जनवचनं। इतरयोः प्राप्तस्य प्रतिप्र
सव एव। तस्यां प्राचिकर्माणि दक्षिणा। तस्यामिति वचनं कृत्स्नप्राप्त्यर्थं। प्रकृत्वात ऊर्ध्वमित्यत्रापि प्रापणार्थं। या
नि प्रकृतौ प्राचिकर्माणि प्राङ्मुखानीत्यर्थः। तान्यस्यां दक्षिणामुखानि कर्तव्यानीत्यर्थः। इतराणि तथान्वयं। यानी
तरदिङ्मुखानि प्रकृतौ तान्यस्यां निर्दिष्टदिक्कानि अनिर्दिष्टदिक्कानि च तथान्वयं कर्तव्यानि। दक्षिणां दिशं प्राचीकृ
त्वा तदनुसारेणान्यदिङ्मुखानि कर्तव्यानीत्यर्थः। उक्तं तस्त्वा निधीमहीत्येतां त्रिरनवानं ता सामिधेन्यः। एता
मृचं त्रिरनुब्रूयात्। तादृशत्व चनात् एव सामिधेन्यो न पुनरभ्यसितव्या इत्यवगम्यते। तासामुत्तमेन प्र
णवेनावहदेवानग्नित्वमन्यजमानायेति प्रतिपत्तिः। तासां सामिधेनीनामुत्तमेन प्रणवेनावहदेवान्सिद्धन्यजमानाये
ति प्रतिपत्तिरेव संधेया। तेनाग्ने महानित्यादि परिभरषी संतं लुप्यते। प्रतिपत्तिश्चैवं रूपा भवति पित्र्यायां। प्रकृतौ

Indira Gandhi National
Centre for the Arts

देवा इज्यंत इति तेषां संकीर्तनं कृतं। इह च देवाश्च पितरश्चेज्यंत इति पितृशब्दोऽपि प्रयोक्तव्य इति। सर्वत्र देवशब्द-
७६ पि वति मंत्रे पितृशब्दे प्रयोज्यत्वेन प्राप्ते स्वार्थ एव देवशब्दः प्रयोज्यो न परार्थ इति कृत्वाचार्योऽन्यत्र परार्थत्वात् प्रयोगं पितृमेधः २
मन्यमानः तत्सहितं प्रतिपत्तिवाक्यं पठितवान्। तेनान्यत्र पितृशब्दो न प्रयोक्तव्य इति सिद्धं। प्रतिपत्तिवाक्यमुक्त्वा
ततो वक्ष्यमाणदेवता आवाहयेत्। अग्निं होत्राय वह स्वं महिमानमावह इत्येतस्य स्थानेऽग्निं कव्यवाहनमावाहयेत्।
आज्यपांतदेवता आवाह्य प्राकृतस्य स्विष्टकृतः। वाहनस्योहं कृत्वा तत्स्थानेऽग्निं कव्यवाहनमावाहयेत्। उत्त-
मे चैनं प्रयाजे प्रागाज्यपेभ्यो निगमयेत्। उत्तमे च प्रयाजे प्रागाज्यपेभ्यः अग्निं कव्यवाहनं निगमयेत्॥ सूक्त-
वाके चाग्निर्होत्रेणेत्येतस्य स्थाने। निगमयेदिति वर्तते। नेह प्रादेशः। कार्यार्थत्वान्मंत्राणां मंत्रलोपेऽपि कार्यस्या-
लोप इति कृत्वा कार्यस्यापि प्रतिषेधः क्रियते। न बर्हिष्मंतौ प्रयाजानुयाजौ। नेडायां भक्षभक्षणं। भक्षेषु प्राणभ- ७६
क्षमिति प्राप्ते इडायां भक्षणमेव नास्ति। कः प्रसंगः प्राणभक्षस्येत्यर्थः। भक्षणवचनं प्रकृतावप्यंतरेडाभक्षा-

दन्य इडाभक्षोऽस्तीति ज्ञापनार्थं। इडायामिति सप्तमीनिर्देशादिडाविषयं यद्भक्षणमिति गम्यते। नेडाया एव भक्ष
इति। तेनावांतरेडाभक्षणमिडाभक्षणमिडाभक्षणं च अत्र नास्तीति गम्यते। न मार्जनं। इडाभक्षणांगत्वाद्देवमा-
र्जनाभावे सिद्धे तदभाववचनं तदंगत्वज्ञापनार्थं। न सूक्तवाके नामादेशः। सूक्तवाके यद्यजमाननाम तन्नाऽदेश्यं।
सूक्तवाकवचनं स्रुगादापनादि प्रध्वर्योर्दिशा द्वा प्रसंगनिवृत्त्यर्थं। ईक्षितः सीद होतरिति वोक्त उपविशेत्। उत्तर-
स्योपवेशनस्येदं निमित्तद्वयं विधीयते। प्रादेशकरणाद्यर्थत्वात्सर्वस्य तदभावेऽभावः। प्रादेशस्याभाव उक्तः। अ-
नुमंत्रणमपि नास्ति। अनुमंत्रणाप्यायनोपस्थानानां मंत्ररूढरूपत्वात्क्रियायां मंत्राभावे क्रियाया अप्यभाव
इति। तस्मादत्र पूर्वमुपवेशनं नास्ति। मानुषशब्दप्रत्याम्नाय ईक्षणादितत्त्वाल्लोपविशेदित्युक्तत्वादभिक्रमणा-
दि सर्वं न भवति। निरसनोपवेशनबर्हिरुपस्पर्शनानि मंत्ररहितानि कुर्यादेव। जीवानुमंतौ सव्योत्तर्युपस्थाः प्रा-
चीनावीतिनो हविर्भिश्चरंति। उपस्थविधानं येषां तदंगं तेषामेव। हविर्ग्रहणं प्रधानेष्वयं धर्म इति ज्ञापनार्थं।

Indira Gandhi National Centre for the Arts

तेनप्रधानमध्येपियस्मायश्चित्तलेनप्राप्तंतस्यायंधर्मोनभवतीतिगम्यते। दक्षिणआग्नीध्रउत्तरोध्वर्युः। इहेहअ
७७ नुवाक्ये। अध्वर्युर्मन्त्रयाने। अत्रानुवाक्या कार्यस्यैकत्वान्मध्ये प्रणवो नास्ति। ॐ स्वधेत्याश्रावणं। अस्तु स्वधेति
प्रत्याश्रावणं। अनुस्वधास्वधेतिसंप्रैषः। द्वावेतौसंप्रैषौ। अनुस्वधाइत्येकः स्वधेत्यपरे एकवचनं ज्ञात्याभिप्रा
ये। अनुस्वधास्वधेतिदीर्घः पठितव्यः। येस्वधेत्यागूर्ये स्वधामहइतिवा। स्वधानमइतिवषट्कारः। अत्रओंस्व
धेत्यादयः स्वधाशब्दाः दीर्घाताएवप्रयोक्तव्याः। अध्वर्युसंप्रैषपाठप्रयोजनं। तदेवस्मृत्वास्य कार्यकरणार्थं। नि
त्याः स्तुतयः। उक्ताः स्तुतयः प्रकृतावाद्येष्टितीयेउपांत्येवा यदक्षरस्या स्तुतिः एते स्विष्टकृदस्य स्यैवकार्येत्यर्थः।
पितरः सोमवंतः सोमोवापितृमान् पितरो बर्हिषदः पितरोग्निष्वात्तायमः। पितॄणां सोमवत्त्वागुणाः। सोमस्य ७७
पितृमत्तागुणः। बर्हिषदोग्निष्वाता इतिचपितॄणामेवगुणः। आद्येवैकल्पिके। उदीरतामवरउत्परासस्त्वयाहि
नः पितरः सोमपूर्वउपहूताः पितरः सोम्यासस्त्वंसोमप्रचिकितोमनीषासोमोधेनुंसोमोअर्वंतमाशुंत्वंसोमपि

तृभिः संविदानोबर्हिषदः पितरऊत्यर्वागाहंपितॄन्त्सुविदत्रां अविसीदंपितृभ्योनमोअस्तुयाग्निष्वात्ताः
पितरएहगच्छतयेचेहपितरोयेचनेहयेअग्निदग्धायेअनग्निदग्धाइमंयमप्रस्तरमाहिसीदेतिद्वेपरेपिवांसंप्र
वतोमहीरनुपंथानांतिस्वस्तिस्वऋचः। वैवस्वतायचेन्मध्यमायाज्या। यद्दियमोवैवस्वतोदेवतातत्उत्तमेत्रि
केमध्यमाऋग्याज्याभवति। प्रथमोत्तमेअनुवाक्येइति। येतातत्पुर्देवत्राजेहमानास्त्वदग्नेकाव्यात्मनी
षाः समप्रत्नथासहसाजायमानइति। स्विष्टकृतइतिशेषः। अग्निःस्विष्टकृत्कव्यवाहनः। प्रकृतौयोअग्निः
स्विष्टकृत्। इहतत्कार्यकरोऽग्निः कव्यवाहनइत्यर्थः। तेनात्रस्विष्टकृच्छब्दोनप्रयोक्तव्यः। प्रकृत्यातऊर्ध्वं।
स्विष्टकृतऊर्ध्वंप्रकृत्याभवति। सव्योत्तर्युपस्थादयोनभवंतीत्यर्थः। वचनमिदंस्विष्टकृत्स्वपिप्रापणार्थं। अं
गत्वादेवउत्तरत्रप्राप्त्यभावात्। वषट्कारक्रियायांचोर्ध्वमाज्यभागाभ्यामन्यन्मंत्रलोपात्। मंत्रलोपशब्देनप्र
वोक्ताः सर्वेविकारालक्ष्यंते। तेभ्यान्येषां सव्योत्तर्युपस्थतादीनामभावायप्रकृतिभावोविधीयते। प्रधानेष्वपि

Indira Gandhi National
Centre for the Arts

प्रकृतिवत्स्वधाकारं वर्जयित्वा वषट्कारेण क्रिया चेत् ऊर्ध्वमाज्यभागाभ्यामिति वषट्कारक्रियास्थानलक्षणा
७८ र्थं। तेनाज्यभागाभ्यामूर्ध्वं स्विष्टकृत्पर्यंते स्थाने वषट्कारक्रियायां प्रकृत्याभवतीति गम्यते। तत्र मंत्रलोपा
दिः पूर्वो विकारः सर्वप्रकारायां पिंडपितृयज्ञ समाप्तेर्भवत्येव। एकैका चानुवाक्या। प्रकृतिभावादेवएकत्वे सिद्धे
एकत्ववचनमिदं तयोरेकैकस्याग्रहणार्थं। यो अग्निः क्रव्यवाहनस्त्वमग्न ईळितो जातवेद इति संयाज्ये। वष
ट्कारक्रियायामेवाभक्षेषु प्राणभक्षान्भक्षयित्वा बर्हिष्यनुप्रहरेयुः। संस्थितायां प्राग्वानुयाजाभ्यां दक्षिणा
वृतो दक्षिणाग्निमुपतिष्ठंते। उभयतो विहारादनियमे प्राप्ते नियमार्थं दक्षिणावृद्वचनं। अनावृत्यानतिप्रणी
तचर्यायां। अनतिप्रणीतचर्यायां पित्र्यायां आवर्तनमकृत्वैवोपतिष्ठंते। तथैवाभिमुखत्वसंभवात्। अ
याविष्ठा जनयन्कर्वराणि सहि घृणिरुरुर्वराय गातुः सप्रत्युदैद्धरुणो मध्वो अग्रं स्वायत्तनूं तन्वामैरयतेति। ५८
अयं दक्षिणाग्नेरुपस्थानमंत्रः आवृत्य त्वेवेतरौ। अतिप्रणीतचर्यायां दक्षिणावृद्दक्षिणाग्नेरुपस्थानमुक्तं।

अनतिप्रणीतचर्यायामनावृत्य तस्यैवोपस्थानमुक्तं। इदानीं गार्हपत्याहवनीययोरुपस्थानमुच्यते। तुशब्दो वि
शेषविध्यर्थः एवशब्दोवधारणार्थः। अतिप्रणीतचर्यायामनतिप्रणीतचर्यायां च गार्हपत्याहवनीययोः आवृ
त्यैवोपस्थानमिति। आहवनीयं सुसंदृशं त्वेति पंक्त्या। पंक्तिवचनं प्रतीकसंदेहनिवृत्त्यर्थं। गार्हपत्यमग्निं तम
न्य इति। एकया चानया सूक्तेन उत्तरत्र सूक्तवचनात्। अथैनमभिसमायंति। मा प्रगाम मा न्वेत्वं न इति जपंतः। एते
सूक्तेजपंतः। एनं गार्हपत्यमभितः समायंति। प्राग्दक्षिण्येन। पूर्वेण गार्हपत्यं सूक्ते समाप्यसव्यावृतस्त्र्यंबकान्व्र
जंति। गार्हपत्यस्य पुरस्ताद्यो देशः तस्मिन्देशे यथा सूक्ते समाप्येते तथा समापयंति सूक्तग्रहणमग्निं तमन्य इ
त्यत्र तृचो ग्रहणार्थं। यदीष्टिं समाप्योपतिष्ठेते तदा तत्र त्र्यंबकान्व्रजंति। यदानूयाजाभ्यां प्राक् तदा समा
प्येष्टिं त्र्यंबकार्थं व्रजेयुः। त्र्यंबका नाम कर्मविशेषाः तत्राध्वर्यवः कर्माधीयते। तत्र यदध्वर्युणोक्तं तदस्माभि
रपि कर्तव्यमित्यर्थः। प्रत्येत्यादित्यं याचंति। अदितिरत्र देवता नादित्यः। आदित्यानां याज्यानुवाक्याः नाम्ना

Indira Gandhi National
Centre for the Arts

तापुष्टिमंतौ धाय्ये विराजौ॥१७॥ पंचम्यां पौर्णमास्यां शुनासीरीयम्। साकमेधकालमारभ्य या पंचमी पौर्णमा
७९ सी तस्यां शुनासीरीया कर्तव्या। शुनासीरीयेति कर्मनाम। अर्वाग्पथोपपन्निता। पंचम्याः पौर्णमास्या अर्वाग
पि यत्र काले कर्तुं संभवति तत्र वेत्यर्थः। ततो ग्रहेष्वहे इति शास्त्रांतरोक्त इत्यर्थः। वाजिनवर्जं समाना वैश्वदे
व्या। हविषां तु स्थाने षष्ठप्रभृतीनां वायुर्नियुत्वान्वायुर्वा शुनासीराविंद्रो वा शुनासीर इंद्रो वा शुनः। सूर्य उत्तमः।
नियुत्वानिति वायोर्गुणः। शुनासीरः शुनश्च इंद्रस्य गुणौ। प्रथमद्वितीयौ वैकल्पिकौ। पुनस्त्रयोपि विकल्पेन।
सूर्यस्योत्तमवचनं देवतांतरप्रवेशेपि सूर्य उत्तम एव। अन्यत्र क्रमांतरं भवतीति एवमर्थं। आवायो भूष शुचिपा
उप नः प्रयाभिर्यासि दाश्वांसमक्ष सत्वं नो देव मनसेशानाय प्रहुतिं यस्त आनट् शुनासीराविमां वाचं जुषेथां शु
नं नः फाला वि कृषंतु भूमिमिंद्रं वयं शुनासीरमस्मिन्यज्ञे हवामहे। स वाजेषु प्र नोविषत्। अश्वायंतो गव्यंतो वाजयं ७९
तः शुनं हुवेम मघवानमिंद्रमश्वायंतो गव्यंतो वाजयं तस्तरणिर्विश्वदर्शतश्चित्रं देवानामुदगादनीकमिति या

ज्यानुवाक्याः। याज्यानुवाक्याग्रहणं या अस्मिन्प्रकरणे आम्नाता याज्यानुवाक्यास्ता एव एतत्प्रकरणसंबंधिनीनां
देवतानां शास्त्रांतरादागतानामपि कथंचिदपि संभवे ग्रहीतव्याः नान्या इत्येवमर्थं। समाप्य सोमेन यजेताशक्तौ
पशुना। चातुर्मास्यानामेतावंगभूतौ पशुसोमौ निरूढज्योतिष्टोमप्रकृतिकौ समाप्तिनिमित्तत्वादनयोः। चातुर्मास्या
नि वा पुनश्चातुर्मास्यानि वा पुनः। चातुर्मास्यैरिति वक्तव्ये अन्यथा वचनं नेमानि तदंगभूतानीति ज्ञापयितुं। तेन पुर
ने पितान्येवाभ्यसितव्यानीति गम्यते। अभ्यासपक्षे समाप्तावपि नैव पशुसोमौ कर्तव्यौ। तस्य पक्षस्य पूर्वाभ्यां सह वै
कल्पिकत्वात्। वरुणप्रघासेषूच्यते। अग्निहित्वाभावादग्निवाचिनाम ऊहः। घृतवती स्वश्चाध्वर्य आस्येथां
विश्ववारा इत्यूहः। वेदोसीत्यत्र वेदविषयाणां पदानामूहः। अन्यदप्येवं रूपमस्ति चेत्तदन्वेषणीयं॥१८॥ इत्याश्व
लायनसूत्रवृत्तौ नारायणीयायां द्वितीयोध्यायः॥२॥ हरिः ॐ॥ पशौ। अधिकारोयं प्राक्प्रायश्चित्ताधिकारा
त्। पशुगुणकं कर्म पशुरित्युच्यते। इष्टिरुभयतोन्यतरतो वा। तस्य पशोरुभयतः अन्यतरतो वा इष्टिः कर्तव्या।

Indira Gandhi National
Centre for the Arts

आग्नेयी वा। या सा विशिष्टिः पशोरुभयतो ऽन्यतरतो वा कर्तव्यत्वेन चोदिता साग्निर्देवत्या वा भवेदित्येकोऽर्थः। अप
८ रस्त्वार्थो वा। यद्यालभ्यते। येयमाग्नेयीष्टिः पशोरुभयतोऽन्यतरतो वांगत्वेन विहिता सा न भवेदिति। तेनेयमिष्टि
रनित्सोत्सवगंतव्या। अतः सिद्धं स्वतंत्रेषु पशुषु कर्तव्या अंगभूतेषु न कर्तव्येति। आग्नावैष्णवी वा। इष्टेः कर
णपक्षे देवताविकल्पो नेन विधीयते। उभे वा। आग्नेयी चाग्नावैष्णवी च एकस्मिन्पशुप्रयोगे द्वे वा इष्टी भवतां। अ
न्यतरा पुरस्तात्। यदा उभे स्यातां तदैका पुरस्तादितरोपरिष्टादित्येवं भवतः। नोभे संहते उभयतो अन्यतरतो वा
भवेतामिति सूत्रार्थः। उक्तमग्निप्रणयनं। उक्तग्रहणं वारुणप्रघासिकस्य सविधिकस्य ग्रहणार्थं। पश्चात्पा
शुबंधिकाया वेदे रुपविश्य प्रेषितो यूपायाज्यमानायां जंतित्वामध्वरे देवयंत इत्युत्तमेन वचनेनार्धर्च आ
रमेत्। वेद्यंतरस्याभावेपि पाशुबंधिकाया इति विशेषणं तत्स्थाने तद्द्रुपचारसिध्यर्थं। प्रेषितवचनं ब ८
हुयूपके कर्मणि अंजनादीनां पदार्थानुसमये क्रियमाणे प्रेषितः प्रेषितोऽनुब्रूयादित्येवमर्थं। यूपाया

तेन चात्वालोत्करांतरेण प्रवेशः इति शेषः

ज्यमानायेति यूपमज्यमानमभिधातुमेतामृचमनुब्रूयादित्यर्थः। तस्याउत्तमेन वचनेनेति संबंधः। उच्छ्र
यस्व वनस्पते समिद्धस्य श्रयमाणः पुरस्तादूर्ध्व ऊ षु ण ऊतय इति द्वे जातो जायते सुदिनत्वे अह्नामित्यर्धर्च आर
मेद्युवा सुवासाः परिवीत आगादिति परिदध्यात्। परिदध्यादिति वचनं पदार्थानुसमये प्रतिपदार्थं नानुवचन
समेदिति ज्ञापनार्थं। यत्रैकतंत्रे बहवः सपशवो बांतं परिधायसंस्तुयादनभिहिंकृत्य यान्वो नरो देवयंतो निमिम्यु
रितिषड्भिः। यस्मिन्कर्मणि एकस्मिन्नेव पशुतंत्रे बहवो यूपाः सपशवश्चतत्रोत्तमनुवचनं परिधायसंस्तुया
द्यूपान्। कांडानुसमयाभिप्रायेणेदमुच्यते अंत्यमिति तदानुवचनस्य भिन्नत्वात्पदार्थानुसमये त्वेकमेवा
नुवचनं भवति। एकतंत्र इति वचनं एककर्ममात्रनिवृत्यर्थं। बहव इति द्वयोर्निवृत्यर्थं। सपशव इति अपशु
कबहुत्वनिवृत्यर्थं। पंचभिर्वा। अनभ्यासमेके। प्रथमोत्तमयोरनभ्यासमित्यर्थः। उक्तमग्निमंथनं तथा धा
य्ये कृताकृतावाज्यभागावावाहने पशुदेवताभ्यो वनस्पतिमनंतरं। आवाहयेदिति शेषः। आवाहनग्रहणं

Indira Gandhi National
Centre for the Arts

आवाहनादिष्वेष्टिकेष्वेव निगमेषु निगमनं वनस्पतेर्न पाशुकेष्विस्येवमर्थं। अतः सूक्तवाकप्रैषे निगमनं न
८१ कर्तव्यं भवति। संमार्गैः संमृज्य प्रवृताहुतीर्जुहुयात्। संमार्गैः संमृज्योदकं स्पृष्ट्वा प्रवृताहुतीर्जुहुयात्। प्रवृ
ताहुतीरिति कर्मनामनगुणविधिः। जुष्टो वाचे भूयासं जुष्टो वाचस्पतये देवि वाक्। यद्वाचो मधुमत्तमं तस्मि
न्माधाः सरस्वत्यै वाचे स्वाहा। पुनरादाय पंच विप्राद् स्वाहा वाचे स्वाहा वाचस्पतये स्वाहा सरस्वत्यै स्वाहा सरस्वते म
होभ्यः संमहोभ्यः स्वाहेति। सकृद्गृहीतैकां हुत्वा पुनः सकृद्गृहीत्वा पंचाहुतीर्जुहुयात्। आहुतिसंख्याभेदा
देवद्वयभेदेऽपि सिद्धे वियाहवचनं मंत्रविग्रहणार्थं। सोम एवैके। सोमशब्देन सोमस्य महद्रूपत्वेन सोम एवाहनि
अयं होमो नान्यस्मिन्निस्येके। प्रशास्तारं तीर्थेन प्रपाद्य दंडमस्मै प्रयच्छेद्दक्षिणोत्तराभ्यां पाणिभ्यां मित्रावरुणयो
स्त्वा बाहुभ्यां प्रशास्त्रोः प्रशिषा प्रयच्छामीति। विहारे प्रपदनस्य तीर्थेनेव सिद्धत्वात्तीर्थेनेति वचनं प्रशास्त ८१
स्तीर्थेन प्रपद्यस्वेति संप्रैषलाभार्थं। प्रदानमंत्रो मित्रावरुणयोस्त्वेत्यादि। तथा युक्ताभ्यामेवेतरो मित्राव

रुणयोस्त्वा बाहुभ्यां प्रशास्त्रोः प्रशिषा प्रतिगृह्णाम्यवक्रो विथुरो भूयासमिति। प्रतिगृह्णीयादिति शेषः।
तथा युक्ताभ्यामिति दक्षिणोत्तराभ्यां पाणिभ्यामित्यर्थः। प्रतिगृह्योत्तरेण होतारमतिव्रजेद्दक्षिणेन दंडं हरेन्न
चानेन संस्पृशेदात्मानं वान्यं वा प्रैषवचनात्। अनेन दंडेनात्मानमन्यं वा न संस्पृशेत्। आप्रैषवचनात्। याव
त्प्रैषोच्चारणं नास्ति तावदयं नियमः। आरब्धे प्रथमे प्रैषे नायं नियमः। अन्यान्यपि यज्ञांगान्युपयुक्तानि न
विहारेण व्यवेयात्। अन्यान्यपीति वचनात्सर्वोक्तमुत्तरेण होतारमतिव्रजेद्दक्षिणेन दंडं हरेदिति तदपि व्य
वायपरिहारार्थमेवेति गम्यते। तेनैतद्दर्शितं भवति। हविर्भिश्चाग्नयोंतरतमाः ऋत्विक्षु च प्रधानाप्रधानविशेषो
स्ति। ततः स्रुगादीनि साधनानि तेषु च विशेषोऽन्वेषणीयः। ततः कर्तारस्तेषु च स्वामी मुख्यो द्वितीयस्तृतीयश्चतु
र्थेषु विशेष इत्येवं बुध्वा एते प्रचारे कृते यज्ञांगानि विहारेणाव्यवेतानि भवंति। उपयुक्तवचनमनपयु
क्तकर्मणामेवग्रहणार्थं। सर्वार्थं चेदं सत्रं व्यवायप्रतिषेधपरत्वात्। दक्षिणे होतृषदनात्प्रक्रोवस्थाय वे

Indira Gandhi National
Centre for the Arts

पत्रवन्नपोत्र: प्रैषआदि इत्येतन्न तन्त्रं तंत्रे च न नु ब्रूयान्न वरनादिरहै चसर्वान्प्रैषान्ब्रूयादित्यादि ग्रहणं २

द्योदंडमवष्टभ्य ब्रूयात्प्रैषांश्चादेशं। वेदिश्रोण्यां बहिर्वेदिहोतृषदनं तस्य दक्षिणतो बहिर्वेदिस्वयमस्या
८२ यां तर्वेदिदंडमवष्टभ्य ब्रूयात्। प्रैषानादेशं। आप्रैषप्रेषणमित्यर्थः। यावंति प्रैषार्थानि प्रेषणानि संति ताव
त्सु प्रेषणेषु प्रैषान्ब्रूयादिति। एतदुक्तं भवति। प्रैषाम्नायपरिपठितान्सर्वान्प्रैषान्मैत्रावरुण एव प्रेषितः
प्रेषितो नु ब्रूयादित्यर्थः। चशब्दो मैत्रावरुणानुकर्षणार्थः। तेन ज्ञापते व्यवाय प्रतिषेधस्तंत्रं सर्वार्थमिति। अ
नुवाक्यां च स प्रैषे। पूर्वां प्रैषात्। अनुवाक्यां ब्रूयादिति शेषः। पर्यग्निस्तोकमनोतान्नीयमानसूक्तानि
च। एवंभूतमैत्रावरुणानुकर्षणार्थश्चशब्दः। सोम आसीनोन्यत्। उक्तेभ्यो यदन्यन्मैत्रावरुणस्य सोम
कर्मोक्तिं तदासीनो ब्रूयात्। सोमेष्वेतानि तिष्ठन्नेव ब्रूयादित्यर्थः॥१॥ एकादश प्रयाजाः पशावेकादश ८२
प्रयाजा इति नियम्यते सर्वत्र सर्वेषां। तेषां प्रैषाः। तेषां प्रयाजानां प्रैषा अपि भवंति ते चैते इत्याह। प्रथ
मं प्रैषसूक्तं। उक्तं द्वितीये। यदुक्तं प्रकृतौ वसिष्ठादीनां नराशंसः इतरेषां तनूनपादिति। तस्माद प्रा

कृतेषु प्रैषेष्वपि स्यादित्येव · मर्थसूत्रं। अध्वर्युप्रेषितो मैत्रावरुणः प्रेष्यति प्रैषैर्होतारं। एवं सति होत्रा
नाध्वर्योः प्रैष आकांक्षणीय इत्यर्थः। होता यजत्याप्रीभिः प्रैषसलिंगाभिः। होतृग्रहणं मैत्रावरुणाधि
कारात्प्रैषसलिंगाभिरित्याप्रीष्वपि तनूनपान्नराशंसविवेकः कर्तव्य इत्यर्थः। समिद्धो अग्निरिति शुनका
नां जुषस्व नः समिधमिति वसिष्ठानां समिद्धो अद्येति सर्वेषां। वसिष्ठशुनकानामुक्ता विधीयमानत्वात्त
दन्यानां सर्वेषामिति गम्यते। आमहदन्यमिदं त्वाप्रीसूक्तं नागत्स्ये। आम्नायक्रमानुगुण्याद्वसिष्ठविध्यु
त्तरकालिकत्वाच्चास्य विधेः। तत्रास्यादीनां नाराशंस्येव वासिष्ठी आहर्तव्या प्रैषसलिंगाभिरित्युक्त्वा
त्। एवं प्राजापत्ये विशेषो वसिष्ठादीनां नाराशंस्येव। यथऋषि वा। यो यस्य ऋषिस्तदानुगुण्येन यथऋषिरं
बृनोच्यते। तथा चाप्रीसूक्तं ग्रहीतव्यं। स्वयं ऋषिनामधेयस्यानुगुण्यादाप्र्यः कर्तव्या इत्यर्थः। तत्र भ
गवता शौनकेन यथऋषिपक्षे आप्रीविवेकार्थमेव श्लोक उक्तः। कण्वांगिरोगस्त्यः शुनको विश्वामि

Indira Gandhi National Centre for the Arts

त्रो त्रिरेव च। वसिष्ठः कश्यपो वा ध्यश्वो जमदग्निरथोत्तमः। तत्र दशानां सूक्तानां प्रथमं कण्वानां सुस
८२ मिद्धो न आ वहेति। द्वितीयं तदूर्जो नामंगिरसां समिद्धो अग्न आ वहेति। तृतीयमगस्तीनां समिद्धो अद्य राजसी
ति। चतुर्थं शुनकानां समिद्धो अग्निर्निहितः पृथिव्यामिति। विश्वामित्राणां पंचमं समित्समित्सुमना इति।
अत्रीणां षष्ठं सुसमिद्धाय शोचिष इति। वसिष्ठानां सप्तमं जुषस्व नः समिधमग्ने अद्येति। अष्टमं कश्यपा
नां समिद्धो विश्वतस्पतिरिति। वाध्यश्वानां नवममग्निं मो मे अग्ने समिधं जुषस्वेळस्पद इति। शुनकवाध्य
श्ववर्जितानां भृगूणां दशमं समिद्धो अद्य मनुषो दुरोण इति। यथार्षिपक्षे विवेकोयं। प्राजापत्येतु जाम
दग्न्यः सर्वेषां। तु शब्देनात्र वसिष्ठशुनकसहितानामिति विशेषो लभ्यते। दशसूक्तेषु। प्रेषितो मैत्रावरु
णोग्निर्होतानइति त्र्यृचं पर्यग्नयेन्वाह। कालोपदेशादप्रेषितोपि ब्रूयादिति प्रेषितवचनं॥ मैत्रावरुण ८३
ग्रहणमुत्तरार्थं। पर्यग्नय इति परितः क्रियमाणमग्निमभिधातुमित्यर्थः॥ अध्रिगवे प्रेष्यो पप्रेष्य हो

तरितिवोक्तो जेदग्निरसनद्धाजमिति प्रैषमुक्त्वा तवेदिदं निदध्यात्। मैत्रावरुणग्रहणं द्वितीयेपि संप्रे
षे मैत्रावरुण एव ब्रूयादित्येवमर्थं। प्रैषपाठस्तु होतृलिंगविहितत्वात्। पूर्वस्य तु पाठः परिसंख्याभया
त्प्रेषवचनं प्रैषमित्येकवचनं विवक्षार्थं। तद्विवक्षया प्रैषैक्यसिद्धिद्वारेणानयानमस्यसाधितं भवति।
इदानीं दंडनिधानवचनात्पूर्वं निधातव्य इति गम्यते। अध्रिगुं होता हन्वंगानि देवतं पशुमिति यथार्थं।
अध्रिगुरिति देव्याः शमितार आरभध्वमित्यस्य मंत्रस्य नाम। मैत्रावरुणाधिकाराद्धोतृग्रहणं। ऊहन्नित्य
भिधेयवशेन वचनानि संनमयन्नित्यर्थः। अंगानीति वचनमध्रिगो अंगादीनां शब्दा एवोह्यंते नान्ये बर्हि
र्मातापितृभ्रात्रादय इति ज्ञापनार्थं। यथार्थमिति योयस्य शब्दस्यार्थस्तं तथोहन्ब्रूयादित्यर्थः। ऊहन्नित्यने
नैवास्मिन्नर्थे सिद्धे यथार्थमिति वचनं संव्यवहारार्थे यमूहस्य संज्ञेति ज्ञापनार्थं। पुंवन्मिथुने। मिथु
नमिति स्त्रीपुंसयोः समाहार उच्यते। अस्मिंत्समाहारे पुंलिंगेनैवोहः कर्तव्य इति नियम्यते। मेधपती।
मांगत्यथार्थवचनं पञ्चमारुतचतुर्थी देवतामर्थमभिदधाति न तवोह उत्सेनदर्थकमित्युक्तं नत्वेतदौदीनां नानीत्यस्य नोहः ॥ २

Indira Gandhi National
Centre for the Arts

स्त्रीदेवतायां मेधपत्यै इत्यादौ उक्तमपि भवतीति भाष्ये। विभक्त्यन्तरेण निर्देशः त्रिष्वपि वचनेषु पुंवदेव प्रयोगार्थ इति द्रष्टव्यः॥ ८ —

अयं शब्दो देवतावाचीतस्य स्त्रीप्रत्ययान्तस्यायं निर्देशः कृतः। तेनायमपि पदार्थो देवतावाचिनः स्त्रीप्र
८४ त्ययसंबंधादस्मिंस्तन्त्रे लभ्यते। स्त्रीदेवतेति। स च स्त्रीदेवतेति पदार्थोऽस्मिंस्तन्त्रे पुंवद्वचनस्य विधीयमा
नत्वात्स्त्रीदेवतायामभिधेयायामित्यर्थात्कल्प्यते। मेधपतिशब्दः प्रातिपदिके च पुंवद्वचनस्य विध
यत्वेनेत्येवं संप्रदायाविच्छेदादवगम्यते। अत एवं सूत्रार्थः। स्त्रीदेवतायां मेधपतिशब्दं पुंवत् ब्रूयादिति।
एवं व्याख्याय मानेऽस्मिन्सूत्रे लक्षणमनुसृतं भवति। अथो खल्वाहुर्यस्यैवावकस्येचेत्यादि। मेधायां विक
ल्पः। मेधशब्दात्पशुवाचिनः परः स्त्रीप्रत्ययः पूर्ववत्स्त्रीपशाविति निगमयति। तेन स्त्रीपशौ मेधशब्दं
पुंवद्वा स्त्रीवद्वा ब्रूयादिति विकल्पो न विधीयते। यथार्थमूर्ध्वमध्रिगोरन्यन्मिथुनेभ्यः। अध्रिगोरूर्ध्वं ८५
यथार्थमूहो भवति। मिथुनेतु सर्वत्राध्रिगुवदेव। एतदुक्तं भवति। अध्रिगोरूर्ध्वमंगादिशब्दा अन्ये चा
र्थवशेनोह्यं तेन नियमेनांगादिशब्दा एवेति। मिथुनं तु सर्वत्र पुंवदेवाभिधेयमिति। सर्वेषु यजुर्निग

देषु। न केवलमयं विधिः पश्वावेव। कथं तर्हि। सर्वेषु यजुर्निगदेषु चार्थवशेनोहः कार्यः। यजूंष्येवोच्चैः
प्रयोगाद्धि निगदा उच्यन्ते। प्रकृतौ समर्थनिगमेषु। प्रकृताविति यस्मिन्कर्मणि अर्थाभिधानार्थो यो
मंत्र उत्पद्यते तस्य मंत्रस्य तत्कर्म प्रकृतिः। समर्थो नाम यथार्थाभिधायी शब्दः। निगमा नाम मंत्राः। उत्प
न्नस्थाने ये मंत्राः यथार्थाभिधायिशब्दवंतः तेषु विकृतिषूहो भवति। ये तु पुनः प्राकृता वेदा यथार्थाभिधायि
शब्दवंतः तेषु विकृतावपि न भवत्यूह इति। प्रकृतावसमर्थनिगमसंभवानुज्ञानात्प्रकृतावूहो विद्यत इति
गम्यते। उपपन्नमेवेदं। तदर्थाभिधानार्थमेव तस्य मंत्रस्य प्रत्याम्नानात्तत्र लक्षणया गौण्या वाभिधानं क
ल्पनीयं। तस्याः कल्पनाया विकृतावप्यविशेषात्तेषां विकृतावप्यनूह एवेति युक्तमुक्तं। प्रकृतौ समर्थनिग
मेष्विति। प्राकृतास्त्वेवं मंत्राणां शब्दाः। ऊहे क्रियमाणे मंत्राणां प्राकृता एव शब्दा भवेयुः। एतदुक्तं भवति। य
दि प्रकृतौ छांदसं प्रातिपदिकं स्यात्तदा तस्मादेव विभक्त्यूहः कर्तव्यो न प्रातिपदिकसंस्कार इति। तुशब्देन

Indira Gandhi National
Centre for the Arts

न्यायविरुद्धोयमर्थ इति दर्शयति। ऊहस्यास्मदायत्तत्वयोगत्वात् भाषिकत्वमेवेति न्यायविरुद्धमपि। अस
८५ मर्थेषु नह्यवचनं छांदसस्यापि प्राकृतस्यैव वचनस्य ग्रहणमित्युभयं ग्रहीतव्यमेवेति एवमर्थं तु शब्दं प्रयु
क्तवां स्तूयमेवाचार्यः प्रतिनिधिष्वपि प्राकृता एव शब्दा इति वर्तते। नाभिरूपमामेदो हविरित्यत्र ह्यानि।
यथाकथंचित्स्यात् नो प्रतिषेधोयं। उपमेत्युपमार्थः। श्येनादयः शब्दा गृह्यन्ते॥ दैव्याः शमितार आर
भध्वमुत मनुष्या उपनयत मेध्या दुर आशासाना मेधपतिभ्यां मेधं। प्रास्मा अग्निं भरत स्तृणीत ब
र्हिरन्वेनं माता मन्यतामनु पितानु भ्राता सगर्भ्योनु सखा सयूथ्यः। उदीचीनां अस्य पदो निधत्तात् सू
र्यं चक्षुर्गमयताद्वातं प्राणमन्ववसृजतादंतरिक्षमसुं दिशः श्रोत्रं पृथिवीं शरीरं। एकधास्य त्वचमाछ्य ८५
तात् पुरा नाभ्या अपिशसो वपामुत्खिदतादंतरेवोष्माणं वारयध्वात्। श्येनमस्य वक्षः कृणुतात् प्रशसा
बाहू शला दोषणी कश्यपेवांसाछिद्रे श्रोणी कवषोरू स्त्रेकपर्णाष्ठीवंता षड्विंशतिरस्य वंक्रयस्ता अ
उहेतुदीयानानेषानेषामितिनिर्वति ४ =

नुष्ठ्योच्यावयतात् गात्रं गात्रमस्यानूनं कृणुतात्। ऊवध्य गोहं पार्थिवं खनतात्। अस्ना रक्षः संसृजता
त्। वनिष्ठुमस्य मा राविष्टोरूकं मन्यमाना नेद्वस्तोके तनये रविता रवच्छमितारः। अध्रिगो शमीध्वं सुश
मि शमीध्वं शमीध्वमध्रिगाउ अपाप। अयमध्रिगुः। अत्रो ह्यानि पदानि वक्ष्यंते। मेधपतये मेध
पतिभ्यां। मेधपतिभ्यः। मेधं। मेधौ। मेधान्। मेधां। मेधे। मेधाः। एवं वा। अस्मै। आभ्यां। एभ्यः। अस्यै।
आभ्यां। आभ्यः। एनं। एनौ। एनान्। एनां। एने। एनाः। अस्य। अनयोः। एषां। अस्याः। अनयोः। आसां। श
रीरं। शरीरे। शरीराणि। त्वचं। त्वचौ। त्वचः। वपां। वपे। वपाः। वक्षः। वक्षसी। वक्षांसि। प्रशसा। प्रश
सः। बाहू। बाहून्। दोषणी। दोषाणि। अंसा। अंसान्। अछिद्रे। अछिद्राः। श्रोणी। श्रोणीः। ऊरू।
ऊरून्। अष्ठीवंता। अष्ठीवतः। वनिष्ठुं। वनिष्ठू। वनिष्ठून्। इत्येवमूहः। मेधं। सयूथ्यः। शरीरं। वार
यध्वात्। अनूनं कृणुतात्। खनतात्। सृजतात्। शमितारः। अध्रिगाउ अपाप। इत्येतान्यवसानानि।

Indira Gandhi National Centre for the Arts

द्विपं वा स्यात्। अत्रासमप्रतिरिस्थं प्राप्ते न्यासो विधीयते इति देवयातः ४

तत्र श्लोकः। मेधं समर्थ्य शरीरस्य धादनं पूर्वं कृणुतान्नता च। अतान्मितारो अध्रिगा उ अपापा एते
८६ अध्रिगो मध्य विरामदेशः। अस्मात्परः संसर्जनात् शमितारो पापेषु पांशुः। एते त्रयः शब्दाः। स्वे स्वे स्थाने उ
पांशु प्रयोक्तव्याः। शमितार इतीतरयोर्मध्ये पाठात्तन्मध्यगत एवोपांशु भवति नान्यः। एकधा षड्विं
शतिरिति द्विर्द्विवहूनां। द्विवहूनां पशूनां संबंधिना वेतौ शब्दौ द्विर्भूयाताम्। विभक्त्यूहः समस्य वचननिवृत्त्य
र्थे एकधा षड्विंशतिशब्दस्याभ्यासो नियम्यते। पुरांतरिति वेके। अध्रिग्वादित्रिरुक्त्वा शमितारो यदत्र सुकृ
तं कृणवथास्मासु तद्यद्दुष्कृतमन्यत्र तदिति जपित्वा दक्षिणावृदावर्तते। अध्रिगो शमीध्वमित्यादि अपापां तं
त्रिरुक्त्वा शमितार इत्यादि जपित्वा दक्षिणावृदावर्तते। दक्षिणावृद्वचनं विहारादव्यावृत्तिरिति प्रापमनं द्य
ते। एतं मंत्रं जपित्वेदमेव कुर्यात्। नान्यत्किंचित् दक्षिणावृत इत्येवमर्थं। उक्तेन प्रकारेणावृत्य पृष्ठतः कृ ८६
त्वासीत। मैत्रावरुणश्च। मैत्रावरुणश्चैवमावृत्य पृष्ठतः कुर्यात्। सव्यावृतो ब्रह्मयजमा

नौ। संज्ञप्ते पशावावर्तेरन्। पुनरावर्तनकालोऽयं। तस्मादेतावंतं कालं पराञ्च एवासीरन्। आवपायां प्रेष्यमाणा
यां प्रेषितः श्लोकेभ्यो न्वाह जुषस्व सप्रथस्तममिमं नो यज्ञमिति। वपायां प्रेष्यमाणायामिति वचनं प्रेष्यमा
ण वपासंबंधि श्लोकाभिधानो नुवचनेन प्रैषेव संस्क्रियते इति ज्ञापनार्थं। प्रेषितवचनं प्रैष एवास्यानुवचन
स्य निमित्तं। नावसरविशेष इत्येवमर्थं। उक्तमादापनं स्वाहाकृतिभ्यः। स्वाहाकृत्यर्थं मत्रस्त्रुगादापनं कर्तव्यं।
तेन माध्यंदिने सवने प्राजापत्ये पुरोडाशानंतरं स्वाहाकृत्यभावादादापनं न कर्तव्यं भवति। एतदप्यत्रावगम्यते।
स्त्रुगादापनं प्रयाजार्थमेवेति। तेनाज्यभागप्रभृतिषु हविराहुतिप्रभृतिषु चैतन्न स्यात्। होता यक्षदग्निं स्वा
हाज्यस्य स्वाहा मेदस इति प्रैष उक्तमाप्रीयाज्या। दशासूक्ते द्वितीयवचनादुत्तमप्रैषो वशिष्टः स्वाहाकृत्यर्थः। तद
र्थमेवाप्रीचावशिष्टा। किमिस्मत्रोभयोर्वचनं। आप्रीवचनस्येदं प्रयोजनं। उत्तमेवाप्रीयाज्या नात्र देवता
वचना स्वाहामुं स्वाहामुमिति प्राकृताभिगंतव्येति। प्रैषवचनं विस्पष्टार्थं। वपापुरोडाशो हविरिति पशोः प्रद

Indira Gandhi National
Centre for the Arts

नानि। प्रदानानीतियागा इत्यर्थः। पश्वावेत द्रव्यसंबंधिनस्त्रयो यागाः कर्तव्या इत्यर्थः। तेषां प्रदानानीति संज्ञा।
८७ पश्वादिसंधिकारे पशोर्वचनं पशोः पशोरितिवीप्सार्थं। तेनैकदेवत्येषु बहुषु पशुषु प्रतिपशु प्रतिपशु वपाह
द्विर्भेदवत्पुरोडाशभेदः सिद्धो भवति। तानि पृथङ्नानादेवतेषु। एकदेवत्ये एकस्मिन्नपि पशौ वपापुरोडाशहवि
षां प्रैषयाज्यानुवाक्याभेदात्पृथक्भावः सिद्धः परस्परं। तथा नानादेवतेषु पशुषु वपायागानां पृथग्भावः सि
द्धो याज्यानुवाक्याभेदादेव। तथा पुरोडाशानां हविषामपि इति पृथग्भावस्य विधेयत्वादेकदेवतेषु वपानां सकृद्या
गः तथा पुरोडाशानां हविषामपीति व्यतिरेक एवात्र विधातव्यः। तानीति वचनं योगविभागार्थं। तेनैकदेवतेष्वपि व
पादीनां प्रदानत्वं भवति। एकयोगत्वे नानादेवतेष्वेव तेषां पृथक्प्रचारवत्पृथक्प्रदानत्वमपि स्यात्। योगविभा
गे सति पूर्वेण सर्वेषां प्रदानत्वमुत्तरेणैकदेवतेषु सहप्रचार इत्युक्तं। मनोता च। अवदीयमानहविरर्थत्वान्म ८७
नोताया नानादेवेषु पृथक्प्रचारे सत्यवदानस्य यागव्यवधानात्प्रतिपशु मनोता मंत्रमावर्तयेत्। न मनोताव

र्तेत्येके। एके आचार्या मनोतां नावर्तयितव्येत्याहुः। मनोतावेत्येतानाविकल्पे सिद्धे गुरुसूत्रकारेणान्यापयिक
ल्पोयमिति प्रदर्शनार्थं। तत्रैके मन्यंते आग्नेयत्वान्मंत्रस्य त्वं ह्यग्ने प्रथमो मनोतेति मनोताशब्दस्याग्नौ प्रवृत्तिद
र्शनात्। अग्निर्वै देवानां मनोतेति श्रुतेः। सं प्रैषे च हविः शब्दस्य मनोताकाललक्षणार्थत्वेनापि संभवादनुव
चनस्याग्न्यर्थत्वं। अग्न्यर्थत्वे च यागावृत्तावप्याहवनीयाख्यस्याग्नेरभेदेनाऽनावृत्तिरेवेति। आचार्यस्तु पशोर्वा आ
लब्धस्य मनोपक्रामति मनोतायै हविषोऽवदीयमानस्यानुब्रूहीत्याह मन एवास्यावरुंध इति श्रुतिः। तस्या अयम
र्थः। पशोरालब्धस्य संज्ञपनकाले जीवोपक्रामतीति स एव मनः शब्देनोच्यते। यत्ते यमं वैवस्वतं मनो जगाम दू
रकमित्यादिषु जीवे मनः शब्ददर्शनात्। जीवेऽग्निशब्दश्च दृश्यते। अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधमिति भगवद्गीतासु दर्शनात्। अग्निजीवमनसामेकार्थत्वं च दृश्यते।
अयं होता प्रथमः पश्यतेममिति दृचे। अतो वदीयमान हविषो मनोताया अनुब्रूहीत्युक्ते अग्निजीवाख्यस्य म

Indira Gandhi National
Centre for the Arts

नसोहविः सेवंधार्थमनुब्रूहीत्युक्तं भवति। अतोग्निं प्रकाशयन्अनुवचनेहविर्योजीवमेव प्रकाशयति
८८ हविरर्थमेवेतिगम्यते। तेनयागात्पूर्वो अवदानस्य पदार्थांतरव्यवधानात्प्राग्निहविर्मनोतानुवचनावृत्ति
मन्यते। अत्रनकाचिद्लक्षणास्तीतितमेवपक्षं परिगृह्णीतवानाचार्यः। तेषांसलिंगाः प्रैषाः। तेषांप्रदानानां
समानलिंगाः प्रैषाः प्रैषसमाम्नायएवपठिताः तदर्थत्वेनैव। समानलिंगाः समानदेवताइत्यर्थः। तेनैतत्सा
धितंभवति। यद्देवत्यः पशुस्तद्देवत्यः पशुपुरोडाशो भवतीतितेषामितिवचनंतेषामेवसप्रैषत्वंनाज्यभा
गयोरित्येवमर्थं। प्रैषसमाम्नायकृत्वर्थत्वात्तत्रचाज्यभागयोः संप्रैषस्यानाम्नानात्। अप्रैषावेवेतिमन्य
मानस्तेषामित्युक्तवानाचार्यः। यद्यध्वर्यवः संप्रैषोकुर्युः तदाहोतायक्षदग्निमाज्यस्यजुषतांहविर्होतर्यजेत्।
होतायक्षत्सोममाज्यस्यजुषतांहविर्होतर्यजेत्येतौप्रैषौभवतस्तदाज्यभागयोः। तेष्वग्नीषोमयोस्थानेयाया
पशुदेवता। तेषुप्रदानप्रैषेषुपश्वंतरेष्वतिदेशात्प्राप्तेषुयास्तासुविकृतिषुदेवतास्तासामेकैकामेवाग्नीषो ८८

मस्थानेनिर्दिश्ययष्टव्येनसर्वादेवताः सकृदेवनिर्देष्टव्याः। यावत्यस्तत्रदेवतास्तावत्कृत्वः प्रैषोभ्यसितव्य
इत्यर्थः। एतदर्थमेवयाथापशुदेवतेतिवीप्सावचनमुक्तं। अयमर्थोस्मिंस्तत्रेसम्यग्व्युत्पादितोग्नीषोमयो
स्थानइतिब्रुवताचार्येणाग्नीषोमीयः पशूनांप्रकृतिः पाशुकेविध्यंतेगम्यमाणइति। छागस्थानउस्त्रोगो
मेधोपिकोहयोश्वो न्यादेशव्यक्तचोदनो। गोमेषहयानामेकैकस्याजातेर्द्वौद्वौशब्दौनियम्येतेवैकल्पिकौ। ए
तदुक्तंभवति। गोजातिश्चेत्पशुश्छागस्थानेगोशब्दमुस्त्रशब्दंवाप्रयुंजीत। एवमितरयोरपिजात्योः। प्रापिको
यंविधिः। कुतः। अन्यादेशोव्यक्तचोदना। औपदेशिकस्यमंत्रस्यप्रकृतौप्रयोगः आदेशः। तस्येवातिदेशप्राप्त
स्यविकृतौप्रयोगोन्वादेशः। व्यक्तचोदनाप्रकृतिप्राप्तस्यमंत्रस्यविकृतौसंस्कृत्यपुनःपाठः। यथाप्रजापतये
च्छस्य तूपरस्यगोमृगस्येत्येवमादि। तत्रतामनुसृत्यैवमंत्राःप्रयोक्तव्याः। एतदुक्तंभवति। आतिदेशिकमं
त्रप्रयोगेयस्मात्विकृत्युपदेशमनुसृत्यैवमंत्रः प्रयोक्तुंयुज्यते। तस्माद्विकृत्युपदेशेसतिसएवभवति। त

Indira Gandhi National
Centre for the Arts

दभावेगोशब्दः उस्रशब्दो वेसेवं द्रष्टव्यं। एवं वनस्पतिस्विष्टकृत्सूक्तवाकप्रैषेषु। यथाप्रधानप्रैषेषु देवताशब्द
८९ स्यस्थाने पशुशब्दस्य च स्थाने एकैकं देवताशब्दं पशुशब्दं च कृत्वा प्रयोग उक्तः। एवं वनस्पतिस्विष्टकृत्सूक्तवा
कप्रैषेषु प्रयोगः कर्तव्यः। तत्रायं विशेषः। नानादेवतेष्वपि पशुषु यत्राग्नेरित्यादेः प्रियाधामान्यं तस्याग्नादे
स्तदं तस्य वभ्रन्नमुष्मा अमुमिस्तस्य चत्रिषु प्रैषेषु अभ्यासो न सर्वस्य प्रैषस्येति। प्राजापत्ये त्वग्निचित्यासं
युक्तेवायव्ये पशुपुरोळाशे। एके वायव्ये प्राजापत्ये। तेन पशुदेवतावर्धतइत्याचार्याः पुरोळाशात्तत्प्रधानत्वा
त्। अयमभिप्रायः। प्रकृतावग्नीषोमीयपशौ समानदेवतत्वात्पुरोळाशयागस्य पशुदेवताप्रत्यभिज्ञानात्तत्सं
स्कारद्वारेण तदर्थता युक्ता। अत्र पुनर्भिन्नदेवतत्वान्न तदर्थता न युक्ता। ततश्च सूक्तवाकप्रैषेषु पुरोडाशेन पशु
देवतावर्धनमयुक्तमित्याशंका नैव कर्तव्या। प्राजापत्येपि पशौ प्राकृतकार्यार्थितैव पुरोडाशयागोपि प्राप्त ८९
एव। एवं पशुयागार्थतया प्राप्तस्य देवतान्तरं विधीयमानं प्राकृतदेवताकार्यकरणत्वेनैव विधीयते। तत्रय

छब्देनैव प्रत्यभिज्ञानमाशंक्यते तद्विनैव शंकनीयं। तदर्थकिल्वायं शब्दः प्रयुक्त इत्यवगम्यते। ऐंद्र्या
गार्हपत्यमितिवद्भविष्यतीति। तेन पशुदेवतावर्धतइत्याचार्याः पुरोडाशात्तत्प्रधानत्वादिति चेदतः सूत्रका
रस्येति। अयमेवार्थः श्रुतौ चोद्योत्तराभ्यां प्रपादितः। तदाहुर्यदन्यदेवत्य उत पशुर्भवतीति एवमादिना प्रव
मानः प्रजापतिरित्येवमंतेन। पुरोळाशनिगमेषु पुरोळाशवद्दुर्वीष्याज्यवर्जयेयातेन समवत्तहोमः। यस्मि
न्ननेकपशुतंत्रे पुरोडाशस्य स्थाने पुरोडाशाश्च वा आज्यधानाकरंभपरिवापामिक्षादयो विहिताः तत्र स्विष्टकृ
न्ति तेषां सर्वेषां समवदानप्रचारो विहितः श्रुत तत्र पशुपुरोडाशस्विष्टकृत्प्रैषे सूक्तवाकप्रैषे च पशुपुरोडाशेन
देवतावर्धने कर्तव्ये सति प्रकृतौ पुरोडाशस्य पुरोडाशत्वात्तेनैव शब्देन वर्धनं कृतं इह तु नानारूपत्वाद्धवि
षां स्वेन स्वेनैव शब्देन निगमने प्राप्ते पुरोडाशशब्देनैव चर्वादीनां निगमनं विधीयते। सवनीयानां स्विष्टकृ
त्प्रैषे सौमिके सूक्तवाकप्रैषे चास्य छत्रिन्यायस्य दृष्टत्वादेवमुक्तं। आज्यस्य तु तत्राभावाददृष्टः प्रयोग

Indira Gandhi National
Centre for the Arts

इतितस्यस्वशाखेनैवनिगमनेभवति। आज्यस्यपुरोडाशत्वसंभावनैवसंदिग्धा। यद्यसंभवः तदाज्यवर्ज
९० मितिअयमभावानुवादः यदिसंभवतितदास्वशाखेनैवनिगमननान्यपुरोडाशानामाज्यपुरोडाशैरिति।मे
धोरभीयानितियश्चाभिधाने। मेधोरभीयानित्येतेपदेषुष्वभिधानेपन्नोरभिधायके इत्यर्थः। मेधपदस्यविधानं
प्रथमप्रयुक्तत्वादस्मैएनामित्येवमादीनां प्रदर्शनार्थं। रभीयानित्यस्योपमार्थत्वशंकानिवृत्त्यर्थं। यश्चभिधा
नेआदघसत्‌इनिपाठः कर्तव्यः। प्रगृह्यत्वादस्यपदस्य। आदघसत्करन्जुषताम घदग्रभीदवीवृधतेतिदे
वतानां। एतेषांपाठेद्विवचनांतानामाम्नायसिद्धत्वादेकवचनबहुवचनयोरिष्टत्वकारपरिग्रहार्थं। आदत्‌आ
दन्‌। घसत्‌घसन्‌। करत्‌करन्‌। जुषतांजुषंतां। अघत्‌अघन्‌। अग्रभीत्‌अग्रभीषुः। अवीवृधतअवीवृ श्री ९०
धंत॥४॥ हुतायांवपायांसब्रह्मकाश्चात्वालेमार्जयंतेनिधायदंडंमैत्रावरुणः। अस्मिन्नवसरेचात्वालेमार्ज
यंते। बहुवचनेनैवसर्वेषांमार्जनेसिद्धेसब्रह्मकवचनमस्मदीयाः सर्वेसहमार्जयेयुः। नपृथक्पृथगित्ये

वमर्थं। दंडनिधानवचनंस्तोकानुवचनार्थमात्तस्यदंडस्यात्रैवनिधानंनप्रागित्येवमर्थं। इदमापः प्रवहतसुमि
त्र्यानआपओषधयः संतुदुर्मित्र्यास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मइति। इदमापः प्रवहतेत्यनयर्चाय
जुषाचोभाभ्यांमार्जनंकर्तव्यं। एतावन्मार्जनंपशो। एतावदेवमार्जनं। नातिदेशिकंकर्तव्यमित्यर्थः। पश्वधिका
रेपुनः पशाविति वचनंपश्वंगभूतायामिष्टौआतिदेशिकस्यमार्जनस्यप्रवृत्त्यर्थं। तीर्थेननिष्क्रम्यासीनामापुरोडाश
प नैवुंनोतनादीनिनार्दे श्रपणात्‌। अस्मिन्नवसरेनियमेनैवंकर्तव्यं। तेनचरित्वास्विष्टकृताचरेयुः। चरित्वेतिप्रकृतेचरेयुरितिवचनं
प्रधानस्विष्टकृतोर्भेदप्रतिपत्त्यर्थं। अतोन्वायात्यानांप्रवेशोसतितयोरेवमध्येप्रवेशः सिद्धोभवति। यदित्वन्वा
यात्यानितैरग्रेचरेयुः। यद्यस्मिन्नवसरेआगंतवोयागाउत्पद्यंतेतैः पशुपुरोडाशस्विष्टकृतोग्रेचरेयुः। तेषा
मन्वायात्यानीतिसंज्ञा। एतदुक्तंभवति। यदिपुरोडाशस्विष्टकृतोर्मध्येकैश्चनयागैश्चरेयुः तान्यन्वायात्यानीति
तेषामियंसंज्ञाविधीयते। चरेयुरितिपुनर्वचनंचरणमेवैषांकर्तव्यंनान्यन्निगमनादीतिसूचनार्थं। तदेवो

Indira Gandhi National
Centre for the Arts

नेरेण सूत्रेण विस्पष्टयति। न तु तेषां निगमेष्वनुवृत्तिः। अन्वायात्यदेवतानां हविषोश्च आवाहनादिषु निगमेष्वनु
९१ वृत्तिर्नास्तीत्यर्थः। नान्येषामूर्ध्वमावाहनादुत्पन्नानां। अन्वायात्येभ्योऽन्येषामपि आवाहनकालादूर्ध्वं हविरादिसर्व
मुत्पद्यते ये यांतेषामपि निगमेष्वनुवृत्तिर्नास्तीत्यर्थः। इळामग्ने पुरुदंसं सनिं गोः होता यक्षदग्निं पुरोळाशस्य रुद्रस्व
हव्या समिधो दिदीहीति पुरोळाशस्विष्टकृतः। पुरोळाशमोः पुरोळाशानामिति हविर्भेदे प्रैषकृत्यः। ऊर्ध्वमिळा
याः।।५।। मनोतायै संप्रेषितस्त्वं ह्यग्ने प्रथम इत्यन्वाह। अत्रेळामुपहूय मनोतामन्वाह। प्रेषितत्वं च नमुक्तप्रयो
जनं। हविषा चरंति। तेषां सलिंगाः प्रैषाः इति प्रैष उक्तः। तत्र प्रैषे करत एवाग्नीषोमावेवमित्येतन्नैयिणः। तत्र ह
विः प्रैषे करत एवाग्नीषोमावित्याम्नातं तत्स्य एवं शब्दस्य स्थाने एवमित्येतरेमिण आचार्यो वक्तव्यमित्याहुः। कि
मविशेषेण नेत्युच्यते। अन्यत्र द्विदेवतासु मैत्रावरुणदेवते च।। अन्यत्र द्विदेवतासु एकदेवतेषु बहुदेवते च पश ९१
विसार्थः। द्विदेवते च मैत्रावरुणदेवते एवमिति वदंति। मित्रावरुणौ देवता यस्य पशोः स मैत्रावरुणः पशुः। अ

त्र मैत्रावरुणाद्द्व्यस्य मुख्यया वृत्त्या देवताप्रतिपादनासंभवाल्लक्षणया प्रतिपादयति। अतस्तेन शब्देन व्यंज
नादि द्विदेवत्यः पशुर्लक्ष्यते। तस्मिन्नित्यर्थः। एतल्लक्षणग्रहणं शास्त्रांतरदर्शनाल्लभ्यत इत्युक्तं भाष्यकारेण। अ
त्र कारणमाह। तथा दृष्टत्वात्। प्रैषेष्वेकदेवतेषु बहुदेवतेषु च व्यंजनादि द्विदेवते च तथा दर्शनात्तेमन्येत इत्यर्थः।
प्रकृत्या गाणगारिः। तत्र हेतुमाह। उत्पन्नानां स्मृत आम्नायेन र्थभेदे निरर्थो विकारः। संप्रदायाविच्छेदेनाभ्यस्य
माने आम्नाये दृश्यमानानां पदानामर्थवत्त्वेनानर्थानां सतां विकार इत्येतं निःप्रयोजनमित्यर्थः। उपन्यासप्र
योजनं एवं विधानां सामान्यतो दृष्टाभ्रांतिः क्वचिदपि न कर्तव्येति। याज्यायां अंततः ईर्वी वसाहोम आरमेत्। व
सा होमार्थं तत्रावसायनो नरमाददीतावसानस्य तदर्थत्वात् तस्मिन्कृते समापयेत्। वनस्पतिना चरंति। प्रैषम
भितो याज्यानुवाक्ये। प्रैषसमाम्नाये यो वनस्पति प्रैषः। तमभितो ये ऋचावाम्नायेते ते वनस्पतेर्याज्यानुवाक्ये
भवतः। प्रैषसमाम्नाय पठिते याज्ये ति समाख्यानत्वाद्धोत्रैव वक्तव्या। यत्राग्नेराज्यस्य हविष इत्यत्राज्यभा

Indira Gandhi National
Centre for the Arts

गो। यद्वाज्यभागौ क्रियेते तदा तस्मिन्प्रैषे प्रधानदेवतानुद्देतौ निगमयेदित्यर्थः। एतं एतौ एतान्। एतां एते एताः।

९२ रभीयांसं। रभीयांसौ रभीयसः। रभीयसीं रभीयस्यौ रभीयसीः। अयाळग्निरग्नेराज्यस्य हविष इति स्विष्टकृति। इ-

ळामुपहूय अनुयाजेभ्यः इति। इळामुपहूयेति वचनमानन्तर्यार्थं। तेन प्रकृतिप्राशं दक्षिणाप्रतिग्रहणं पूर्वं नास्ती-

ति गम्यते। तेषां प्रैषास्तृतीयं प्रैषसूक्तमेकादशेह। इह एकादशानुयाजाः। नन्वयं प्राग्उत्तमाद्वा वपे तद्देवो

वनस्पतिर्वसुवने वसुधेयस्य वेतु देवं बर्हिर्वारितीनां वसुवने वसुधेयस्य वेत्विति। एकादशानुयाजा इत्युक्ता-

द्वयोरेव याज्ययोः पाठात् आकृतीभ्यो न्या वैश्वदेव्या आहर्तव्याः। अनवानं प्रेष्यति। अनवानं यजति। पुनरनवा-

नग्रहणमुत्तरसूत्रे प्रैषाधिकारनिवृत्त्यर्थं। उक्तमुत्तमे। यदुक्तमनवानं यजति प्रकृत्या वेति तद्वाज्याया ए-

व न प्रैषस्येत्येवमर्थः। पूर्वसूत्रे पुनरनवानग्रहणमिति व्याख्यातं। सूक्तवाकप्रैषे पूर्वस्मिन्निगमे ग्रहणं नि- ९२

त्यत्वाज्यभागौ। निगमहितात्पूर्वास्तिन्निति विशेषणं। अत्रेति वचनं प्रधानदेवतावदाज्यभागयोरपि नि-

गमनार्थं। गृह्णन्निति बध्नंस्तु ह्रस्व प्रसाम्नायः। बभ्रन्नमुष्मा अमुं बभ्रन्नमुष्मा अमुमिति पशुं श्वदेवता

भ्यः। नानादेवता नानाजातीयपशुके पशुतन्त्रे पदत्रयस्याभ्यासलाभार्थं पठितस्यापि पुनरभ्यासपाठः। देव-

ताभ्यो वैकपशुकाः। एकपशुका एकजातीयपशुका इत्यर्थः। एकव्यक्तिपशुत्वे देवता इति बहुवचनं नोपपद्यते।

देवतादेवतादेवतेति तत्रैकशेषः। नह्येकः पशुर्बह्वीभिर्देवताभिः संबध्यते। ननु वैश्वदेवो मारुत इत्यादिः प-

शुरस्ति। सत्यं अस्त्याश्रयभेदः। ननु देवताभेदः। एवं तत्र विग्रहः। विश्वेदेवा देवता यस्य स वैश्वदेव इति। अतो जात्य-

भिप्राय एवैकशब्दः। यत्रैकजातीयपशुका अनेका देवतास्तत्र देवताशब्दमेवाभ्यसेत्। न बभ्रन्यशुशब्दो। पशुशब्द

स्य यावद्द्रव्यं विभक्त्यूहः कर्तव्यः। बभ्रन्नग्नये इन्द्राग्निभ्यां छागाविति। पशुं श्वैवैकदेवतानां अत्र पशुशब्दानेवा-

वर्तयेत नान्यो। यथा बभ्रन्प्रजापतये श्वमजं तपरं गोमृगमिति भवति। उभयोरेकजातित्वे बभ्रन्प्रजापतये छागा-

निति न किंचिदभ्यसितव्यं। उत्तर आज्येनेत्याज्यभागावमुष्मा अमुनेति पूर्वेणोक्तं। पुरोडाशं पुरोडाशौ पुरोडाशा-

Indira Gandhi National
Centre for the Arts

न्। तं तौ तान्। तां ते ताः। पुरोडाशेन पुरोडाशाभ्यां पुरोडाशैः। समं। पूर्वप्रैष मग्नौ दंडमनुप्रहरेदनवभृथे। अवभृथ
९३ रहिते कर्मणि सूक्तवाकप्रैषं समाप्यानंतरमेवाहवनीये दंडमनुप्रहरेत्। अवभृथेन्यत्र। अन्यत्रेति सावभृथे कर्मणी
त्यर्थः। तत्रावभृथेनुप्रहरेदित्यर्थः। कृताकृते वेदस्तरणं। तीर्थेन निष्क्रम्याग्निपशुकेतनान्यत्रयंतो हृदयशू
लमुपोयमानमनुमंत्रयेरंछुगसि योस्मान्द्वेष्टि यं च वयं द्विष्मस्तमभिशोचेति। संस्थाजपात्प्राक् तीर्थेन निष्क्रम्या
ग्निपशुकेतनान्यत्रयंतो हृदयशूलमुदस्यमानं शुगसीत्यनेन मंत्रेणानुमंत्रयेरंस्सर्वे कर्तारः। तस्योपरिष्टादपउ
पस्पृशंति द्रौपेराह्ला वरुणस्य गृहो मितो हिरण्ययः। स नो धृतव्रतो राजा धाम्नो धाम्न इह मुंचतु। धाम्नो धाम्नो राज
न्नितो वरुण नो मुंच। यदापो अघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुंच। मयि वापो मोषधीर्हिंसीरतो विश्वव्यचा
भस्त्वेतो वरुण नो मुंच। सुमित्र्या न आप ओषधयः संत्विति च। चत्वारः सुमित्र्या न इत्यस्य कृत्स्नस्य ग्रहणार्थः। तस्यो ९३
दस्यमानस्योपरिष्टादपउपस्पृशंति द्रौपेरान्न इत्यादिभिर्मंत्रैः। अस्पृष्ट्वानवेक्षमाणा असंस्पृशंतः प्रसायंतः समिधः

कुर्वते तिस्रस्तिस्र एकैकः। अस्पृष्ट्वा हृदयशूलमनवेक्षमाणास्तमेवासंस्पृशंतः परस्परं। प्रत्याव्रजंति। प्रत्याव्रजंतः
सर्वे तिस्रस्तिस्रः समिधो गृह्णीयुः। एकैक इति क्रमेण ग्रहणार्थं। तेन सर्वे न युगपद्गृह्णीयुः अग्नेः समिदसि ते
जोसि तेजो मे देहीति प्रथमां मेधोस्येधिषीमहीति द्वितीयां समिदसि समेधिषीमहीति तृतीयां। प्रथमद्वितीयतृती
यग्रहणानि अभ्याधाने प्रथमगृहीतां प्रथममभ्यादध्यात्। एवं द्वितीयां तृतीयामित्येवमर्थानि। एसोपतिष्ठंत आ
पो अद्यान्वचारिषमिति। ततः समिधोभ्यादधति यथागृहीतमग्नेः समिदसि तेजो मेदाः स्वाहा। सोमस्य समिदसि परिष्टे जोसिते
मा पाहि स्वाहा। पितृणां समिदसि मृत्योर्मा पाहि स्वाहेति। तत इति सर्वेषामुपस्थाने परिसमाप्ते पश्चादभ्याधानारंभार्थं।
यथागृहीतमिति ग्रहणे यो यः पूर्वं गृह्णीयात्स स पूर्वमभ्यादध्यान्न सर्वे युगपदभ्यादध्युरिति। ततः संस्थाजप इति पशु
तंत्रं। पशुमात्रस्यैतत्तंत्रं न पशुविशेषस्येत्यर्थः। ६। प्रदानानामुक्ताः प्रैषाः। सर्वत्र प्रदानानामुक्ता एव प्रैषा भवंति
नान्य इति। अतिदेशप्राप्तानां पुनर्वचनं क्वचित्क्वचित्पशुविशेषे तदर्थं तथा प्रैषाम्नानं याज्यानुवाक्याम्नानं चास्ति

Indira Gandhi National
Centre for the Arts

तत्रापि प्रदानमेषा एते एव गृहीतव्या इत्येवमर्थं। तेषां याज्यानुवाक्याः॥ याज्यानुवाक्या इत्येतावतैव प्रदानानामेवेति
९८ सिद्धे तेषामिति वचनमिति पशव इत्यस्मिं सूत्रे पशून्विधास्यतितेषां पशूनां यानि प्रदानानि तेषां पशूनां या याज्यानुवा
क्याः वक्ष्यंत इत्येवमर्थं। सर्वेषामग्नेग्नेनुवाक्यास्ततो याज्याः॥ ततो याज्या इत्यनेन विना विशिष्टा याज्या एवमभवंतिव
चनप्रयोजनं सर्वत्र पूर्वं प्रोक्ता अनुवाक्याः उत्तरा याज्या इति ज्ञापनार्थं। तत्र याज्यानाः पूर्वनिपातोल्पाच्तरत्वादि
त्यवगंतव्यं। दैवते न पशुना नात्वं। याज्यानुवाक्यालिंगितदैवतेन वक्ष्यमाणानां पशूनां नानात्वमित्यवगंतव्यं। अग्ने न
य सुपथा राये अस्मानिति द्वे पाहि नो अग्ने पायुभिरजस्त्रैः प्र वः शुक्राय भानवे भरध्वं यथा विप्रस्य मनुषो हविर्भिः प्र
का रेवा मनना वच्यमानाः॥ अग्नेरेताः॥ अथ सरस्वत्याः॥ एकाचेतत्सरस्वती नदीनां शुचिर्यतीनाम् सरस्वती जुषाणा सरस्व
त्यभि नो नेषि वस्यः प्रक्षोदसा धायसा सस्र एषा पावीरवी कन्या चित्रायुर्यस्ते स्तनः शशयो यो मयोभूः॥ अथ सोम ९५
स्य। त्वं सोम प्रचिकितो मनीषेति द्वे त्वं नः सोम विश्वतो वयोधा या ते धामानि दिवि या पृथिव्यां मषा क्रंसुसुहतना सु

प प्रिंया ते धामानि हविषा यजंति। अथ पूष्णः॥ याते पूषन्नावो अंतः समुद्र इति द्वे पूषेमा आशा अनुवेद सर्वाः शुक्रं
ते अन्यद्यजतं ते अन्यत् प्रपथे पथामजनिष्ट पूषा प्रपथे दिवः परिपतिं वचस्या। अथ बृहस्पतेः॥ बृहस्पते या परमा
परावदिति द्वे बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु उपवाचः सचंते सं यं स्तुभो वनयो न यंत्येवापित्रे विश्वदेवाय वृष्णे।
अथ विश्वेषां देवानां। विश्वे अद्य मरुतो विश्व ऊती आ नो देवानामुप वेतु शंस आ नो विश्व आस्क्रा गमंतु देवा विश्वे देवाः श्रृ
णुतेमं हवं मे ये के च ज्मा महिनो अहिमाया अग्ने या दिदृक्षं मा रिषण्य॥ अथेंद्रस्य। इंद्रं नरो नेमधिता हवंत इति तिस्र उ
रुं नो लोकमनुनेषि विद्वान्त्सस्सा हिषे उरुहूत शत्रून् त्वस्तमेवाजिभिश्च प्रणेतः॥ अथ मरुतां शुची वो हव्या मरुतः शुची
नां नू स्थिरं मरुतो वीरवंतमा वो होता जोहवीति सत्तः प्रचित्रमर्कं गृणते तुराय या वः शर्म शशमा
नाय संति। अथेंद्राग्न्योः॥ आ वृत्रहणा वृत्रहभिः शुष्मैरा भरतं शिक्षतं वज्रबाहू उभा वामिंद्राग्नी आहुवध्या उभा राधसः सह मादयध्यै शुचिं
नु स्तोमं नवजातमद्येंद्राग्नी वृत्रहणा जुषेथाम् गीर्भिर्विप्रः प्रमतिमिच्छमानः प्रचर्षणिभ्यः पृतना हवेषु। अथ सवितुः। आ देवो यातु सवि

तासुरत्नः सद्या नो देवः सविता सहावेति द्वे उदीरय कवितमं कवीनां भगं धियं वाजयंतः पुरंधिमिति द्वे। अथ
९५ वरुणस्य। अवसिंधुं वरुणो द्यौरिव स्थाद्यं स तुभ्यं वरुण स्वधावन् एवा वंदस्व वरुणं बृहंतं तत्त्वा यामि ब्रह्मणा वं
दमान इति द्वे अस्तभ्नाद्द्यामसुरो विश्ववेदा इत्येकादशिनाः॥७ अग्नेन मेसादयोस्तभ्नाद्द्याम सुर इत्येवमंता अग्न्या
दिदेवस्य एकादश षड्ऋचा आम्नाताः। ते श्वेकादश पशवो विहिता भवंति। तेषां समाहार एकादशिनी सुच्यते। त
स्यां भवा एकादशिना इत्युक्ताः॥७॥ अग्नीषोमाविमं सु मे शृणु मेता निरिदिविरोचनानी तित्वा वां मित्रावरुणा हव्य
जुष्टि [illegible] मा पातं मित्रावरुणा सुशस्त्या नो मित्रावरुणा हव्यजुष्टिं युवं वस्त्राणि पीवसा
वसाथे प्रबाहवा सिसृतं जीवसे नो यद्वंहिष्ठं नातिविधे सुदानू हिरण्यगर्भः समवर्तताग्र इति षट् प्राजापत्याः। चित्रं ९५
देवानामुदगादनीकमिति पंच शं नो भवचक्षसा शं नो अह्ना वायोभ षशुचिपा उप नः प्रयाभिर्यासि दाश्वांसमच्छा
नो नियुद्भिः शतिनीभिरध्वरं पीवो अन्नां रयिवृधः सुमेधा राये नु यं जज्ञतू रोदसी मे प्र वायुमच्छा बृहती मनीषा त

ववाय हृतस्य ते त्वां हि सुप्सरस्तममिति द्वे कुविदंग नमसा ये वृधास ईशानाय प्रहुतिं यस्त आनट् प्रवीवायुं रथयु
जं कृणुध्वमुत त्वामदिते मह्यने होन उरुव्रजेदिति द्वे जनिष्ट सुत्रामाणं पृथिवीं द्यामनेहसं महीमूषु मातरं सुव्रता
नामदितिर्द्यौरदितिरंतरिक्षं न ते विष्णो जायमानो न जातस्त्वं विष्णो सुमतिं विश्वजन्यां विचक्रमे पृथिवीमेष एतां
त्रिर्देवः पृथिवीमेष एतां परो मात्रया तन्वा वृधानेरावती धेनुमती हि भूतं विश्वकर्मन् हविषा वावृधान इति द्वे विश्व
कर्मा विमना आद्विहायाः किंस्विदासीदधिष्ठानं यो नः पिता जनिता यो विधाता या ते धामानि परमाणि यावमाय
इमे द्यावापृथिवी जनित्री तन्नस्तुरीपमध पोषयित्नु देवस्त्वष्टा सविता विश्वरूपो देवत्वष्टर्यद्ध चारुत्वमानट् पि
शंगरूपः सुभरो वयोधाः प्रथमभाजं यशसं वयोधां सोमापूषणा जननारयीणामिति सत्क्रमादित्यानामवसा नू
तनेनेमा गिर आदित्येभ्यो घृतस्नूस्त आदित्यास उरवो गभीरा इमं स्तोमं सक्रतवो मे अद्य धृतिस्त्रो भूमीर्धारयं त्रीरु
त द्यून् दक्षिणा चिचिकितेन स द्यां महीद्यावापृथिवी इह ज्येष्ठे ऋतं दिवे तदवोचं पृथिव्या इति द्वे प्र द्यावा यज्ञैः

Indira Gandhi National
Centre for the Arts

पृथिवीन मोभिरितिद्वेअग्नावायन्नैः पृथिवीकृता वृधाम त्वानो रुद्रोत नोमयस्कृधीतिद्वे आते पितर्मरुतांसुम्नमे
९६ तु प्रवभ्रवेदृषभायश्वितीच इतिनिस्त्रआपश्च्यातान्नासस्ताउरस्ताद्गोमतानासत्यारथेनेतिचतस्त्रोहिरण्यवर्ण
धुवर्णो घृतस्नुरभिक्रत्वेंद्रम्रस्थज्मंस्त्वंमहांइंद्रतुभ्यंहक्षाःसत्राहणंदाधृषिंतुम्नमिंद्रंसहदानुंपुरुहूतक्षियंतंसु
तइंद्रोमघवापरुवत्रैवावस्वइंद्रःसत्यःसम्राड्यद्वाग्वदंत्यविचेतनानिपतंगोवाचंमनसाबिभर्तिचत्वारिवाक्परि
मितापदानियज्ञेनवाचःपदवीयमायन्नितिद्वेदेवीवाचमजनयंतदेवाजनीयंतोन्वग्रवइतितिस्त्रोदिव्यंसुपर्णंवायसं
बृहंतंसवारधेनयंमीषणासुयस्यव्रतंपशवोयंतिसर्वेयस्यव्रतमुपतिष्ठंतआपः।यस्यव्रतेपुष्टिपतिर्निविष्टस्तंस
रस्वंतमवसेहुवेम॥अत्राष्टादशपवत्वाआम्नातास्तैश्चाष्टादशपशवोविहिताभवंति।तत्रान्यलिंगत्वात्त्वाजापत्या
इत्युक्तं।इतिपशवः।इत्येतद्याज्यानुवाक्यालिंगकल्पितदेवत्याःपशवोस्मिंस्तत्रेविधीयंते।एतेएकोनत्रिंशत्पश ९६
वः।निर्मितऐंद्राग्नइत्यस्मिंश्चैकोविधास्यते।तेनचसहत्रिंशत्पशवोस्मिन्नध्यायेविहिताःतत्रैकादशिनानांग

णात्मकत्वाद्गणएवाम्नातोनैकैकशःपशुस्तेषामेतदुक्तंभवति।एकादशिनीगणरूपेणआम्नाताअग्नीषो
मीयादयश्चैकैकशआम्नाताःनिरूढश्चाम्नातः॥अन्येचकेचनास्मिंश्छास्त्रेपशवआम्नातास्तेषुसर्वेषुपौ
र्णमासमेवतंत्रं।असमाम्नातेषुयथाकल्पनीयंतंत्रं।सोम्याश्चनिर्मिताश्च।सोम्याःसोमांगभूताइत्यर्थः।निर्मिताः
स्वतंत्राइत्यर्थः।अस्मिन्नंकदृयेपशवआम्नातास्तेषांकेचित्सोमांगभूताःकेचित्स्वतंत्राइत्यर्थः।निर्मितऐंद्राग्नः
।ऐंद्राग्नोनिरूढोनामपशुःकर्तव्यः।अयमपिपशूनांप्रकृतिः।तेनांगभूतानामग्नीषोमीयःप्रकृतिः।स्वतंत्राणां
निरूढःप्रकृतिरिति।तेष्वेवपश्चिष्टिर्नांगभूतेषुइत्येवमर्थंनिरूढप्रकृतित्वाम्नातं।षाण्मास्यःसांवत्सरोवा।सो
यंनिरूढःषट्सुषट्सुमासेषुकर्तव्यः।संवत्सरेसंवत्सरेवा।अतोवीप्सावचनान्नित्योयंपशुरितिगम्यते।प्राजाप
त्यउपांशुसावित्रसौर्यवैश्वदेवैन्द्रकर्मणाश्चेतेषांतत्रोपांशुयाजविकारान्वक्ष्यामः।ऐष्टिकेषूक्तोविकारःपाशुके
षुतंत्रेष्विदानींविकारउच्यते।प्रैषादिरागुरस्थाने।आगुरोयत्स्वरस्थानमुच्चैस्त्वंनामतत्प्रैषादेरपिभवति।उच्चैरिति

Indira Gandhi National
Centre for the Arts

=अप्रेषपक्षे एषां लिङ्गिका एव दात्यानुवाक्याः पर्यंतिवामानाः हनाद्वीगुपतिसदाआवाहयेथेतादेवताः पशुपुरोडाशपक्षेतुअनावाहनमेवेतिसिद्धं ॥=

वक्तव्ये आगुरस्थाने इतिवचनमागुः परिमाणोद्दिष्टएव प्रैषादिशब्दवाच्य इतिज्ञापनार्थं। आदद्मस ऋरदितिचे
९७ तानियथास्थानमुपांशुः एतानीतिवचनमाददादीनां समानांग्रहणार्थं। यथास्थानवचनेसर्वप्रैषपरिग्रहार्थं। च
शब्दोविकारसमुच्चयार्थः। कस्यचिदुच्चैष्ट्वविधानात्कस्यचिदुपांशुत्वविधानादन्यस्यतंत्रस्वरत्वंभवति। तेनप्र
धानोपांशुत्वेआददादेरप्युच्चैर्भवति। तंत्रोपांशुत्वेप्रैषादेरप्युपांशुभवतीतिसिद्धं॥ ८॥ सौत्रामण्यां॥ सौत्रा
मणीतिकर्मनाम। तस्यांविधिर्वक्ष्यत इतिसंबंधः। आश्विनसारस्वतैंद्राः पशवः। बार्हस्पत्योवाचतुर्थः। ऐंद्रसा
रायतः द्रव्ये अन्वयो येषां ते द्रव्यान्वयाः संस्काराणां द्रव्यवशवर्तित्वादित्यर्थः प्रतिप्रधानं गुण आवर्तते इति
मिहान्यायः यत्तु निर्विशेषाग्रहणात् अनावृत्तिरिति तदपि न एकवचनोतस्यार्षेयस्य वर्णनभिधानादिति ए १२३
वं चेद्वनोहः किमिति न क्रियते तेषां समावापादिद्वस्त्वयजमानवाचिनामेवोहनियमात् अत आवृत्तिरेवात्र

युक्ता साग्निचित्येषु क्रतुष्वखासंभरणीयामिष्टिमेके अग्निचयनमग्निचित्या तया सह वर्तन्त इति साग्निचित्याः
क्रतवः तेषूखासंभरणीयानामेष्टिमेके शाखिन आमनंति उखासंभरणप्रयोजनाउखासंभरणीया अग्नि
ब्रह्मणानग्निः सुश्रवानग्निः सुश्रुतः ब्रह्मण्वानस्सुश्रवान् सुश्रुतस्तत्र अग्नेर्गुणास्तिस्रो देवताः एतेनाग्नेः
ब्रह्मणावाहुधस्व ब्रह्म च ते जातवेदो नमश्च पुरूण्यग्ने पुरुधा त्वा या सचित्रचित्रं चितयंतमस्मे अग्निरीशे बृहतः
क्षत्रियस्याग्नीमितं सुमतिं योध्यवो गिति इदं प्रभृति कर्मणां शनैस्तरामुत्तरोत्तरं इदं प्रभृतिर्येषां तानीदं प्रभृती
नि इदं प्रभृतीनि च तानि कर्माणि चेदं प्रभृतिकर्माणि तेषामुत्तरोत्तरं शनैस्तरां भवति एतत्त्वपि पौर्णमासात्
एतदप्युखासंभरणीयं पौर्णमासाच्छनैस्तरं भवति अत एतास्विदं भवति मंथदिचिषुस्थानेषु षष्ठेनयमेन दर्शपू
र्णमासयोर्मंत्राणां प्रयोगः सप्तमेन वषट्कार इति एवं पंचमचतुर्थतृतीयद्वितीयप्रथमेषूखासंभरणीयाप्राजाप
त्यादीक्षणीयाप्रायणीयातिथ्याः प्रयोक्तव्याः तस्मात्तस्मादुत्तरोत्तरं लषट्कारः प्रायणीयावत्सोमप्रवहणं

इत्यद्वितीयेनप्रथमेनेत्यर्थः॥ ऊर्ध्वं प्रथमाया अग्निप्रणयनीयाया औपवसथ्ये ऽग्निप्रणयने तस्य प्रथमाया ऊ-
१२२ र्ध्वं स्वरे नियमो भवति। मंद्रो वा मध्यमो वा उत्तमो वा सर्वो वा। सर्वप्रयोगपक्षे मंद्रादीनुत्तमपर्यंतानारोहणेनैव प्र-
युंजीत। एकस्वरप्रयोगेपि यमानेवारोहयेत्। मध्यमादि घर्मे। घर्मे मध्यमोत्तमयोरेव नियमः। न मंद्रस्य तत्र प्र-
वेश इत्यर्थः। अत्रापि स्वरयोर्यमानो वारोहित्वमेव स्यात्॥ दीक्षणीयायां धाय्ये विराजौ। दीक्षाप्रयोजना इष्टिः दी-
क्षणीया सा कर्तव्या तस्यां धाय्ये विराजौ भवतः। अग्नाविष्णू। अस्यामियं देवता। अग्निर्मुखं प्रथमो देवतानां संग-
तानामुत्तमो विष्णुरासीत्। यजमानाय परिगृह्य देवान्दीक्षयेदं हविरागच्छतं नः। अग्निश्च विष्णो तप उत्तमं महो दीक्षा-
पालाय वनतं हि शक्रा। विश्वैर्देवैर्यज्ञियैः संविदानौ दीक्षामस्मै यजमानाय धत्तमिति। साग्निचित्ये त्रीण्यन्यानि।
हवींषीति शेषः। वैश्वानर आदित्याः सरस्वत्यदितिर्वा। अत्र सर्पो विकल्पः। त्रीण्यन्यानीत्युभयविशेषणात्। आग्नावै- १२२
ष्णवादधिकानि त्रीणि इति गम्यते। धारयंत आदित्यासो जगत्स्था इति द्वे। एते एव भुवद्वद्भ्यो भुवनपतिभ्यो वा। एते

एव चैते आदित्येभ्यो भुवद्वद्भ्यः अदितिभ्यो भुवनपतिभ्यश्च याज्यानुवाक्ये भवतः। भुवनपतिलिंगयोरेव भुवनपतीभ्यां
विधानादेतत्प्रयुज्यते सगुणे अपि निर्गुणाय विहिते न च नादृते सगुणायास्ते न भवत इति। नेदमादिषु मार्जनमवगुद-
यनीयायाः इदमादिषु कर्मसु प्रागुदयनीयायाया न मार्जनं भवति। द्विविधं चेह मार्जनं गृह्यते चोदितं लैंगिकं च। परिस्तर-
णेंजलिमंतर्धायाप आसेचयते। सब्रह्मकाश्चात्वाले मार्जयंत इति चोदितं। प्राच्यां दिशि देवा ऋत्विजो मार्जयंतामि-
ति लैंगिकं तदुभयं प्रतिषिध्यते। शास्त्रांतरे च स्पष्टवचनमस्ति दीक्षणीयादिषु याः कृविमोकादि न भवतीति। ते-
न उभयप्रतिषेधोवगम्यते। एवं सति दर्शनादग्नीषोमीयसवनीययोश्चात्वाल मार्जनं न प्रतिषिध्यते। कुतः चात्वाले
मार्जयित्वाध्वर्युपथ उपतिष्ठत इति सवनीये दर्शनं। अग्नीषोमीयेण चात्वाल मार्जनादिति सिद्धवदनुवादादग्नीषो-
मीयेप्यस्तीति गम्यते। एवं सत्यनयोर्न प्रतिषेध इति सिद्धं। इदमादीकायां सूक्तवाके चागूर्णाशीः स्थाने। इडायां सूक्त-
वाके च या आशिषस्तासां स्थाने आगूर्णीममंत्रः प्रयोक्तव्यः। आगुरं प्रक्षिप्याशिष उद्धृत्य यथातो प्रयुज्येते इडा

Indira Gandhi National
Centre for the Arts

सूक्तवाकौ तथा पाठेनैव दर्शयति। उपहूतोयंयजमानोस्य यज्ञस्यागुरउद्दृचमशीयेति तस्मिन्नुपहूतः एवमिकानि
१२३ गदइत्सर्थः। उपहूतोयंयजमान इत्यस्मादुपरिष्टात्तस्मिन्नुपहूत इत्यस्मात्पुरस्ताद्यः पदसमुदायस्ता आशिष इत्युच्य
ते। यस्स्थानेयः पदसमुदाय इदानीं पठ्यते असावाग रित्युच्यते। एवमिकानिगदः। आशास्ते यंयजमानोस्य यज्ञस्या
गुरउद्दृचमशीयेत्याशास्ते। इत्येवंसूक्तवाक इत्सर्थः। आशास्तेयंयजमान इत्यस्मादुपरिष्टात् आशास्तेयदनेन हवि
षेति अस्मात्पुरस्ताद्यः पदसमुदायस्ताआशिषस्तत्स्थानेयः पदसमुदाय इदानीं पठ्यते स चागः। एवं सूक्तवाकनि
गदः। अस्ययज्ञस्यागुरउद्दृचमशीयेत्युभयत्रागः। अस्यायमर्थः। अस्ययज्ञस्य प्रारब्धस्य समाप्तिं प्राप्नुयामिति। त उँद्रसमाप्तिः३
स्मिन्नुपहूत इतीकायां प्राप्नुयामित्याशास्त इति सूक्तवाके। अत इयमप्याशीरेव। आगुरित्यस्य उद्दृगाशासनरूपत्वा १२३
दागुरित्युच्यते। न चात्रनामादेशः। पाठादेवनामादेशाभावमिद्धेपुनः प्रतिषेधवचनं अन्यत्सर्वं प्रकृतिवदर्थमेतिज्ञापना
र्थं। प्रकृतौ स ऊर्ध्वं पश्चिकायाः। सवनीयपश्चिकात्रगृह्यते। तच्छब्दचोदितत्वात्। अंस इति वचनादहर्गणे चंसे

हनिपश्चिकागृह्यते। एकाहेषुतदेवायामंसं चभवति। दीक्षितानांसचरो गार्हपत्याहवनीयावंतराग्नेः प्रणयनात्।
संचरशब्द आसनशयनादीनां प्रदर्शनार्थः। तेनास्मिन्नवधौ तयोरेवाग्न्योर्मध्ये समीपे यजमानावर्तेरन्। अग्निप्र
णयनोत्तरकालं संचरदेशः। शास्त्रोत्तरादवगंतव्यः। दीक्षणादिगत्रिसंख्यानेन दीक्षा अपरिमिताः प्रकृतेरिदंदी
क्षाविधानं। यस्मिन्नहोरात्रेदीक्षणंक्रियते तदेवारभ्यरात्रीरेवसंख्यामापरिमितादीक्षाः कर्तव्याः। तस्माद्दीक्षितो द्वा
दशाहं भृतिं तन्वीतेति प्रकृतौ नित्यवदाम्नातं। तथा मासं संवत्सरं यदा वा कृशः स्यादिति परिमिताः। ये अपरिमिता
श्चदीक्षाकल्पाः शास्त्रांतरआम्नातास्तेषां प्रदर्शनार्थमपरिमितवचनं। अध्वर्युप्रत्ययत्वाद्दीक्षानियतेस्तत्र तत्रनमा त्र
मन्त्रोक्तानाचार्यः। सत्राणां दीक्षाविधानस्तूनमभिधीयते। एकादशप्रभृत्यासंवत्सरात्। संवत्सरं त्वेव सत्रे। महाव्रतम
हितेसत्रे अयंविशेषस्संवत्सरमेवेति। द्वादशाहनाप्रभृतिषुयथामुख्योपसदः। तेषुसत्रेषु यथामुख्योपसदस्तथा दीक्षा अ
पिकर्तव्याः। उपसत्संख्याया अप्यन्यत्राविहितत्वादत्रैव विधिः कल्प्यते। यत्संख्याः सुत्या उपसदश्चतत्संख्यादीक्षा

Indira Gandhi National
Centre for the Arts

एवेति। एतदुक्तं भवति। द्वादशाहतापश्चितेषु यसंख्याः सुत्यासंख्या एवोपसदश्च दीक्षाश्च भवंतीति। कर्माचा
१२४ रस्त्वेकाहानां। आचर्यते स्मिन्निस्याचारः कालः। कर्मण आचारः कर्माचारः। एकाहानां प्रयोगकालो यस्य न इ
त्यर्थः। एकाहग्रहणेनाचविकल्पेकाहा उच्यंते। बहुवचनसंबंधात्। प्रकृतौ दीक्षाणां विहितत्वाच्च। तुशब्दो विशेषवि
ध्यर्थः। अस्मिन्प्रकरणे दीक्षाकाल एव विधातव्ये दीक्षोपसत्सहितानामेकाहानां प्रयोगकालो विधीयते इति विशेषः।
एकाहि तिस्रो वा दीक्षास्तिस्र उपसदः सुत्यमहरुत्तमं। उत्तमग्रहणं प्रातरनुवाकाद्युदवसानीयांतमेकमेवाहः स्यादित्यु
क्तत्वशब्देनास्य तदुक्तमेवमर्थं। दीक्षाकाले विधातव्ये उपसत्सुत्यानामपि विधानं त्रिप्रकाराणामेव सोमिकत्वसिध्य
र्थं। तेन दीक्षणीयायाः प्राग्भाविनोऽरण्यासंभरणीयादेः सौमिकधर्मा उपांशुत्वादिर्न भवतीति सिद्धं। दीक्षांते राजक्रयः।
दीक्षाहः सु परिसमाप्तेषु अनंतरं यदहस्तस्मिन्नहनि राजक्रयः कर्तव्यः। सोमः क्रेतव्य इत्यर्थः। ३। तदहः प्रायणी
येष्टिः। यस्मिन्नहनि सोमः क्रेष्यते तदहः प्रायणीया नामेष्टिः कार्या। दीक्षांते राजक्रय इत्युक्तो तदहरिति वचनाद्दीक्षांते १२५

यदहस्तस्य राजक्रय इति संज्ञा अर्थात्कृता भवतीति गम्यते। तेनायमर्थः। तदहरिति यद्राजक्रयसंज्ञमहस्तस्मिन्नित्य
र्थः। पथ्यास्वस्तिरग्निः सोमः सविताऽदितिः स्वस्ति नः पथ्यासु धन्वस्विति इदं अग्ने नय सुपथा राये अस्मान्देवानामपि
पंथामगन्म त्वं सोम प्रचिकितो मनीषा या ते धामानि दिवि या पृथिव्यामा विश्वदेवं सत्पतिं यद्य मा विश्वा जातानि सुत्वा भा
णं पृथिवी द्यामनेहसं मही मषु मातरं सुव्रतानां सेद अग्निरग्नीरत्यस्त्वन्यानिति द्वे संयाज्ये। शंय्वंतेयं। इय मिति वचनादि
यमेव शंय्वंता नोदयनीयेत्यर्थः। अनाज्यभागा। चशब्दो ध्याहर्तव्यः। अनाज्यभागा चेयमेव भवति नोदयनीया सं
स्थिता सा। ४। राजानं क्रीणाति। संस्थितायामिति वचनं प्रायणीययाराजक्रयस्य संबंधार्थं। तेनाहर्गणेषु प्रायणीया
यद्राजक्रयो नाभ्यावर्तयितव्यः। सकृदेव कर्तव्य इत्यर्थः। क्रीणातीति वचनं सोमप्रवहणे यदस्माकं कर्म विहितं तत्क्र
यो नरकाऽऽवर्तिन्येव प्रवहणे भवति। नान्यकालीन इत्येवमर्थं। तं प्रवक्ष्यत्सु पश्चाद्दनस्त्रिपदमात्रं तरेण वर्त्मनी अ
वस्थाय प्रेषितो ग्नेभिहिंकारात्त्वं विप्रस्त्वं कविस्त्वं विश्वानि धारयन्। अपजन्यं भयं नुदेत्स संदयन्नाग्नीध्रप्रपदेन दक्षिणपां

Indira Gandhi National
Centre for the Arts

संस्थितेऽनुव्रजत्यानुब्रूयादिद्यदभिमेधः प्रेदिद्बृहस्पतिः पुरएता ते अस्तु। अथेमवस्य वर आ पृथिव्या आरे शत्रून्कृणुहि
१२५ सर्ववीर इति तिष्ठन्। तं क्रीतं सोमं राजानं प्राग्वंशसमीपं नेष्यत्स्वध्वर्युषु पश्चादनसस्त्रिपदमात्रे तीते च क्रयो येवर्त्म
नीतयोश्च मध्यदेशस्यार्जवेन यो देशस्तस्मिन्नवस्थाय प्रेषितः सन्नभि हिंकारात्साक्याली मचालयन्नपदेन दक्षिण
स्यां दिशि पांसुं स्थिरं दध्यात्। तं विप्र इति मंत्रेण ततस्तस्मिन्नेव सांम्येस्थिताः अभिहिंकृत्यानुब्रूयात्। तिष्ठन्निति वचनं व्र
जत्स्वध्वर्युषु प्रथमामसमाप्य न व्रजेदित्येवमर्थं। अनुव्रजन्तु नरा अंतरेणैव वर्त्मनी। अंतरेणैव वर्त्मनी अनेन
पथानुव्रजन्तु नरा अनुब्रूयादित्यर्थः। व्रजन्नेवानुब्रूयान्न व्रजनविक्षेप इत्येवमर्थं व्रजन्निति ग्रहणं। सोमयास्तेमयो
भुव इति तिस्रः सदैनं इति पशसागते नागेदेव ऋतुभिर्वर्धतु क्षयमित्यर्द्धर्च आरमेत्। अवस्थिते नसि दक्षिणात्पक्षाद
भिक्रम्य राजानमभिमुखो वातिष्ठते। अमस्यावस्थितेतस्य दक्षिणपार्श्वेन राजसमीपं गत्वा तमीक्षमाणस्तत्रैवतिष्ठेत्। अ १२५
पाद्यमाने राजन्यग्रेण नोऽनुसंव्रजेत्। अनुव्रजन्तु नरा इति सर्वास्वृक्षु अनुव्रजतोऽनुवचनसिद्धौ ससामनुसंव्रजे

दिति वचनं सम्प्राप्तोऽनंतरमेवानुव्रजेन्नत्ववायमध्येपंकुर्यादित्येवमर्थं। अतोऽग्रेणाहवनीयं गतस्यानुव्रजनं कृतं भ
वति। या ते धामानि हविषा यजंती मा धियं परीक्षमाणस्सदेवेति निहिते परिदध्याद्राजानमुपस्पृशन्। निहित इति व्रज
नसमाप्तिदर्शनान्निहितेनैव परिदध्यात्। वसनं शुशुपुषा। उपस्पर्शनविषयस्य विकल्पोयं। मंत्रेण बद्धस्य विस्रंसनेन बं
धनशास्त्रविरोधः वसनोपस्पर्शने च राज्ञोपस्पर्शनशास्त्रस्य विरोधः तत्रान्यतरस्य लक्षणाश्रयणे सति उपस्पर्श
नस्यैव लक्षणाश्रयणं युक्तं। बंधनोत्तरकाले विहितत्वादिति वसन इत्युक्तं। वचनाद्बद्धस्य वचनादेव विस्रंसनेन दो
ष इति मत्वा अंशुशुपुषेत्युक्तं चाशब्दः पूर्वपक्षव्यावृत्त्यर्थः। बद्धो वसतीति वचनात्पुनरपि बंधनं कर्तव्यं॥ ७॥ अथातिथ्ये
ष्टौ ता। आतिथ्या नामेष्टिरनंतरं कर्तव्या। तस्या अग्निमंथनं। तस्मा इति वचनं तदंगतासि ध्यर्थं तेनास्मिन्नग्निमंथ
नेमंद्रस्य प्रथमयमः साधितो भवति। धाय्ये अतिथिमंतौ। समिधाग्निं दुवस्यताप्यायस्व समेतु त इति विष्णुरिदं विष्णु
र्विचक्रमे तदस्य प्रियमभि पाथो अप्सां होतारं चित्ररथमध्वरस्य प्रयायमग्निर्भरतस्य शृण्व इति संयाज्ये। संस्थिता

Indira Gandhi National
Centre for the Arts

यामाज्यंतान्नग्रंकरिष्यंतोभिमर्शंत्सनाधष्टमस्यनाधष्यंदेवानामोजोअभिशस्तिपाः। अनभिशस्त्यंनसासत्यमु
१२६ पगेषांस्थितेमाधादूति। मंधित इतिवचनमहर्गणे पुनानून प्रसानाद्यर्थं। नानूनप्रसिस्याज्यविशेषस्य
नाम। करिष्यंतइत्यार्त्विज्यंकरिष्यंतः कर्त्विहहणंसर्वं स्वयमेवाभिमर्शेरननान्योन्यस्याभिति खेध्यानेत्ये
वमर्थं॥ स्पृष्ट्वोदकंराजानमाप्याययंति। आप्यायनस्वरूपमुक्तमद्भिः संस्पर्शनाधिस्यादिति। इदमादिमदंतीर
वर्थइपसत्सु। इतः प्रभृत्युपसत्सु यदुदकोपस्पर्शनं क्रियते तत्र मदंतीरेव गृह्णीयात्। मदंत्योनाम तप्ता आ
पः। उपस्पर्शनसंनिधानुक्तत्वादुपस्पर्शन एवायं नियमो नाचमनादावपीति गम्यते। अर्थग्रहणमर्थशस्तेष्वुप
स्पर्शनेभवतीत्येवमर्थं। अंशुरंशुष्टे देव सोमाप्यायतामिंद्रायैकधनविद आतुभ्यमिंद्रः प्यायतामावत्वमिंद्राय
प्यायस्वाप्याययास्मान्सखीन्सन्या मेधया स्वस्ति ते देव सोम सुत्यामुदृचमशीयेति। आप्यायनमंत्रोयं। स्पृष्ट्वोद १२६
कंनिह्नवंते प्रस्तरे पाणीनिधायोत्तानौ दक्षिणोत्तरौ नीचौ एष्टा राय एष्टा वामानि प्रेषे भगाय। ऋतमृतवादि

भ्योनमोदिवेनमः पृथिव्या इति। निह्नवो नाम नमस्कारः द्यावापृथिवीभ्यामेव तं नमस्कुर्वंतीति दर्शनात्। तेन
पाणिनिधानंनमस्कारांजलिरूपेणकर्तव्यं॥५॥ स्पृष्ट्वोदकंप्रवर्ग्येण चरिष्यंस्तरेण खरं परिक्रम्य पश्चा
दस्योपविश्य प्रेषितोभिष्टुयाद्ग्रावाणं। एतान्युदकोपस्पर्शनानुतरांगानि आप्यायननिह्नवप्रवर्ग्याणामंगा
नीत्यर्थः। प्रवर्ग्यशब्दः कर्मविशेषवचनः तेनचरिष्यन्स्विति वचनं होतुरभिष्टवनकालविधानार्थं। तेनकाला
तरं यदाध्वर्युर्विश्वरंतिन दाप्यभिष्टुयादेव। खरो नाम यत्र महावीरः संसाध्यते स देशः। एतदुक्तं भवति। अध्वर्यौ दि
षु प्रवर्ग्येण चरिष्यत्सु होतात्तीर्थेन प्रपद्य खरमुत्तरेण परिक्रम्य तस्य पश्चादुपविश्य ततः प्रेषितः सन् अभिष्टुयाद्ग्रा
वाणं। ग्रावाभिष्टवनलक्षणमाह। ऋचमर्धर्चमनवानमुक्त्वा प्रणुत्यावस्येत्। अस्यविधानस्य ग्रावाभिष्टवनमिति संज्ञेति
प्रदर्शनार्थं पूर्वसूत्रे ग्रावाणं शब्दप्रयोगः। अवसानमुक्त्वा सार्थमित्युक्तं तेनार्धर्चाः संहितया वक्तव्याः। तत्रा
र्धर्चे। तत्संधाने भाषिके वसंहितास्यान्नच्छांदसीति मंतव्यं। ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन

Indira Gandhi National
Centre for the Arts

आप॰ः। सबुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः। इयं पित्रे राष्ट्र्येत्यग्रे प्रथमाय जनुषे भूमनेष्ठाः।
१२७ तस्मा एतं सुरुचं ह्वारमह्यं घर्मं श्रीणंति प्रथमस्य धासेः। महान्मही अस्तभायद्विजातो द्यां पिता सद्म पार्थिवं च रजः
स बुध्नादाष्ट जनुषाभ्युग्रं बृहस्पतिर्देवता तस्य सम्राट्। अभि त्यं देवं सवितारमोण्योः कविक्रतुमर्चामि सत्यसवं
रत्नधामभि प्रियं मतिं कविं। ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः
पा स्वरिति वा संसीदस्व महाँ असीति संसाद्यमानं अंजंति यं प्रथयंतो न विप्रा इत्यज्यमाने पतंगमक्तमसुरस्य मायया
यो नः सनुत्यो अभिदासदग्ने भवा नो अग्ने सुमना उपेता विति द्वाः कृणुष्व पाजः प्रसितिं न पृथ्वीमिति पंच परिला
गिर्वणो गिरो धिष्व योरदधा उक्थ्यं वचः। शुक्रं ते अन्यद्यजतं ते अन्यद्पश्यं गोपामनिपद्यमानं स्त्र क्ले द्रप्सस्या यं वेनश्चो
दयत्पृश्निगर्भाः पवित्रं ते विततं ब्रह्मणस्पत इति द्वे वियत्पवित्रं धिषणा अतन्वत घर्मं शोचंतं प्रणवेषु बिभ्रतः। समु १२७
द्रे अंतराय वो विचक्षणं त्रिरह्नो नाम सूर्यस्य मन्वत इति गणानां त्वा प्रथश्च यस्य सप्रथस्तेति तस्या उद्यताय यजमानमीक्षते

द्वितीयमापत्नीं तृतीयया स्त्रानं कारा धद्धे आग्निनावा मितिन वाभा स्वग्निर्ग्रीवाणे वेके द्यावापृथिवी इति प्राग्र नमा
मा अरूरुचदुषसः पृश्निरग्रिय इत्यावपेतो नरेणाई त्वेन पत्नीमीक्षेतो नमभापरिहिते समुत्थाप्ये नानध्वर्यवो वाच
यंती तिनुपूर्वं पटलं। एतावत्सर्वमभिष्टवनं। अत्र मध्ये य स्यात्स्येयं वचनं तदेव व्याख्यायते। कृपा स्वः स्न पा स्वरि
तिवा। कृणीव यव भ तयोः कृपात्पाशाद्यो प्रयोगविकल्पो यं। संसीदस्व॰ साद्यमाने। समक् साद्यमान इत्यर्थः।
अंजंति यं॰ माने। आभिप्र्यमाणे। उत्तरास्वप्यभिष्टपं यथाशक्ति संपाद्य पठनीयं। अय॰ क्षते। द्विती॰ पत्नीं। तृती॰
स्नानं। प्राग्र॰ पेत। उत्तरा॰ क्षेत। प्रत्रक्रियांतर संबद्धस्या कुर्वतामामप्यभिष्टवनमेव कार्यं। अभिष्टवनं नाम घर्मस्य
संस्काराभिधानरूपः। एतच्च घर्ममभिगृह्णीतिसंभेदादवगतं तत्त्रयत्क्रियांतरमीक्षमाणादितद्नुषंगिकं तदपि च
नाकर्तव्यमेव। नक्रियमाणमेवं क्रियेत यजमानादीनीक्षमाण एताभिरभिष्टुयादिति। अरूरुचदित्यस्यामप्युत्तरमे
वार्धर्चमीक्षमाणो ब्रूयात्। उत्तरेणेति वचनात्। अस्मादेव वचनात्सर्वास्वप्याद्यार्धर्चं भोः वगतः। उत्त॰ येति। परिधानी

Indira Gandhi National
Centre for the Arts

यानंतरं अध्वर्युभिर्यदुक्तं तदस्यदीयैरपि कर्तव्यमित्यर्थः।उत्थाप्यवाचयंतीत्यध्वर्युशास्त्रोक्तस्य होत्रादिभिरनुष्ठे
१२८ यत्वं सूचयति।इति०टलं।ब्रह्मजज्ञानमित्यादिपरिदमुक्तं तत्स्वंमभिष्टवनमित्यर्थः।इतिकारः समाप्तिसूचकश्चानु
मात्रद्धउत्तरविवक्षासूचनार्थः॥६॥ अथोत्तरं।अथशब्दः संबंधार्थः।पूर्वोत्तरयोः पटलयोः संबंधमयोजनमुत्तरेपि
पटले ऋगावाचनादिधर्मज्ञापणार्थो।उत्तरमिति वचनं याज्यामवचानेनसव्यकाभिष्टवनसूचनार्थं।उपविष्टेष्वध्वर्यु
मर्मदुघामाव्हयतिनिममंत्रैयउत्तरस्य।उपविष्टेषु होत्रादिषु यदध्वर्युर्घर्मदुघामाव्हयति असावेह्यसावेहीति तद्देवोत्त
रस्यारंभे निमित्तमित्यर्थः।उपविष्टेष्विति वचनं यद्यध्वर्यवोनोत्थापयंतिति तदाप्युत्थाय स्वयमेव कुर्युरित्यस्यार्थस्य
सूचनार्थं।अनभिहिंकृत्य।उत्तरमभिष्टुयादितिशेषः।उपव्हये सुदुघां धेनुमेतामितिद्वेअभित्वादेवसवितः समीवत्सं १२८
नमात्रभिः संवत्स इव मातृभिर्यस्मिन्नः शशयो योमयोभूर्गौरमीमेदनुवत्संमिषंतं नमसेदुपसीदतसंज्ञानानाउप
सीदन्नभित्वादरामिर्विवस्वते।दुहंति सप्तैकां समिद्धो अग्निरश्विनातप्तोवांघर्मआगतं।दुह्यंते गावो वृषणेह धेनवो

दस्त्रामदंतिकारवः।समिद्धो अग्निर्वृषणारतिर्दिवस्तप्तो घर्मो दुह्यते वामिषे मधु।वयं हि वां पुरुतमासो अश्विना हवाम
हे सधमादेषु कारवः।तदुभयस्तममस्य कर्मात्मन्नेनभोदुह्यते घृतं पयउत्तिष्ठ ब्रह्मणस्पत इत्येतामुक्त्वा वा तिष्ठते
दुग्धायामधुक्षत्पिप्युषीमिषमित्याह्रियमाण उपद्रव पयसा गोधुगोषमाघर्मे सिंचपय उस्त्रियायाः।विनाकमरव्य
त्सविताव रेण्योनु द्यावापृथिवी सुप्रणीति रिस्यामिच्यमान आनूनमश्विनो ऋषिरिति गव्य आसुतेसिंचतम्प्रियमित्या
न आसिक्तयोः समुत्ये महतीरपकृति महावीरमादायोत्तिष्ठत्सदुष्यदेवः सविता हिरण्ययेत्यन्तजिष्ठेत्येतुब्रह्मणस्पति
रित्यनुव्रजे हुंधर्वं इत्थापदमस्परक्षतीतिखरमवेक्ष्यतमति क्रम्यनाकेसुपर्णमुपयस्तंतमितिसमाप्य मणवेनोपवि
श्रीदन्तिरस्यत्पत्योप्रपितोयजतितम्रोवां घर्मो नक्षतिस्वहोता मवामध्वर्युश्चरति प्रयस्वान्मधोर्दुग्धस्याश्विना तनायावीतं
यातं पयस उस्त्रियायाउभापिबतमश्विनेति चोभाभ्याम नवानमग्निवीहीत्यनुवषट्कारो घर्मस्याग्ने वीहीति वा ब्रह्मावषट्कृ
तेउपस्यनुवषट्कृते च विश्वा आशा दक्षिणसाद्विश्वान्देवानयाडिह।स्वाहाकृतस्य घर्मस्य मधोः पिबतमश्विनेत्य

वमेवापराह्णिकेयदुस्त्रियास्वाहुनंधऽंतंपयोयंसवामश्विनाभागआगतं। माध्वीधर्मोहविरिदंयस्यमस्यतीनमंघर्मपिंव
१२९ तंसोम्यंमध्यस्यविद्वनमश्विनेति चाप्रेषितोहोतानुवषट्कुर्यात्समहाफलःशुचिर्देवेषु घर्मोयोअश्विनोश्चमसोदेव
पानः।तमीविश्वेअमृतासोजुषाणागंधर्वस्यप्रत्यास्नाग्निरिहंति। समुद्रान्नूर्मिमुदियर्तिवेनोद्भूम्ःसमुद्रमभियज्जिगाति
सरवेसख्यायमभ्यावदृत्स्वोर्ध्वऊषुणऊतयइतिद्वेंघेमिश्वानमस्विनइतिप्रागाथीप्र्वोक्तिकाण्वीमपराह्णेऽन्य
तरांयासंतेकाण्वीत्वंवोत्तमेपावकशोचेतवद्विस्वयंपरीसुत्काभक्षमाकांक्षेइज्जिनेनभक्षोपायोहुतंहविर्मधुहवि
रिंद्रतमेग्नावश्यामतेदेवघर्म। मधुमतः पितुमतोवाजवतोंगिरस्वतोनमस्तेअस्तुमामाहिंसीरितिभक्षजपःक
र्मिणाघर्मभक्षयेयुः सर्वेतुदीक्षिताः सर्वेयुदीक्षितेषुगृहपतेस्ततीयानमोभक्षौसंप्रेषितःश्येनोनमोनिंसदनेधि १२९
याकृतमायस्मिंस्समवासेयाराहंतुप्रत्यरुहः। ऋपिर्हदीर्घस्तुनमइंद्रस्यघर्मोअतिथिः।। सयवसाद्भगवतीहिभू
यापूतिपरिदध्यात्। एनावदुत्तरंपटलं। तन्मध्यगतानिव्याख्येयानिव्याख्यायंते। उक्तिं० एतेदुग्धायामित्युत्तरादा

नंनिमित्तदर्शनादेवावस्थानेस्थिते अयतिष्ठतइतिवचनमन्त्रेयावत्तिष्ठतेनप्रत्रौसुतिंगापेक्षाकर्तव्यसेनमर्थ।दु
ग्धायां०मिति। आहि०रिति। आभि०गच्छे। आसु०त्यात्। आसिच्यमानइत्युपनस्तेगतः आजइतिवचनात्
पयसोचिंपर्यासेऽन्यविधर्मासः।। आसि०प्यति। द्वयोःपयसोरासेचनपर्यवसानेसतिसमुत्तेमहतीरयइति ब्रूया
त्। महावीर०तिष्ठेत्। एतयाभिष्टवनंकृत्वानंतरमुत्तिष्ठेत्। मेतु० ब्रजेत्। तिष्ठन्नेवोत्क्रान्तुब्रजेत्। गंधर्व०ते
यं। खरावेक्षणंतस्यपश्चात्स्नात्सुरवस्यतिष्ठतःपुनस्तमतिक्रम्यानुब्रजेत्। ब्रजित्वाश्रोणिदेशंप्राप्यनाकेसुप
र्णमित्यस्याऋचःप्रणवोच्चारणेनसहतत्रैवोपविशेत्। वाचोन्यत्रव्याहृतत्वान्निरसनेउपवेशनेमंत्रोच्चार
णंनसंभवति। प्रतिषेधस्तुनिरसनक्रियाप्रतिषेधार्थः।प्रेषितो०वानं। अत्रैवावसरेयजेतिप्रेषितएवाश्चाम
श्यांयजतिऋचोरेवात्रद्वित्वंनयाज्यायाः।तेनसकृदागूर्वषट्कारोकर्तव्यो। अग्ने०कार।। घर्मं०तिवा। वत्ता०ने
ति। प्रतिवषट्कारंनपावृत्तिः। एवमेवा०ह्णिके। आपराह्णिकप्रयग्येएवमेवसर्वंभवति।। तत्रविशेषमाह। यदु०

Indira Gandhi National
Centre for the Arts

त्तिच। एतौ ऋचौ याज्या भवति। अप्रे० कृते। उत्तरां ब्रूयादिति शेषः। अप्रेषितवचनं पर्वस्त्रे प्रेषितो यजतीत्यस्या
१२० नुवृत्तिसूचनार्थं। तेन यदुस्त्रिया स्याहुतमिति अस्य पिबतमित्येताभ्यामापराह्णिके प्रोषे तो यजती निगम्यते। हो
तृग्रहणं ब्रह्माधिकारनिवृत्त्यर्थं। तेनापराह्णिकेपि प्रवर्ग्ये वषट्कारानुवषट्कारयोर्ब्रह्मजपो नास्ती निगम्यते। तं घे० वी
ति। काण्वी० राह्णे। अन्यतरां० संत। अनयोरन्यतरामेव वा सर्वेषु प्रवर्ग्येषु ब्रूयादित्यर्थः। काण्वीत्वे० त्तमे। अ
न्यतरं पक्षे प्ययं विशेषः। उत्तमे प्रवर्ग्ये काण्वीमेव ब्रूयादिति। अनयोर्ऋचोः विशिष्टकालनिर्देशादन्यत्सर्वं सा
धारणमिति निगम्यते। पाव० सेत। एतामृचमुक्त्वा भक्षार्थमाकांक्षेत। अत्रावसाय भक्षणं कर्तव्यमित्यर्थः। या
ज्ञि० याम्यः। उक्त इति शेषः। उपाह्ववचनमिळामिव प्रतिगृह्णीयेवमादेर्धर्मस्य प्रापणार्थं। हुतं हवि० जपः। यन्मे
रेतद्दत्यस्यापवादः। अत्रापि प्राणभक्ष एव यजमानं वर्जयित्वा। कर्मिणो भक्षयेयुः। वाजिनस्यैवेश्वदेव्यामुत्सन्नत्वान्न १२०
त्र च प्रतिप्रस्थातुरभावादत्र प्रतिप्रस्थातुरुपहवलाभार्थं कर्मिणां भक्षणविधानं। क्रमस्तु वारुणप्रघासिक

एवा तस्यान्यापलभ्यत्वात्। सर्वे० क्षिताः। भक्षयेयुरिति शेषः। यजमानत्वादेव सर्वेषां भक्षणे प्राप्ते वचनमिदं मैत्रावरु
णादीनामस्मदीयानाम स्वशास्त्रविहितो याज्येनैव भक्षणं भवतीत्येवमर्थं। सर्वे० भक्षौ। सर्वाधिकारे पुनः सर्व सं
हार्थग्रहार्थं सर्वेषु दीक्षितेष्विति वचनमसत्त्रेष्वपि यजमानो गृहपतिशब्देनोच्यत इति ज्ञापनार्थं। तेन होताध्वर्युग
हपतिभ्यामित्यादौ यजमानसंप्रत्ययः सिद्धो भवति। गृहपतेस्तृतीयोत्तमभक्षविधानमुपहवे क्रमविधानार्थं। तेन
होत्रादिशब्दैरेवेतरेषामुपहवयाचनं भवति। गृहपतिशब्देन यजमानशब्देन वा गृहपतेः। एवं सत्यस्य सत्त्रस्यार्थवत्ता
भवतीति। संप्रेषितः। उत्तरां ब्रूयादिति शेषः। स्वयं० ध्यात। परिदध्याद्विनिवचनं विस्पष्टार्थं। उत्तमे फाल्गुनमाघाद
ि विद्विषोमास्स्वप्नदेव्यमित्यावपेत। उत्तमे प्रवर्ग्य इत्यर्थः॥ १॥ अथोपसत्। अथ शब्दः संबंधार्थः प्रवर्ग्योपसदोः
ते न सप्रवर्ग्यायामुपसदि स्थानाचमनप्रपदनानि न भवेति। प्रवर्ग्यार्थं प्रपन्नएवोपसदमपि कुर्वीत। अतः अप्रव
र्ग्यायामुपसदि स्थानाचमनादीनि भवंत्येव। तस्यापि त्र्यायाजपाः। उक्ता इति शेषः। लुप्यंत इत्यर्थः। प्रादेशोपवेश

Indira Gandhi National
Centre for the Arts

नेच। पित्र्य चैव व्याख्याते॥ अथ प्रादेशः दृसितः सीदहोतरित्युक्त उपविशेदिति एवं व्याख्याते इत्यर्थः। मह्न सेहो
१३१ पस्थः। पित्र्य योपवेशनातिदेशात्सव्योत्तर्मुपस्थता प्रसक्तौ दक्षिणोत्तर्युपस्थता त्वविधीयते। उपसद्यायमीढ्कु
षइतितिस्र एकैकां त्रिरनवानं ताः सामिधेन्यः। उपसद्यायमीढ्कुषइति एतामांतिसृणामृचां मध्ये एकैकामेवर्चं
त्रिरनवानमनुब्रूयात्। ता एव नवर्चः सामिधेन्यो भवंति। एकैकामिति वचनात्तिसृणां न परस्परं संतानः कार्यः।
स्वावृत्तौ तु परस्परं संतानोस्त्येव। आसु सर्वे प्रणवास्त्रिमात्रा एवा अवसानविध्यभावात्। यद्यावसानद्वयमस्ति
तत्स्वार्थप्राप्तं। सर्वार्थमेकैकामिति पृथक्करणं। तस्माद्नवचतुर्मात्रनावसाने नास्तीति सिद्धं। नवस्वृक्षु प्रणवोस्ति
नवसामिधेनीरन्वाहेति सर्वासां सामिधेनीत्वात्। तासामुत्तमेन प्रणवेनाग्निं सोमं विष्णुमित्यावाह्योपविशेत्। प्रकृ
तावुत्तमेन प्रणवेन निगदसंधानमुक्तं अत्र तु तेनाग्न्यादिदेवतावाहनस्य संधानविधानादग्नेमहानित्यादेराज्य १३१
भागदेवतावाहनपर्यंतस्य मंत्रस्य लोपो भवति। तादेवता आवाह्योपविशेदेवं निगदलोपं ब्रूयादित्येवमर्थं आवा

ह्योपविशेदित्युक्तं। आज्यपस्विष्टकृदावाहनमर्थलुप्तमेवेति। नावाहयेदित्येके। अनावाहनेप्येता एव देवताः। आवा
हनेनाम यष्टव्यानां देवतानां संग्रहणरूपः संस्कारः। तत्रावाहनप्रतिषेधे सति देवताभावोप्याशंक्येत तदाशंकानि
वृत्त्यर्थं वचनं। अग्निर्वृत्राणि जंघनद्रविणस्युर्विपन्यया। समिद्धः शुक्र आहुतः। त्वं सोमासि सत्पतिर्गयस्फानो अमीवहेदं विष्णुर्विचक्रमे त्री
णिपदा विचक्रम इति। स्विष्टकृदादि लुप्यते यथा त्राआज्यभागौ चालुप्येत इत्यर्थः। नित्यमाप्यायनं निह्नवश्च। उ
क्त इत्यर्थः। एषैवापराह्णिकी। एषोपसदपराह्णिकी कर्तव्या। तस्यां विशेषमाह। इमां मे अग्ने समिधमिमामिति तु सा
मिधेन्यः। विपर्यासो याज्यानुवाक्यानां। पाण्यो श्चनिह्नव इत्युपसदः। इत्थमुपसदः पौर्वाह्णिक्य आपराह्णि
क्यश्च कर्तव्याः। बहुवचनं वक्ष्यमाणद्वादशोपसत्पक्षे। सुपूर्वाह्णे सपराह्णे चापाः पौर्वाह्णिक्यस्ताः सुपूर्वाह्णे क
र्तव्याः। या आपराह्णिक्यस्ताः सपराह्णेइति। राजक्रयादहः संख्यानेनैकाहानां तिस्रः। यस्मिन्नहनि राजक्रयः
कृतस्तदादिरहान्येव संख्याय एकाहानां तिस्र उपसदो भवति पूर्वाह्णिक्यापराह्णिक्या वा चीकुत एकोपसद्य वर्त

रः। सेवं विधोपमन्त्रिग्रहः सुकर्तव्य इत्यर्थः। तान्यहान्युपसद इत्युच्यंत इत्यर्थः। अत्र काहशब्दः प्रकृतिवि
१३२ कृत्योः साधारणः। बहुवचनसंबंधात्। प्रकृत्यर्थत्वे न विध्यंतराभावाच्च॥ विकृत्येकाहार्थत्वेन वा त्रेता विहिताना
प्रयोगकालपरिज्ञानार्थं कर्मीचारस्त्वेकाहानामित्यत्र संकीर्तनं। षड्वा। अध्वर्युवशाद्व्यवस्थानिश्चयः। अहीनानां
द्वादशचतुर्विंशतिः संवत्सर इति मन्त्राणां। इतिकारः प्रदर्शनार्थः। तेनाध्वर्युप्रत्यक्षादुपसन्निश्चय इत्युक्तं भवति।
प्रथमयज्ञेनैके। धर्मो ज्योतिष्टोमस्य प्रथमप्रयोगे धर्ममेके शाखिनो नेच्छंति। द्वितीयादावभ्यासे इत्युक्तं स्यात्। अभ्यास
स्तु वसंते वसंते ज्योतिष्टोम इत्यनेन वचनाल्लभ्यते। अभ्यासत एव प्रथमयज्ञत्वेन स्वरूपत इति न्यायसिद्धोयमर्थः।
औपवसथ्य उभे पूर्वाह्णे। औपवसथ्येहनि ये उपसदौ ते पूर्वाह्ण एव कर्तव्ये। उपसदोपकर्षे प्रवर्ग्योप्यपकृ
ष्येते। प्रथमस्यामुपसदि वृत्तायां प्रेषितः पुरीष्यचित ये न्वाह होता दीक्षितश्चेत्। औपवसथ्येहनि या प्रथमोप १३२
सत्तस्यां समाप्तायां प्रेषितः पुरीष्यचित्सर्वमन्वाह होता दीक्षितश्चेत्। यजमानो दीक्षिते। अदीक्षिते होतरि य

जमान एवानुब्रूयात्। यजमानो दीक्षित इत्येतावतैव सिद्धे यद्धोता दीक्षितश्चेदिति वचनं तज्ज्ञापयति अन्यदपि दी
क्षितस्य होतुर्विहितं अदीक्षिते होतरि यजमानेन कर्तव्यमिति। पश्चात्सदमात्रेवस्थायाभिहिंकृत्य पुरीष्यासो अ
ग्नय इति त्रिरुपांशु सप्रणवां। सप्रणवां समानप्रणवां सर्वे त्रिमात्राः प्रणवा इत्यर्थः। अपि वा सुमंद्रं। सुमंद्रग
ह्णेन मंद्रस्याधो द्वितीयो वा यम उच्यते। तेनैवान्वाह नोपांश्विति। व्रजस्त्वनुव्रजेत्। व्रजन्त्यध्वर्युषु अनुद्रुवन्ननुव्र
जेत्। तिष्ठत्सु विसृष्टवाक्प्रणयतेति ब्रूयात्। तेषु तिष्ठत्सु अनुवचनारंभस्थाने स्थित्वा भूर्भुवः स्वरिति वाचं वि
सृज्य ततः प्रणयतेति मैत्रेषं ब्रूयात्। अथाग्निं संचितमनुगीतमनुशंसेत्। अथेति पूर्वेणास्य संबंधार्थः। ते
न पूर्वस्मिन्होता दीक्षितश्चेदित्येष धर्मोत्रापि भवति। संचितमग्निं प्रस्तोत्रानुगीतमनुशंसेत् शंसतिरयं
संस्कारकर्मेवाग्निमिति द्वितीयानिर्देशात्। पश्चादग्निपुच्छस्योपविश्याभिहिंकृत्याग्निरस्मि जन्मना जातवेदा
इति त्रिर्मध्यमया वाचा। वाक्ग्रहणं स्वरस्य हनेश्च मध्यमत्वसिध्यर्थं। एतस्मिन्नेवासने वैश्वानरीयस्य यजतिप

ष्यादग्निपुच्छस्येत्यर्थः। त्रयमेतत्साग्निचित्ये। पुरीष्यचितिरन्तु शंसनं वैश्वानरीयमिति एतत्त्रयं साग्निचित्ये
१३३ पुरुतुषु भवति। पुरीष्यचितिरितिनामधेयात्सर्वस्य अग्निमनुनीशंसतीति वचनान्मध्यमस्य उत्तमस्य चैतस्मिन्ने
वासनप्रतिपुच्छसंबंधादेवार्थस्यसिद्धत्वात्तत्र प्रयोजनमपुच्छा अप्यग्नयः संति न वर्धेत त्रयं कर्तव्यमिति
ज्ञापनार्थं। ब्रह्मा प्रतिरथं जपित्वा दक्षिणेनैवर्हिर्वेद्यास्त औदुंबर्यभिद्रवनात्। ब्रह्मणो यं नियम उच्यते। य
उक्तोग्निप्रणयने प्रतिरथं जपन्तं समाप्यापविशेत्। नित्यस्याग्नेर्दक्षिणतो बहिर्वेद्यास्त आ औदुंबर्यभिद्रव
नात्। औदुंबर्या अभिद्रवनं औदुंबर्याभिद्रवने। आ अर्भीत्यत्रोपसर्गः। उक्तमग्निप्रणयनं। यदुक्तमग्निप्रण
यनं। नदिदानीं कर्त्तव्यं। दीक्षितस्त्वबसोधीशमुपसर्पेत्। यदि दीक्षितो ब्रह्मा ततो दावसोधीशसोमकाले तो प्र
तिगच्छेत्। सुशब्दो दीक्षितस्य ब्रह्मणो मे विशेष इति दर्शयति। तेनेदं सूत्रं ब्रह्मा प्रतिरथमित्यस्मात्सूत्रादर्थ
तोनंतरं द्रष्टव्यं। ब्रह्मा प्रतिरथमित्यस्य सूत्रस्य त्रयमित्यस्मादनंतरं वचनं साग्निचित्ये एवबहिर्वेद्यामेवासनं इति १३३

ज्ञापनार्थं। तेनान्यत्र वेद्यां बहिर्वेद्यां वा न नियमः। एतदुक्तं भवति। सर्वत्र सोमेष्विग्निप्रणयने प्रतिरथं समा
प्य दक्षिणत उपविशेदास्ते औदुंबर्याभिद्रवनात्साग्निचित्ये तु बहिर्वेद्युपविश्यास्ते वसोर्धारां चोपगच्छेदिति॥ हवि
र्धाने प्रवर्तयंति। हविर्धाने शकटे अस्मिन्काले प्रवर्तयंत्यध्वर्यवः। तदुक्तं सोमप्रवहणेन। तत्र यत्कर्त्तव्यं तत्सो
मप्रवहणे नोक्तं। दक्षिणस्य तु हविर्धानस्योत्तरस्य चक्रस्यांतरा वर्त्मपादयोः। तत्रैकं शकटं भवतु द्वे अत्र विशेष
विध्यर्थस्तु शब्दः। अयमत्र विशेषः। दक्षिणस्य शकटस्य यदुत्तरं चक्रं तस्य यद्वर्त्म तस्माद्योर्मध्ये यथा भवति तथा
पश्चादनसन्निपदमात्रेतीते यो देशस्तत्र स्थित्वा एवं कृत्वानुब्रूयादित्यर्थः। युंजे वां ब्रह्म पूर्व्यं नमोभिः प्रेतां
यज्ञस्य शंभुवा युवामिदं वयमिति मानस्यंदनमधिद्वयोरदधाउक्थ्यं वचः इत्यस्या अर्द्धर्चे आरमेद्व्यवस्ता चेद्रराटी। यदि
रराटी अव्यवस्ता अवहूभवेत्तदा अधिद्वयोरदधाउक्थ्यं वचः इत्यस्या अर्द्धर्चे आरमेत्। विश्वा रूपाणि प्रतिमुंच
ते कविरिति व्यवस्तायां। व्यवस्तायां तस्यां तामीक्षमाणो विश्वा रूपाणीत्यनुब्रूयात् अतस्तस्या अर्द्धर्चे आरमेत यदि

Indira Gandhi National
Centre for the Arts

मेथ्यां न निहतेस्यातां।मेथ्योरुपनिहतयोः परित्यागिर्वलो गिर इति परिदध्यात्।मेथ्योरुपनिहतयोरेतया परिदध्या
१३४ त्। अत्र केचिदध्वर्यवः पूर्वं मेथीनिहननं कृत्वा ततो राजीवंधनं ततः परिव्ययणं कुर्वंति। तत्रापि मेथ्योरुपनिहत
योरिति भक्तकालविशिष्टत्वेन तयोः श्रवणान्न कश्चिद्दोषः। व्यत्ययोऽपि प्रयोगे तन्न कर्तव्या। यथा स्वसूत्रमेवेदम
नुवचनं वक्तव्यमिति सिद्धं॥ ११॥ अग्नीषोमौ प्रणेष्यत्सु तीर्थेन प्रपद्योत्तरेणाग्नीध्रीयमतनेन सदश्च पूर्वेण द्वारा
पत्नीशालां प्रपद्योत्तरेण शालामुखीयमतिव्रज्य पश्चादस्या पविश्य प्रेषितेऽनुब्रूयात् सावीर्हि देव प्रथमाय पित्रे
वर्ष्माणमस्मै वरिमाणमस्मै। अथास्मभ्यं सवितः सर्वताता दिवेदिव आसुवाभूरिपश्व इत्यासीनः। तीर्थेन प्रपद
नवचनं प्रपंनस्याप्यत्र नियमेन प्रपदनार्थं। पश्चादस्योपविश्येति शालामुखीयस्येत्यर्थः। उपविष्टस्यैवासी
न इति वचनं व्रजस्वाध्वर्युम्प्रथमामसमाप्यन व्रजनाप्नोतित्येदिसेवमर्थं। अनुव्रजन्तु नराः। अनुब्रूयादि १३४
तिशेषः। प्रैतुब्रह्मणस्पतिर्होता देवो अमर्त्यः पुरस्तादुपत्वाग्ने दिवेदिवे दोषावस्तरुपप्रियं पनिप्नतमित्यृर्द्धर्चे आ

रमेदाग्नीध्रीयेनिहितेभिहूयमाने ग्नेजुषस्व प्रतिहर्यतद्वच इति समाप्य प्रणवेनोपरमेत्। प्रणवेनोपरमेदित्यु
क्तेऽधिके न प्रणवेनेत्यार्थं स्यात्। अथ समाप्योपरमेदित्युच्यते तदा प्रणवनिषेधार्थं कास्यात्। तस्मादुभय
विशेषणं कृतं। उत्तरेणाग्नीध्रीयमतिव्रजत्स्वति व्रज्य सोमो जिगाति गातुविदेवानां तमस्य राजा वरुणस्तमश्वि
नेत्यर्धर्चे आरमेत्। आग्नीध्रीयमतिव्रजत्स्वध्वर्युषूत्तरेण तमतिव्रज्य सोमो जिगातीत्येतामनुब्रूयात्। तमस्य
नेत्यर्धर्चे आरमेत्। प्रपाद्यमानं राजानमनुप्रपद्येत। अंतश्च प्रागा अदितिर्भवासि श्येनो न योनिं सद
न इत्यस्या अर्द्धर्चे आरमेत्। प्रपाद्यमानं राजानमनुप्रपद्येत। अंतश्च प्रागा अदितिर्भवासि श्येनो न योनिं सद
नं धिया कृतमस्तभ्नाद्द्यामसुरो विश्ववेदा इति परिदध्यात्। उत्तरया वा क्षेमाचारे। क्षेमाय आचारः क्षेमाचा
रः क्षेमाचारे आचारणमाचारः। वाशब्दोऽवधारणार्थः। अस्यामवस्थायां क्षेमार्थं भक्ष्यप्रतीकारे कर्तव्ये
सति उत्तरयैव परिदध्यात्। एवं व्याख्यायमाने प्रसक्षश्रुतिरनुसृता भवति। अन्ये त्वेवमेव प्रपद्यापरेण वेदि
मतिव्रज्य दक्षिणतः प्राग्शालामुखीयस्योपविशेत्। उत्तरेण शालामुखीयमतिव्रज्येत्येवमेतां समर्थयंते तो परेण

Indira Gandhi National
Centre for the Arts

वेदिं प्राप्य ततिब्रह्म(?) न्यदक्षिणतः शालामुखीयस्योपविशेत्। स होतारमन्वारभ्य यथेतमग्रतो व्रजेत्। यदि राजानं प्र
१३५ णयेत् स ब्रह्मा होतारमुपविशेन्मन्वारभ्य यथेतं प्रसेत्स्यात्। ग्रतो गच्छेद्यदि ब्रह्मा राजानं प्रणयेत्। यदि शद्वसंवं धात्
ब्रह्मणः सोमप्रणयने पाक्षिकत्वमिति गम्यते। प्रणयने एवं भवति। उत्तमप्रणयतः। यदुक्तं दक्षिणतो ब्रह्मणो गुः शि
शानमिति सूक्तं जपित्वा ततो ग्रेणाहवनीयं परीत्य दक्षिणतो निरसनोपवेशनं कृत्वा तत्रैवासीतेति तदप्रणयतो ब्रह्म
णो भवति। प्रणयतस्त्विदानीमुच्यमानं भवति। तच्च प्रणयनमार्गेण गमनं गृहपतये प्रदाय ततो हविर्धाने अग्रेणाप
रेण वाति व्रज्य दक्षिणत आहवनीयस्य निरस्योपविशेत्। यद्यग्रेण प्रपन्नः स्यात्। तदा प्रपाद्यमाने राजनि प्रसेत्स्यपुन
रपरेणैवातिव्रज्य पूर्वासन एवोपविशेदित्येवमुभयोः पक्षयोरनुष्ठानाविशेषः। प्राप्य हविर्धाने गृहपतये राजानं
प्रदाय हविर्धाने अग्रेणापरेण वाति व्रज्य दक्षिणत आहवनीयस्योपविशेत्। हविर्धाने प्राप्य गृहपतये राजानं प्रद १३५
गृहपतिर्धाने सोमं चाग्रेणापरेण वाति व्रज्य दक्षिणत आहवनीयस्योपविशेत्। असति द्वितीयहविर्धानग्रहणे राज्ञए

वाग्रेणापरेण वाति व्रजेत्सति तु तस्मिंस्तयोरप्यग्रेणापरेण वा गमनं भवतीति पुनरुक्तवचनं। अग्निवुच्छस्य साग्निचित्य
यां। साग्निचित्यायां सोमयागक्रियायामग्निवुच्छस्य दक्षिणत उपविशेत्। एतत्प्रणयतो प्रणयतश्च साधारणमु
पवेशनस्थानं। एतद्ब्रह्मासनं पशौ। एतदासनं ब्रह्मणो ग्नीषोमीये पशौ भवति। इष्टिपु तैष्टिकमेव। इष्टिपशु
ष्वामन्यद्य द्वर्मादि तत्र तस्यैव दक्षिणत आसनं नाहवनीयस्येति सिद्धं। प्रातश्चावपाहोमात्। सोत्ये चाहनि वपा
होमपर्यंतमाहवनीयस्य दक्षिणत आसीत। सदः प्रवेशो त्तरकालं सदस्येवासीत। वचनादन्यत्रेति। यदि त्वग्रेण
प्रसेपात्प्रपाद्यमाने। गृहपतये राजानं प्रदाय यदि राजानं हविर्धाने चाग्रेण गतः स्यात्तदा प्रपाद्यमाने राजन्यासा
दनार्थं पुनः प्रसेपात्व्यवाय परिहारार्थं। तत्र तदानीमेव प्रसेतव्ये सति किमित्यग्रेण वा परेण वा दूर्वमतिव्र
ज्य गच्छेत्। मात्र त्रगमने प्रयोजनम्। स्त्रिवै सर्जनहोमो नामत्रिषु ग्निपुक्रियते। तत्राहवनीये हूयमाने त
स्य दक्षिणत आसनार्थं तद्दक्षिणतो गतः स्यात्। तत्र यदा परेण राजानं हविर्धाने च गतः स्यात्तदा तत्रैवासीत

Indira Gandhi National
Centre for the Arts

नप्रसेयात् व्यवायाभावात्॥१०॥ अथाग्नीषोमीयेण चरंति। पशुनेति शेषः। उत्तरवेद्यामादंडप्रदानात्। दंडप्र
दायेसूत्तरसूत्रे दंडप्रदानोत्तरकालमेव सदः प्रवेशविधानादेतावंतः पदार्था उत्तरवेदिसमीपे कर्तव्या इति प्राप्ते
१३६ वचनमिदमाग्नीषोमीयाति। दिष्टधर्मिकामामनंबंध्यायां सदसि कर्तव्यायामपि एतावंतः पदार्था उत्तरवेदि
समीपे कर्तव्या इत्येवमर्थं। दंडं प्रदायमैत्रावरुणमग्रतः कृत्वोत्तरेण हविर्धाने अतिव्रज्य स्वं याह्वा सदः प्र
पद्योत्तरेण यथास्वं धिष्ण्यमवतिव्रज्य पश्चात् स्वस्य धिष्ण्यस्योपविशति होता। उत्तरेण धिष्ण्यावतिव्रज्येत्युच्यमा
नेप्राप्नुत्तरेणोस्यार्थः कास्यात्। तन्निवृत्त्यर्थं यथा स्वमित्युच्यते। योयस्यस्वः यथास्वं। स्वं स्वं धिष्ण्यमुत्तरेणाति क्र
म्यनत्वावुत्तरेणेत्यर्थः। पश्चात् स्वस्येत्येतावता सिद्धे धिष्ण्यस्येति वचनमागंतुका अपीष्टयोस्मिन्नवसरे अत्रै
वोपविशता कर्तव्याः नवेदिश्रोण्यामित्येवमर्थं। अवतिष्ठत इतरः। स्वस्य धिष्ण्यस्य पश्चादवतिष्ठते मैत्रावरु १३६
ण इत्यर्थः। यदि देवतानां हवींष्यन्वायातयेयुरग्निर्गृहपतिः सोमो वनस्पतिः सविता सत्यप्रसवो बृहस्पतिर्वा

चस्पतिरिंद्रो ज्येष्ठो मित्रः सत्यो वरुणो धर्मपती रुद्रः पशुमान्पशुपतिर्वा। यदि शब्दसंयोगाद्दनित्यत्वमेषाम
वगम्यते। तत्राध्वर्युवशाद्विपोपज्ञानं। देवसूनां हवींषीत्येषा संज्ञा। अष्टावेत्रदेवताः। सर्वाः सगुणा एव पशुमा
न्पशुपतिरिति रुद्रस्य गुणविकल्पः॥ त्वमग्ने बृहद्वयो हव्यवाडग्निरजरः पिता नस्त्वं च सोम नो वशो ब्रह्मा दे
वानां पदवीः कवीनामा विश्वदेवं सत्पतिं न प्रमिये सवितुर्दैव्यस्य तद्बृहस्पते प्रथमं वाचो अग्रं हंसैरिव सखि
भिर्वावदद्भिः प्र ससाहिषे पुरुहूत शत्रून्भुवस्त्वमिंद्र ब्रह्मणा महान् नमीवास इत्कया मदेतः प्र स मित्र मर्तो
अस्तु प्रयस्वांस्त्वां नष्टवान्महिमा यएस्तेन त्वयावद्धो मुमुक्षते। तं विश्वस्माद्भुवनात्पा। सेधर्मणामुर्योसासिध
र्मणा। यत्किंचेदं वरुण दैव्ये जने उपतस्तोमान्पशुपाइवाकरमिति द्वे॥११॥ यद्युवैसर्वे पृष्ठान्यग्निर्गायत्रस्त्रिवृ
द्रथंतरो वासंतिकः इंद्रस्त्रैष्टुभः पंचदशो बार्हतो ग्रैष्मो विश्वेदेवा जागताः सप्तदशा वैरूपा वार्षिका मित्रावरु
णावानुष्टुभावेकविंशौ वैराजौ शारदौ बृहस्पतिः पांक्तस्त्रिणवः शाक्वरो हैमंतिकः सविता तिछंदास्त्रयस्त्रिं

Indira Gandhi National
Centre for the Arts

शोरैवतः श्रेशिरोदितिर्विष्णुपत्न्यनुमतिः॥ उवैरितिनिपातौ पक्षांतरविवक्षायां भवतः॥ सर्वदृष्टानीतिवक्ष्यमा
१३७ णानां हविषां संज्ञा॥ एतानि चान्वायत्यानि अन्वायात्यानीरेवतीपदे शोध्यानार्थः॥ अथाष्टदेवताः॥ तत्राग्नेः
षण्णामग्न्यादीनामेकैकस्या एवं च स्याश्चत्वारो गुणा शरुः॥ ततोदितिर्विष्णुपत्नी सेकः॥ ततश्चानुमतिः॥ समि
द्दिशामाशयानः स्वर्विन्मधुरेतोमाधवः पात्वस्मात्॥ अग्निर्देवो दुष्टरीतुरदाभ्य इदं क्षत्रं रक्षतु पात्वस्मान्॥ रथंतरं
सामभिः पात्वस्मान् गायत्री छंदसां धिष्ण्यरूपा॥ त्रिवृन्नो विष्टया स्तोमो अह्नां समुद्रो वात इदं मो जः पिपर्तु॥ उग्रा दिशा
मभिभूतिर्वयोधाः शुचिः शुक्रे अहन्योजसीनां॥ इंद्राधिपतिः पिपृतादतो नो महिक्षत्रं विश्वतो धारयेदं॥ बृहत्सा
मक्षत्रभृद्वृद्धवृष्ण्यं त्रिष्टुभौजः शुभितमुग्रवीरं॥ इंद्रस्तोमेन पंचदशेन मध्यमिदं वातेन सगरेण रक्ष॥ प्राची
दिशां सहयशा यशस्वती विश्वेदेवाः प्रावृषाह्नां स्वर्वती॥ इदं क्षत्रं दुष्टरमस्त्वोजो नाधृष्यं सहस्यं सहस्वत्॥ वैरू १३७
पे सामन्निहतच्छके पंजगत्यैनं विक्ष्वावेशयानि॥ विश्वेदेवाः सप्तदशेन वर्च इदं क्षत्रं सलिलवातमुग्रं॥ धर्त्री दि

शां क्षत्रमिदं दाधारोपस्थाशानां मित्रवदस्त्वोजः॥ मित्रावरुणा शरदाह्नां चिकित्वमस्मै राष्ट्राय महि शर्म यच्छ
तं॥ वैराजे सामन्नधिमे मनीषानुष्टुभा संभृतं वीर्यं सहः॥ इदं क्षत्रं मित्रवदार्द्रदानुं मित्रावरुणा रक्षमाधिपत्ये॥
सम्राड्दिशां सहसाम्नी सहस्वत्यृतुर्हेमंतो विष्टया नः पिपर्तु॥ अवस्युवाता बृहतीर्नु शक्वरीमं यज्ञमवतु नो घृता
ची॥ स्वर्वती सुदुघा नः पयस्वती दिशां देव्यवतु नो घृताची॥ त्वं गोपाः पुर एतोत पश्चाद्बृहस्पते याम्यां युङ्धि
वाचं॥ ऊर्ध्वा दिशां रंतिराशौषधीनां संवत्सरेण सविता नो अह्नां॥ रैवतसामातिछंदा उ छंदोजातशत्रुः स्योना नो
अस्तु॥ स्तोमत्रयस्त्रिंशे भुवनस्य पत्नी विवस्वद्वाते अभि नो गृणाहि॥ घृतवती सवितराधिपत्ये पयस्वती रंति
राशा नो अस्तु॥ ध्रुवा दिशां विष्णुपत्न्यघोरास्येशाना सहसो या मनोता॥ बृहस्पतिर्मातरिश्वोत वायुः संध्वाना
वाता अभि नो गृणंतु॥ विष्टंभो दिवो धरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी॥ विश्वव्यचा इषयंती सुभू
तिः शिवा नो अस्त्वदितेरुपस्थे॥ अनु नोद्यानुमतिर्यज्ञं देवेषु मन्यतां॥ अग्निश्च हव्यवाहनो भवतं दाशुषे

Indira Gandhi National
Centre for the Arts

१३८ मयः। आन्दिदनुमतेत्वं मन्यासैशं चनस्कृधि। क्रत्वेदक्षायनोहिनुप्रण आयं षितारिषदिति। देभ्या
नरीयं नवमं कार्यं दशमं। नवमदशमन्त्रश्चात योरपि सर्वं स्थांतभीया थौं। कोअस्यपुके धुरिगा क्रतस्येति
हे। औपयजैरंगारैरनभिपरिहारेश्चयतेरन्। उपयडुमार्थी औपयजाः तैरंगारैर्व्यवायपरिहारेयत्नः कर्तव्यः।
आग्नीध्रीयाच्चेदुत्तरेण होतारं। तेषामाग्नीध्रीयादाहरणे क्रियमाणे उत्तरेण होतारं पश्चान्नीत्वातमेव दक्षिणेन ह
त्वा होत्रीये निधानं कर्तव्य। शामित्राच्चेद्दक्षिणेन मैत्रावरुणं। शामित्रादाहरणे अंतरा यूप माहवनीयं च दक्षिणे
ति हृत्य दक्षिणेन विहारं पश्चान्नीत्वा मैत्रावरुणं च तस्योत्तरतो हृत्वा होत्रीय एव निधानं भवति। उपायोपदेशादेवास्मि
न्नर्थे सिद्धे एवं सूत्रं व्यवायपरिहारार्थमेवायमुपाय उपदिश्यते। नादृष्टार्थमिति ज्ञापनार्थं। तेन यत्रैवं कृते व्यवा
यो नास्ति तत्रैवं कर्तव्यं। यत्र पुनरेवं कृते व्यवाय एवस्यान्न तत्रैवं न कर्तव्यं। यथा सवनीयादौ। तत्र हुतरेणाग्नीध्री
यं परिव्रज्य सदः प्रसर्पमिति। उपोत्थानमग्नेकृत्वा निष्क्रम्य वेदं गृह्णीयात्। निष्क्रम्य वेदं गृह्णीयादित्येतावतासि १२८

द्धे उपोत्थानवचनं पदार्थव्यत्यासेऽपि प्राकृतमेव वेदमुपोत्थानमिति ज्ञापनार्थं। तेनास्य समंत्रत्वं साधितं भवति।
अग्र इति वचनमन्यत्र पितृर्वकाले क्रियमाणेनोपोत्थानेन पत्नी संयाजार्थगमनं सिद्धं तस्मिन्नेवोपोत्थाने
मंत्रप्रापणार्थं। तेन यथा प्रस्तसमिस त्र चोदायुषे सुनिष्ठित। वेदग्रहणं तु सत्यविसर्जनोत्तरकालमेवेति सिद्धं।
नेदमादिषु हृदयशूलमवांगनत्वं ध्यायाः हृदयशूलोद्वासनमित्यर्थः। संस्थिते वसतीवरीः परिहरेति दीक्षिता
अभिपरिहारयेरन्। वसतीवरीणां परिहरणे क्रियमाणे दीक्षिता अंतर्भवेयुः। अदीक्षिता बहिः स्युरित्येवमर्थं व
चनं॥१३॥ अथैतस्या रात्रेर्विवासकाले प्राग्वयसो प्रवादात्स्नातरनुवाका पामंत्रितो वाग्यत स्तीर्थेन प्रपद्या
ग्नीध्रीये जान्वाच्याहुतिं जुहुयादासन्या न्मा मंत्रात्सादिकस्याश्चिदभिशस्त्यै स्वाहेति। एतस्या रात्रेरिति वचनाद्रा
त्रेरेवायं पशुः समापनीय इति गम्यते। यस्या रात्रेः पशोः समाप्तिस्तस्या एतस्या विवासकाले यच्चतुर्थभागे प्राक्प
क्षिणां प्रवादात्स्नातरनुवाकार्थमामंत्रितो वाग्यतस्तीर्थेन प्रपद्याग्नीध्रीये जान्वाच्याहुतिं जुहुयादासन्यान्मा

Indira Gandhi National
Centre for the Arts

मंत्रादित्यनेन। वाग्यतस्तीर्थेनेतिवचनं प्रपदनकालादारभ्य वाग्यमनसिध्यर्थं। आहुतिमितिवचनमाग्नी
१३९ ध्रीयेजान्वाच्यैकामाज्याहुतिं जुहुयादाहवनीयेइति ज्ञापनार्थं। तेनोत्तरयोरप्याहुत्योर्जान्वाच्यतिसिद्धं भवति।
प्रातरनुवाकायामंत्रितस्य विधानादस्य सर्वस्य विधेः प्रातरनुवाकांगत्वं भवति। अतस्तस्याहृताबावृत्तिर्भवति।
आहवनीयेयाग्रेग्ना अग्र एतु सरस्वत्येवा चेस्वाहा। वाचं देवीं मनोनेत्रो विराजमुग्रां जेत्रीमुत्तमामेत्भक्ष्या। तामा
दिसानावमिवारुहेमानुमतां पथिभिः पारयंतीं स्वाहेति द्वितीयां। द्वितीयाग्रहणमाहुतिनिमित्तैकवचनस्यात्र कृत
त्वादन्यापेक्षेवाहुतिर्माभूदित्येवमर्थं। आतः समानं ब्रह्मणश्च। चशब्दो होतुरनुकर्षणार्थः। ब्रह्मणश्च होतुश्च
यं विधिः समान इत्यर्थः। होतुरर्थतयाविहितस्यानुकर्षणात्मपणस्येदं प्रयोजनं। ब्रह्मणः प्रथमं प्रपदनं प
श्चाद्धोतुरिति। प्राप्य हविर्धाने रराटीमभिमृशत्युर्वंतरिक्षं वीहीति। हविर्धानशब्देन हविर्धानसमीपं उच्यते। यस्यां शा १३९
लायां हविर्धाने तिष्ठतस्तस्याः शालायाः पूर्वस्मिं द्वारे रराटीनामरज्जुर्यद्धा तामभिमृशति। प्राप्य हविर्धाने हवि

र्धानयोः समीपं निशालायाः पूर्वद्वारे प्राप्येत्यर्थः। द्वयं इन्द्रस्य रोदेवी द्वारौ मामासंताप्तेलोकं। मेत्लोकक्षतौ कृणुतमिति।
द्वारि भवे द्वारे। दक्षिणेन पाणिना पर्यायेणाभिमर्शनं। मेंत्रस्तु सकृदेव द्विवचनलिंगत्वात्। प्रपद्यांतरेण युगधु
रावुपविश्य प्रेषितः प्रातरनुवाकमनुब्रूयान्मंद्रेण। हविर्धानयोर्मध्यदेशं प्रपद्य युगधुरावंतरेण पविशत्वात्र
त्रोपविश्य प्रेषितः सन्प्रातरनुवाकमनुब्रूयात् मंद्रेणस्वरेण। प्रेषितवचनमन्यत्रव्याहृतेसति होतारमन्योपि
प्रेषितो नु ब्रूयात्प्रातरनुवाकमित्येवमर्थं। अप्राप्तो मंद्रस्वरो विधीयते। तेन ज्ञायते कार्यसंबंधानामेवातिदेशो
न प्राप्तिनो विधिसंबंधानामिति। आपो रेवतीः क्षयथा हि वस्व उपप्रयंत इति सूक्ते अयानो अग्न इति षडग्निमीळे
ग्निं होतं वसिष्ठाहीति सूक्तयोरुत्तमामुद्धरेत्तमग्ने त्रुतपा इत्युत्तमामुद्धरेत्त्वं नो अग्ने महोभिरितिनवेमेवि प्रसेति
सूक्ते युक्ष्वादिग्रेष्ठंवस्त्वमग्ने बृहद्वय इत्य घाद्गा चितस्त्वेति सूक्ते अग्ने पावक रूतं व इति सूक्ते अग्निर्होतानो अ
ध्वर इति तिस्रो अग्निर्होता गृहपतिरिति चतस्रः प्रवो वाजा उपसद्याय त्वमग्ने यज्ञानामिति तिस्र उत्तमामुद्धरेदग्ने दंभा

Indira Gandhi National
Centre for the Arts

ग्निं हिन्वेतु नः प्राग्नये वाचमिति सूक्ते इमां मे अग्ने समिधमिमामिति त्रयाणामुत्तमामुद्धरेदिति गायत्रं त्वम
१४० ग्ने वसूँस्त्वं हि क्षैतवदग्ने मा यो होता जनिष्ट प्रवो देवायाग्नये कदा त इति पंच सखायः संव स्त्वामग्ने हविष्मंत इति
सूक्ते बृहद्वय इति दशानां चतुर्थं नवमे उद्धरे तमग्निमुत्तमां चादितस्त्रयाणामिमस्यानुष्टुभमबोध्यग्निः समि
धेति चत्वारि प्राग्नये बृहते प्र वेधसे कवये त्वं नो अग्ने वरुणस्य विद्वानित्यसतत्प्रभृतीनि चत्वा पूर्व्यं कृणुणः स
सस्य महि पुतेति पंच भद्रं ते अग्न इति सूक्ते सोमस्य मा तवसं प्रत्यग्निरुषस इति त्रीण्या होते तिदशानां तृतीया
द्यमे उद्धरेद्दिवस्परीति सूक्ते यो वः शर्वस्यान्नमां उद्धरेत्त्वं ह्यग्ने प्रथम इति षण्णां द्वितीयमुद्धरेत्पुरो वो मंद्रमिति चत्वारि
त्वं सुप्रतीकमिति षट् कुवेदः सुषोमा नं नि होता होतृषदन इति सूक्ते त्रिमूर्धानमिति त्रीणि बर्हिं मज्ञास सुप्र
जिन्वन्तीति त्रीणि कात उपेति रिति सूक्ते हिरण्यकेश इति तिस्रोप ऊर्मस्य महत इति सूक्ते हविरूपे इति सूक्ते अ १५०
ग्ने नयाग्ने बृहन्निति सप्तानामुत्तमाद्युत्तमास्तिस्र उद्धरेत्त्वमग्ने सुहवो रण्वसंदृगिति पंचाग्निं वो देवमिति दशानां

तृतीयचतुर्थे उद्धरेदिति त्रैष्टुभमेना वो अग्निं प्र वो यह्वमग्ने विवस्वदुषस आ यस्त्वामग्निरग्न आपाह्यच्छा
नः शीरशोचिषमिति षड्दर्शिगानुवित्तम इति समेतिया हितमग्ने वाजस्येति तिस्रः पुरुत्वा त्वामग्न ईळिष्वा
दीक्षो हि निर्जनस्य गोपास्त्वामग्ने कृतायव इममश्वो अतिथिमुषर्बुधमिति नव त्वमग्ने द्युभिरिति सूक्ते त्व
मग्ने प्रथमो अंगिरास्त्विस्तहोता अमृतानि तुदन ग्ने ति पंच वेदिषद इति षण्णां तृतीयमुद्धरेदिमं स्तोममर्हते
संज्ञाप्तवद्भिर्भित्रद्दिश्शोर्वसुं न चित्रमहसमिति जागतमग्निं तं मन्य इति पंक्तं। एतदाम्नानं प्रातरनुवाकार्थं।
अत्र विछंदसां विदेवतानां चाग्रणे विधीयते। अनुष्टुप्पंक्तीनां विछंदस्त्वाद्दृष्टानाभीष्टः अत उत्तमामुत्तमां
चादित इत्यत्र छंदस एवादित इत्यवगंतव्यं। इत्याग्नेयः क्रतुः। एतावांस्तम्माम्नायो ग्निदेवस्य इत्यर्थः। तेनोर्ध्व
ऊषुण इत्यस्य प्रागुक्तस्य प्रगाथस्य पूर्वाभिधाने विनियुक्तस्याप्याग्नेयमध्यवर्त्तित्वाल्लिंगाविरोधाच्चाग्ने
यत्वं साधितं भवति। अस्य क्रतुरिति संज्ञा भवति॥१३॥ अथोषस्यः। क्रतुरिति शेषः। आग्नेयः क्रतुरु

Indira Gandhi National
Centre for the Arts

क्तः अथेदानीमुषस्यः क्रतुरुच्यत इत्यर्थः। प्रतिष्या सूनरी जनत्युषा इतितिसृ इति गायत्रमुषो भद्रेभिरित्या
१४२ नुष्टुभमिदं श्रेष्ठं पृथक् पृथगिति सूक्ते प्रत्यर्चिरित्यष्टौ घृतवत्या मानमुषो वाजेनेव मुसत्य इति सूक्ते व्यु
षा आ गादित्रिंशा इति षडिति त्रैष्टुभं प्रत्यु अदर्शि सह वामेनेति बार्हतमुषस्तच्चित्रमाभरेति तिसृ औष्णिह
मेता उत्या इति च तस्तोजागतं महे नो अद्येति पंक्तिरित्युषस्यः क्रतुः। उभयत्रोपस्थवचनं अयं क्रतुः कुल्याः
इयोः क्रव्य इत्येवमर्थं॥२४॥ अथाश्विनः। क्रतुरिति शेषः। एषो उषा अपूर्व्येति च तस्त्रोश्विनामत्वरीति
ष आश्विनाय श्वावस्या गोमद्वसु नासत्येति तृचा दूरादिहेवेति तिस्र उत्तमा उद्वह हिष्ठो वां हवानामिति च त
स्र उदीराथामामे हवमिति गायत्रं भद्रा यस्य इति सूक्ते आ नो विश्वाभिस्त्वं चिदत्रिमिस्ता नुष्टुभमा भात्यग्नि
रिति सूक्ते आ नो विश्वाभिस्त्वं चिदत्रिमिस्ता नुष्टुभमा भात्यग्निरिति सूक्ते सुषेनरेति सूक्ते युवोरजांसी १४१
ति पंचानां तृतीयमुद्धरेत्यति वां रथमिति सप्तानां द्वितीयमुद्धरेदिति त्रैष्टुभमिमा उ वामिमं वामोसम व

आ रथमिति सप्तमुत्तमीयां पत्त्य इति बार्हतमाश्विनाय वर्तिरस्मदा श्विना येह गच्छतमिति तच्चो युवो रूपरथं
दुवद्यितिपंचदशसोलृत् मव्याध्यग्निर्ज्ये वस्य भानुरावोरथमस्मदिदं यो वां परिज्मेति त्रीणि त्रिष्टुन्नो अ
द्येळे द्यावापृथिवी इति जागतं प्रति प्रियतममिति पंक्तः। इत्येतेषां छंदसां पृथक् सूक्तानि प्रातरनुवाकः
कर्तव्य इति शेषः। यान्येतानि त्रिषु क्रतुषु सप्त छंदांस्युक्तानि तेषां सर्वेषां पृथक् सूक्तानि गत्वोया
त्र न किंचिदपि छंदः परिवर्जयेत्। सर्वेषां छंदसां एकैकं सूक्तं गत्वोयादित्यर्थः। सूक्तग्रहणं सूक्तानामेव
उक्तार्थं। एवं क्रियमाणो यावान् ऋक्समूहः संपद्यते स प्रातरनुवाको भवतीत्यर्थः। शतप्रभृत्यपरिमितः। पू
र्वोक्तादन्यो यं प्रातरनुवाकः शतप्रभृत्यपरिमित इति शताधिको द्विशतादर्वागनियतसंख्य इत्यर्थः। अत ए
वास्मिन् प्रातरनुवाके अर्थात् सूक्तखंडनं भवति। एवमादीनां लघूनां साद्यस्के संसवे च प्रयोगो भवतीति तत्र त
राध्या श्विकीर्षितत्वादिति। नान्यैराग्नेयं गायत्रमल्लावपेद् ब्राह्मणस्य। अन्यैश्छंदोभिराग्नेयं गायत्रं छंदो नासा

Indira Gandhi National
Centre for the Arts

वपेत्। अन्यैरिति बहुवचनस्य त्रिभिरेव चरितार्थत्वात् त्रिभिरल्पावापेन कर्तव्यः। त्रिभिरधिकैरल्पावापेन दोषः।
१४२ एष नियमो ब्राह्मणस्य। नत्वेष्टुभे राजन्यस्य न जागतं वैश्यस्य। आग्नेयमित्यनुवर्तते अल्पावपेदिति च। अध्यास
वदेकपदद्विपदाः। उपसमस्य प्रणुयादित्यर्थः। उपसमासो नाम पूर्वस्या ऋचोन्ते प्रणवमकृत्वा ऋगक्षरवशेने
कपदद्विपदाः संधायतामामंते प्रणवं कुर्यात्। अत्रैतासां बहुत्वासंभवाद्बहुवचनोपदेशसामर्थ्यादन्यस्या अप्ययं
विधिर्भवति ग्रावस्तोत्रे। अयमुपसमासः कृपातिन्या एव द्विपदायाः। अनेकद्विपदासंहतौ पक्ष एव वक्तव्याः
।पक्षो द्विपदां त्रिरित्यनुवचनेपि तथा दर्शनात्। यथास्थानं मुताले मांगलान्यगन्यम ... ईडे द्यावापृथि
वी इति। यथास्थानमिति यास्मिन्क्रमे एतानि विहितानि तस्मिन्नेव क्रमेनुवक्तव्यानीत्यर्थः। ब्रवाणीति वचना
द्बतकल्पेप्येषां खंडनं माभूदिति गम्यते। मांगलानीति चैषां संज्ञा भवति। विध्यंतरविहितत्वात्स्वस्य छंदसोधि १४२
कान्येतानीति गम्यते। संज्ञाप्रवृत्तिरिति च यः पश्यं स्वर्गकामः। यः पुनर्यजमानो मरिष्यद्वस्थो वर्तते स्य

घोषं कामयेत यदि मरिष्यामि स्वर्गं नाप्नुयामिति तस्यैतदपि मांगलं भवतीत्यर्थः। ईडे द्यावी यमावर्तयेदातम
सोपघातात्। यदा ईडे द्यावीयपर्यंते मन्त्रे तमसोपघातो न ज्ञायते तदा तदेव सूक्तमावर्तयेत् यावत्तमोपगच्छे
त्। कालकउत्तमयोस्त्यासन्नान्मध्यमस्थानेन प्रतिप्रियतममित्युपसंतनुयात्। कालेन तमसापहत इत्यर्थः।
ईडे द्यावीयस्योत्तमयचां प्रतिप्रियतममिति सूक्तमुपसंतनुयात्। प्रवीमनादुत्सृप्येतत्कर्तव्यं। एतदुक्तं भव
ति। प्रातरनुवाकस्यादित आरभ्य ईडे द्यावीयपर्यंतं मंद्रस्वर आरोहिक्रमेण सर्वः प्रयोक्तव्यः। ईडे द्यावीयस्यो
त्तमक्रांतेन मंद्रस्योत्तमेन यमेन प्रतिप्रियतममित्येतद्द्वियं मध्यमस्य प्रथमं यममारभेत। अस्मिंस्त्व
के उत्तमायाः प्रागारोहिक्रमेणैव मध्यमस्यां सर्वं प्रयुंजीत। ततो मध्यमस्योत्तमेन यमेन उत्तमक्रांतमुत्तम
स्य प्रथमं यममाददीत। आदायारोहिक्रमेणैवोत्तमस्वरं तस्यामेवर्चि सर्वं प्रयुंजीत। एवं स्वरक्रमेणैवानभ्यारू
तं भवति। उत्सर्पणं च पूर्वत्रोत्तमायाः समाप्तिक्षणे उत्तरत्रोपोत्तमायाः समाप्तिक्षण इत्यर्थः। पुनरुक्तप्रयो

Indira Gandhi National
Centre for the Arts

नमयोनमस्यानेनपरिदध्यादंतरेणद्वार्यस्थूणेअनभ्याहृतमाश्रावयंनिधाश्रावयंनिध।उत्सर्पणस्वरूपमत्रे
१५२ वंभवति।ब्रह्मासनलक्षणदेवस्थानात्स्थानांतरेउत्सर्पणे।युगधुरावंतरेणोपविष्टःसन्प्रथममुत्सर्प्यपर्यास
नासरतःसन्प्रतिप्रियतममिसृष्टानन्वाह।ततःपुनरुत्सर्पणेनद्वार्यस्थूणेअंतरेणसन्उत्तमयापरिद
ध्यात्।आश्रावणस्यसिद्धवदुपदेशान्नस्यैवंस्वरोभवतीतिनिश्चीयते।एतदुक्तंभवति।मंद्रादीनांमध्यय
स्मिन्नाश्रावणंप्रयुज्यतेतस्यस्वरस्यसर्वेयमाआश्रावणेप्रयोक्तव्याः।प्रत्याश्रावणेप्येवंप्रयोगसिध्य
र्थमाश्रावणदृष्टांतःकृतः।इदमनुवचनंप्रधानंकर्मशंसतिवत्।ननुसर्वाण्यनुवचनान्याग्निमंथनादी
निसंस्कारकर्माणीतिप्रसिद्धं।सत्यंप्रसिद्धं।तत्रसंस्कार्यस्यसमन्वयोस्त्यग्न्यादेः।नत्वत्रापिप्रातर्याव्णः।म
हत्सुषोश्विनांसमन्वयोदृश्यतेसंप्रेषितोमंत्रलिंगाच्चेति।सत्यंसमन्वयोस्ति।तस्यसंस्कार्यत्वेप्रमाणंनास्ति। १५३
स्तोतिशंसत्सादावप्यभिधेयतयासमन्वयस्यदृष्टत्वात्।ननुसंप्रेषितइतितत्रप्रातर्यावद्वनासेवं

धिगुणसंज्ञा।तेनार्थमनुब्रूहीत्येवमभिभविष्यति।एवंकार्यांतराणांनाम्नाभिधानमित्यनवगमात्।उच्यतेःसंबं
धितुकर्मज्योतिष्टोमेक्वचिदपिनदृश्यते।अग्न्यश्विसंबंधित्वस्येवतथापिनत्कर्मसंबंधिनारूपमत्रविकार्यमितिमित्य
नवगमात्प्रधानकर्मैवैतदितिनिश्चिनुमः।यदिपुनःकर्मांतरसंबंधिद्रव्यसंबंधिमात्रादेवसंस्कारत्वमभ्युपगतं
स्यात्।तत्रसर्वेषांस्तोतिशंसतीनांसंस्कारकर्मत्वमेवस्यात्।अत्रचअनुवचनेचैवधर्म्योलिंगमस्ति।मनसातेवाचंप्र
तिगृणामीतिप्रातरनुवाकमनुब्रुवंतंहोतारमध्वर्युराहेति।अत्रप्रतिगरःसंस्तुतिलिंगः।तथाचास्यसंनिधौवि
श्वरूपानामस्तुतिर्वाग्देवतायांऋचिक्रियते।तस्याश्चप्रधानकर्मत्वमवगतं।तत्साहचर्याच्चप्रधानकर्मेतिसि
द्धं।।चिंताप्रयोजनंस्यावसरेतदक्रियायांमासोमप्रयोगपरिसमाप्तेर्विपर्यासप्रायश्चित्तंकृत्वापुनस्तदपिकर्तव्य
मेवप्रधानकर्मत्वात्।संस्कारकर्मत्वेसतिसंस्कार्येप्रायश्चित्तमेवनपुनःप्रयोगइति।।१५।।इत्याश्वलायनसू
त्रवृत्तौनारायणीयायांचतुर्थोध्यायः।।४।।परिहितेपद्युहोतरिसुत्कोनभिहिंकृत्वापोनप्त्रीयानन्वाहषष्ठेन

Indira Gandhi National Centre for the Arts

स्तरां परिधानीयायाः। परिधानविध्युत्तरकालमेवास्यानुवचनस्य विधानात्परिहितइत्यस्मिन्नर्थे सिद्धयत्परिहि
तवचनेनतत्परिधानीयापोनप्त्रीययोः संबंधकरणार्थं। तेनानयोः कर्तव्यानोपवेशनानामेकंसाधितंभवति। अव
१८५ धित्वेचशनैर्भावस्य परिधानीयाया एवेति साधितंभवति। संप्रैषपाठोनुवचनादिकालपरिज्ञानसाधनयोः संप्रै
षस्वशास्त्रचोदनयोर्विप्रतिपत्तौतयोरन्यतरेण पितद्नुवचनादिसिध्यतीत्येवमर्थः। ईषदल्पमित्यर्थः। श
नैस्तरां। नीचैस्तरामित्यर्थः। परिहितवचनादेव परिधानीयाया अवधित्वे सिद्धे पुनः परिधानीयावचनं परिधानी
याया अवस्थापरिग्रहार्थं। परिधानीयायाः[illegible]रिधानीयाया इत्येवमर्थं। तत्र परिधानीयायामुत्तमस्वरो
यमारोहक्रमेण कृत्स्नः प्रयुक्तः। तत्रांत्याद्यमात्र्धनैस्तरां भवतीत्यर्थः। तत्रानंतरैकांतरयोर्थमयोरुच्चनी
चत्वोपलंभनाशक्के: छंतरादिषु सर्वेषु प्राप्तेष्वपीषच्छब्देन छंतरएव यमो नियम्यते। तेनोत्तमस्य चतुर्थेनयमे १८४
नानुवक्तव्यमितिसिद्धं। तासां निगदादिशनैस्तरां ताभ्यश्चाप्रसर्पणात्। प्रसर्पणशब्देनेहोत्तमस्यानुप्रपद्येने

ष्येतस्यपदंनगृह्यते। एतच्चतासामिस्वस्यप्रसर्पणविशेषणत्वाल्लभ्यते। ताभ्य इति निगदस्याभाविन्यक्रेषां ग्र
हणे। एतदुक्तंभवति। आपोनप्त्रीयाणां मध्ये प्रसर्पणं आतस्मान्निगदादिशनैस्तरां भवतीति। अत्रेषच्छब्दाभावात्त्र्यं त
रादये। येयमास्तेग्रहणे। तेनात्र मध्यमस्वरो विहितव्यः। परं मंद्रेण। प्रपदनाद्युत्तरं मपोनप्त्रीयाणां तन्मंद्रेण प्रयोक्त
व्यं। एतदपोनप्त्रीयाधिकाराल्लभ्यते। प्रातः सवनं चा प्रातः सवनं च मंद्रस्वरेण प्रयोक्तव्यमिति। तच्चोपांशुग्रहादिअ
च्छावाकशस्त्रपर्यंतं तत्र सर्वत्र मंद्रस्वरो भवतीत्यर्थः। अध्यर्द्धकारं प्रथमामृग्वा वा नमुत्तराः। अध्यर्द्धकारस्यउत्तरयासं
ताना दिरोधादृगावान तावाश्च पूर्वयासंतानादिरोधादत्र द्वितीयादाने पंचार्धर्चो अनुद्धसतावक्तव्याः नवृत्तिकामस्य
प्रकृत्यावा। उत्तरादृत्यनुवर्त्तते। सामिधेनीन्यायेनेत्यर्थः। प्रकृतिभावे पूर्वेषां सामर्थ्ये चैषु लिंगानि कांक्षेत। प्रकृत्या
वेत्यस्मिन्पक्षे लिंगाकांक्षा एवं भवति। यस्याऋचोपदपेक्षणीयलिंगं तस्याः पूर्वस्याऋचोर्धचेस्थितत्वात्तल्लिंगमाकांक्षे
त। प्रदेवमाब्रह्मणेगातुरेत्विति नवदितोतानोअध्वरंदेवज्येतिरग्नीं। ग्नाग्नीग्रहणं ब्राह्मणानुवादः। आ। वर्द्धमनीर

थनुद्विधाराइत्यादृतास्वेकधनासु। अत्रद्विविधा आपः वसतीवर्य एकधना श्च। तत्र वर्वेषु रेव वसतीवर्यो गृही
१४५ ताः। एकधना इदानीं गृह्यंते ताः गृहीतासु गृहणदेशादेव यजनदेशे प्रतिपदाः वर्त्तते तदेव मगनुवक्तव्या। प्रतिपदा
पो अद्य समायती रिति प्रतिदृश्यमानासु। अत्रे वासीनस्य दृष्टिपथमागतासु। आधेनवः पयसा तूर्ण्यर्थीः॥ इत्यु
पायती ष्विति ब्राह्मणोक्तः शेषः। समीपमागतास्वित्यर्थः। समन्यायंत्युपयंत्यन्या इति। समायतीष्वित्यत्रापि शेषः।
वसतीवरीभिः समागतास्वित्यर्थः। इति शब्दो ब्राह्मणोक्तकार्यसूचनार्थः। तीर्थदेशे होता चमसे पात्र्यमाण
आपो नदेवी रुपयंति होत्रियमिति समाप्य प्रणवेनोपरमेत। प्रकृतिभाव पक्षेपि अत्रोपरमोनित्यो विधानसाम
र्थ्यात। आगतमध्वर्युमवेरपोध्वर्यो ३ उ इति पृच्छति। उतेमनंनमुरिति प्रत्युक्तो निगदं ब्रुवन्प्रति निष्क्रामेत। प्र
तिवचनपाठः प्रतिवचनार्थप्रतिपादने अविस्पष्टार्थत्वादयमसौ निगद इत्थं वक्तव्य इत्याह। तास्वध्वर्यो इंद्रा १४५
यसोमं सोतामधुमंतं वृष्टिवनिं तीव्रांतं बहुरमध्यं वसुमते रुद्रवत आदित्यवत ऋभुमते विभुमते वाजवते बृहस्प

तिवते विश्वदेव्यावत इत्यंतमनवानमुक्तो द्गास्तोपथो वतिष्ठेत। इत्यंतवचनाद्यस्येंद्र इत्यादिरप्यस्यैव निगद
स्यैकदेश इति गम्यते। आसामेकधनानामागतं तीनां मुखतो गच्छता अपरेणातीत्य उत्तरतस्तिष्ठेदित्यर्थः। उ
पातीतास्वन्वावर्तेत। तास्वदूरेणात्मनो तीतास्वन्वावर्तेत। यस्येंद्रः पीता वृत्राणि जंघनत्प्रसजन्यानि तारिषोऽ
मं बध्या यंत्य ध्वमिमिति तिसृः। अन्वावृत्य ततोपस्येंद्र इत्यादि ब्रुवन्ननुव्रजेत। उद्गातानपक्षे चानेन प्रणव
न संतानः कर्तव्यः पाठसामर्थ्यात। उत्तमया नु प्रपद्येत। तिसृणामुत्तमयेत्यर्थः। एमा अग्मन्रेवतीर्जीवध
न्या इति द्वे सन्ना। स ऊरस्यापरिधायोत्तरां तूष्णीमासाद्य राजानमभिमुखउपविशेदनिरस्यत्तृणं। संनारेकधना
स्वित्यर्थः। तासामेवाधिकारात। आग्मन्नापइत्यनयापरिधाय ततो निष्क्रम्य पुनः पूर्वया हूतहविर्धानं प्रवि
श्य तस्यामेव द्वारि याउत्तरा स्थूणा तस्याः पार्श्वसमीपे राजानमभिमुख उपविशेद तृणं तृणमेव निरसनं। निरसनो
पवेशनमंत्रमनुक्त्वैव॥११॥ उपांशुं हूयमानं प्राणं यच्छ स्वाहा त्वा सुहव सूर्यायेति प्राणं प्राणं मे यच्छ सनुमंत्र्य उ॑ः इत्य

Indira Gandhi National
Centre for the Arts

नुग्राण्यात्। उपांशुर्नामग्रहः तं हूयमानमभिमुखोभूत्वानेन मंत्रेणानुमंत्र्यानुलोम्येन प्राणनं कुर्यात्। अंतः शरी
१५६ रस्थं वायुं नासिकाद्वारेण बहिर्निर्गमयेदित्यर्थः। अंतर्यामम पानं यच्छ स्वाहा त्वा सुहवस्सूर्याया पाना पानं मेयच्छे
त्यनुमंत्र्य ॐ इति चाभ्यपान्यात्। अभिमुख्येनांतः शरीरं बहिष्ठं वायुं नासिकया प्रवेशयेत्। प्राणनापाननेमोः स्व
रूप निदर्शनं पदार्थसंशयनिवृत्त्यर्थं। चकारो ब्राह्मणोक्तविध्यनुकर्षणार्थः। सोयंविधिः। प्राणं यच्छ स्वाहा त्वा
सुहव सूर्यायेत्युपांशुमनुमंत्र्य तमेवाभि प्राणेद् दक्षिणेनाग्रेणैव मंतर्याममुत्तरस्यमं त्रस्य पूर्वेण भागेनानु
मंत्र्योत्तरेण भागेनाभ्यपानेदिति। एवं याभ्यां कार्यमिति चशब्दः। उपांशुसवनं ग्रावाणं स्थानाध्यस्त्वेत्यभिम
न्त्र्य वा संविसृजेत। उपांशुग्रहार्थः सोमः उपांशुरित्युच्यते। सोभिषूयते येन ग्राव्णा स उपांशुसवनस्तं स्थानाध्य
स्त्वेत्यभिमंत्र्यापान श्रीयां रेनस्थान उपविश्य भर्भुवः स्वरिति वा संविसृजेत्। प्रातरनुवाकामंत्रणकाल एव
नियतावाकृतत्सं बंधादपोनश्रीयाम्स्थापितद्वस्थे यावस्थिता तामुपानुब्रुवन्ननुव्रजनमस्तीति तदंते विसृज्य १५६

मानामंत्रवत्से व विसृज्याभवेत्से वा त्रानाहुतयोरूपांश्वंतर्यामयोरिति उत्क्रष्टा विसृज्यत इत्यवगंतव्यं। नात्र विचारणी
यमन्यदस्ति। पवमानायसर्पणे न कश्चिद्दोषः अन्ये चाव रूणो ब्रह्मा चनिसौ। पवमानायेति वचनं पवमानार्थमुद्गात्रा
द्यो यत आरभ्य प्रसर्पंति तत एवारभ्येतावधि प्रसर्पंतीं न विप्रुड्ढोमकाले। तत्कालमेवेत्येवमर्थः। अन्वक्प्रस्तुत
इत्यर्थः। नित्यवचनं प्रत्येति सत्राद्यौ चादौ मुख्यकर्म द्वितीयः कुर्याद् द्वितीयः कर्म तृतीयः कुर्यादित्यत्रापि सर्पणेत
योर्नित्यमेवेव प्रापणार्थं नत्त्वार्यं कुर्वतोस्त्वद्वर्णपुरुषयोः प्राप्तिरित्येवमर्थं। तावंतरेणेतरे दीक्षिताश्चेत्। ताविति
ब्रह्ममैत्रावरुणावित्यर्थः। इतर इति ताभ्यामन्ये होतृब्रह्मवर्ग्याः पुरुषा इत्यर्थः। दीक्षिताश्चेदिति वचनाददीक्षिता
नामेतेषां सर्पणं नास्तीति गम्यते। दीक्षितानां यजमानत्वादेव सर्पणे सिद्धे पुनर्वचनमेतेषामस्मच्छास्त्रोक्तविधि
प्रापणार्थं। अंतरेणेति। मध्यत इत्यर्थः। द्रप्सश्चस्कंदेति द्वाभ्यां विप्रुड्ढोमो हुत्वाध्वर्युमुखाः सम न्वारब्धाः सर्पंत्या
ती र्थदेशात्। विप्रुड्ढोम इति नाम। हुत्वा सर्पंतीति वचनात्सर्पणं तो होम इति गम्यते। तेन येये प्रसर्पंति ते ते उदक्
Indira Gandhi National
Centre for the Arts

तीतिगम्यते। अध्वर्युमुखा अध्वर्युकारिण इत्यर्थः। समन्वारभ्य अविच्छेदेन परस्परं स्पृशंत इत्यर्थः। आती
र्थदेशादिति वचनात्तावदेवाध्वर्युप्रधानत्वं तीर्थदेशं प्राप्य उपवेशनादि स्वाधीनाएवेत्येवमर्थः। ततस्तो त्रायोपवि
१४१ श्योद्गातारमभिमुखाः। तस्य बहिष्पवमानस्य स्तोत्रं तत्स्तोत्रं स्तुतिरित्यर्थः। बहिष्पवमानस्तुत्यर्थमुद्गातारमभिमु
खा उपविश्युः। दक्षिणतो ब्रह्मोदङ्मुखः। पश्चान्मैत्रावरुणः प्राङ्मुखः। बहुवचनेमत्रापेक्षं। तान्होतानुमंत्रयते त्रै
वासीनो यो देवानामिह सोमपीथाय त्रेबर्हिर्दिदेयो। तस्मादपि भक्षयामसिमुखमसि मुखं भूयासमिति। तान्बहि
ष्पवमानार्थमुपविष्टानित्यर्थः। अंत्रैवासीनद्वितियत्रैवोपविष्टप्रवाग्विसर्गं करोतितत्रैवेत्यर्थः। होतृग्रहणं हो
तैवात्रासीनोनुमंत्रयते न यजमान इत्येवमर्थं यदि यजमान एव होत्रं करोति तदा यजमानतयासर्पणं कृत्वा त १४७
त्रस्थ एवानुमंत्रणं कुर्यात्। तथा च वचनमस्ति। यद्युवेत्युपंयजमानो होता स्यात्सर्पेदेवेति। दीक्षितश्चेद्व्रजेत्स्तो
त्रायस्याराम। यदि होता दीक्षितस्तदानुमंत्रणं कृत्वा पुनस्तत्र गच्छेद्याजमानं कर्तुं। एवं सत्रे होतृग्रहणाद्यज

मानस्य होतृत्वेन गत्वानुमंत्रणमुक्तं। अत्र होतुर्यजमानत्वेनुमंत्रणं कृत्वा पश्चाद्याजमानं कर्तुं व्रजेदित्युक्तं। तेनेद
मुक्तं भवति। एकाहाहीनेषु यजमानस्य होतृत्वे सत्रेषु गृहपतेर्होतृत्वे च गत्वानुमंत्रणं भवति। सत्रेष्वेव होतानुमं
त्रणं कृत्वा गच्छेद्याजमानकरणाय। अन्यत्रानुमंत्रणं कृत्वापि न गंतव्यमित्यर्थः। सर्पेच्चोत्तरयोः सवनयोः।
यदि होता दीक्षितस्तदोत्तरयोः सवनयोः सर्पणमपि कुर्यात्। बहिष्पवमाने त्रैवासीनोनुमंत्र्य पुनर्गच्छेत्। उ
त्तरयोः सवनयोः सर्पणादि सर्वं याजमानं कुर्यादित्यर्थः। ब्रह्मन्स्तोष्यामः प्रशास्तरित्युक्तो त्रायाति सर्जितो
वति सत्यतः। ब्रह्ममैत्रावरुणयो रयं विधिः। तयोरेवात्र प्रत्यति सर्जनविधिदर्शना। इति सर्जनवाक्यपाठोते
सर्जनवाक्ये परस्मैपदप्रयोगस्तत्रापि पत्यति सर्जनवाक्ये आत्मनेपदप्रयोगार्थं। भूरिंद्रवंतः सवितृप्रसूताः
इति जपित्वा स्तुध्वमिति ब्रह्मा प्रातःसवने। प्रातःसवनग्रहणं माध्यंदिनादिस्तोत्रनिवृत्यर्थं। भुव इति माध्यंदिने। स्वरि
ति तृतीयसवने। भूर्भुवःस्वरिंद्रवंतः सवितृप्रसूता इत्यर्धमात्रिमारुतात्। इंद्रवंत इत्यादौ पूर्ववदधिकारस्मि

Indira Gandhi National
Centre for the Arts

ऽपि पुनर्वचनं व्याहृतिवच्च विशिष्टस्तुत्यर्थं यं मंत्र ऊर्ध्वमाग्निमारुतादुक्थानि मरुत्वतीयमंत्राः संहृत्य भवंतीत्येव
१५८ मर्थः। उक्थ्यादिष्विति वक्ष्ये ऊर्ध्वमाग्निमारुतादिति वचनं मानसादग्निष्टोमस्तोत्रसंग्रहार्थं। स्तुतदेवेन सवि
त्रा प्रसूता ऋतं च सत्यं च वदत। आयुष्मान् सक्थ चोमा गात तनूपा साम्न ऋध्यमिति जपित्वा मंत्रावरुणस्तुध्वमित्यु
च्चैः। जपित्वोच्चैरित्युभयवचनमस्यैव भवतीत्येवमर्थं। तेन ब्रह्मणोऽपि ऊर्ध्वं यावणादित्यमपि विधिर्भ
वतीति गम्यते॥ २॥ अथ सवनीयेन पशुना चरंति। सवनेषु भवः सवनीयः। वपया प्रातःसवने चरंति पुरोडाशेन
माध्यंदिने गोस्तृतीयसवने इत्येवं यष्टव्य इत्यर्थः। परिव्ययणाद्युक्तमित्येवमादिभिर्लिंगैः पशुत्वे सिद्धेऽपि पशुने
ति वचनं पुरोडाशनामपि सवनीयसंज्ञाप्रापणार्थं। यद्देवतो भवति। तस्य पशोर्या देवता शास्त्रांतरेष्वपि विहि
ता तद्देवत्योऽपि पशुः कर्तव्यः। एतदुक्तं भवति सवनीयपशोर्देवतांतरप्रमाणाभावाद् [illegible] स्मात् लंना स्तीत्यर्थः। आ १५८
ग्नेयोऽग्निष्टोमः ऐंद्राग्न उक्थ्ये द्वितीय ऐंद्रो वृष्णिः षोडशिनि तृतीयः सारस्वती मेष्यतिरात्रे चतुर्थी। अत्र च प्र

त्यप्रयोगादेव समुच्चयं विदधाति तद्व्यापयति याधिकोऽयं समुच्चय इति। वृष्णिर्मेषजातौ पुमान्। इति क्रतुपशवः।
एते चत्वारः क्रतुपशुसंज्ञा भवंति। परिव्ययणाद्युक्तमग्नीषोमीयस्याचात्वालमार्जनाद्द्रद्वप्रदानवर्जं। परिव्ययणादि
पश्चात्वालमार्जनपर्यंतमग्नीषोमीयपशोर्विहितं तदत्रापि भवति। अयमेवार्थं। अविधातुमिष्टः। एवं व्याख्याय
माने उभयत्र चात्वालमार्जनस्यानेदमादिषु मार्जनमिति प्रतिषिद्धस्य प्रतिप्रसवः कृतो भवति। अग्नीषोमीय संबंधि
तया सिद्धवदुपदिश्यत तस्य सवनीयसंबंधितया पुनर्विधानात्तद्वत्यं तर्भावाद्द्रदप्रदानमत्र प्रतिषिध्यते। तेनात्र त
मेवामंत्रकमादाय एवं वद्दोतारं परिहृत्य तस्याग्रतो गमनादि पूर्ववत्कुर्यात्। उपविश्याभिहिंकृत्य परिव्ययणीयाभिः
उपविश्येति वचनमुपविश्य परिव्ययणीया मे ब्रूयात् न पूर्वस्या उत्तरार्धर्चमपीत्येवमर्थं। आवह देवान् सुन्वते य
जमानायेत्यावाहनादिषु च छंदोग्रे यजमानशब्दादेश्विकेषु निगमेषु। आवाहनादिषु सुन्वच्छब्दोऽग्रे यजमानशब्दा
दित्येवं लक्षणस्य सिद्धस्य सुन्वच्छब्दस्य सुन्वते यजमानायेति पाठो यजमानशब्दादेवाग्रे सुन्वच्छब्दः कर्तव्यः नत

Indira Gandhi National
Centre for the Arts

स्पर्धया यज्ञपतिशब्दादेशः इत्येवमर्थं। यजमानशब्दसमानविभक्तिप्रापणाय चेति। आवाहनादिग्रहणमस्मि
१५९ न्नहनि यस्य यदैष्टिकं तंत्रं प्रवर्तते तदा तदास्य विधेः प्रापणार्थं। ऐष्टिकग्रहणमनैष्टिकनिवृत्त्यर्थं॥ नोत्साध्याधि
योजनादूर्ध्वं॥ अहर्गणेषु समनन्तरं चास्तीति विशेषणं। एकाहेष्वेकत्वादहस्तदेवाध्यनवद्भवति। अंत्येहनि यद्यो
जनेतस्मादूर्ध्वमयं विधिर्न भवतीत्यर्थः॥ न पात्नीवतमाधुते यजमानदेवता ओमन्वतीतेस्मिन्यज्ञे यजमानेति च।
अनयोरपि विषययोरयं विधिर्न भवति॥ प्रागाम्येभ्यः सवनदेवता आवाहयेदिदं वसुमंतमावह इदं रुद्रवंतमा
वह इदमादित्यवंतमृभुमंतं विभुमंतं वाजवंतं बृहस्पतिवंतं विश्वदेव्यावंतमावहेति। सवनदेवता अनिर्दिष्टदेवता
नां सोमानां सवने सवने देवता। स्ते च सवनमुखे सवनमुखे होतुर्वषट्कारे हूयंत इत्यर्थः। अपर्वतां सोमस्यावा
हनप्रकारपाठे यमप्राप्तत्वात् क्रियते॥ ताः सकृदाकल्पानुवर्तयेत्। अयमप्यप्राप्तविधिः। अपर्वतादेव। एव १५९
कारो विस्पष्टार्थः। प्रवृत्ताहुतीर्जुह्वति वषट्कर्तारो ऽन्ये ऽच्छावाकात्॥ यस्मिन्नहनि वषट्कारसंबंधिनस्तस्मि

न्काले प्रवृत्ताहुतीर्जुह्वति। अच्छावाकं वर्जयित्वा। अस्मादेवाच्छावाकप्रतिषेधादवगम्यते प्रवृत्ताहुतयो नवरण
निमित्ता इति। अच्छावाकस्य वरणाभावात्। तेनाग्नीषोमीये ऽहनि वरणे कृतेपि होतुरन्येतस्मिन्नहनि न जुह्वति। होतु
स्तु पाशुको वैकल्पिकः सिद्ध एव। चात्वाले मार्जयित्वाऽध्वर्युपथेनोपतिष्ठंत आदित्यप्रभृतीन्धिष्ण्यान्। चात्वाल मा
र्जनांतं पाशुकं कर्म प्रादिष्टं। तत्र चात्वाले मार्जने कृते सौमिकमुपस्थानादिकर्म कुर्युरित्यर्थः। तेन पाशुककर्तार एव
मार्जनं कुर्युः। अध्वर्युपथेन इत्यध्वर्युपथे तिष्ठंत इत्यर्थः। आदित्यप्रभृतीन्वक्ष्यमाणान्धिष्ण्यानुपतिष्ठंते। आदित्य
प्रभृतिवचनमादित्यस्याविधिष्ण्यत्वप्रतिपादनार्थं। तेनोपस्थितान्धिष्ण्यादादित्यस्यापि ग्रहणं भवति। आदित्यमग्रे
ध्वनामध्वपतेश्रेष्ठः स्वस्त्यस्याध्वनः पारमशीयेति। उपतिष्ठंत इति वर्तते। अग्रवचनमादित्यप्रभृतीन्धिष्ण्यानुपति
ष्ठंत इति वचनात्सकृदुपस्थानमादित्यप्रभृतित्वप्रापितन्निवृत्त्यर्थं। तेन सकृदेवाग्र उपस्थातव्यो न यथा बहुपस्थान
मिति। यूपादित्याहवनीयनिर्मथ्यानग्नयः सगराः सगरा अग्नयः सगरास्थ सगरेण नाम्ना। पातमाग्नयः पिप्

Indira Gandhi National
Centre for the Arts

न माग्नयो नमो वोः अस्तु मा मा हिंसिष्टेति। अत्राप्याद्भिस्त उपस्थेयो रूपादिभिः सहतस्यापि निर्दिशात्। निर्मथ्योना
१५० मयत्राग्निर्मथ्यते स देशः। सव्यावृतः शामित्रो व ध्यगोहनावालोत्कगस्तावानेयये व। शामित्रः पशुश्रपणार्थो
ग्निः। ऊवध्यगोहः आंत्रप्रछादनस्थानं। आस्तावो यत्र बहिष्पवमानं स्तूयते स देशः। एवमेव दक्षिणावृत आ
ग्नीध्रीयमच्छावाकस्य वा दं दक्षिणं मार्जालीयं खरमिति। एवमेवेत्युभयत्रापि संबध्यते। तेनाग्नयः सगरा इ
त्ययमेवोभयत्र भवति। आग्नीध्रीयो ग्निविशेषाय उत्तरतो निहितः। अच्छावाकस्य वादः यस्मिन्देशे भासीनो च्छा
वाकः अच्छावाकवदस्तुत्को वर्तति स देशः। दक्षिणं मार्जालीयमिति मार्जालीय एव उच्यते। तेनोत्तरे ऽपि मार्जा
लीयोस्तीति गम्यते। खरो नाम यस्मिन्देशे ग्रहचमसाः साद्यंते स देशः। विशेषणविशेष्यभावो निवृत्त्यर्थमस
मासकरणं नोपस्थानभेदसिध्यर्थं। तेनैतोश्चतुरः सकृदेवोपतिष्ठेरन्। उत्तरेणाग्नीध्रीयं परिव्रज्य प्राप्य १५०
सदोभिमृशंस्तुर्वंतरिक्षं वीहीति। आग्नीध्रीयमुत्तरेण परिव्रज्य सदसो द्वारदेशं प्राप्य सदोभिमृशंति मंत्रे

पा। प्राप्येति वचनं प्राक्केष्टतानिवृत्त्यर्थं। प्राप्याभिमृशंति। नान्यत्संपादनीयमित्यर्थः। द्वार्ये संमृश्यैवमपरा
नुपतिष्ठंते। द्वार्ये इति पूर्वस्य द्वारः स्थूणे इत्यर्थः। प्राप्य सद इति प्रकृतत्वादाहवनीयप्रदेशादागच्छतां सदः प्रा
प्तिः पूर्वभाग इति गम्यते। तत्र च प्रासनंतरं द्वार्ये भिमर्शनविधानात्प्राप्तिश्च सदसो द्वारप्रदेशस्यैवेति गम्य
ते। अभिमृशंतीति निवर्तमाने संमृश्येति वचनं वैलक्षण्यज्ञापनार्थं। तच्च वैलक्षण्यमसंनिहितेन मंत्रेण दे
वीद्वारावित्यनेनाभिमर्शनं। एवमित्यग्नयः सगरा इत्यनेनेत्यर्थः। अपरानिति सदः पूर्वद्वारप्राप्तानां विधा
नात्सदसोपरोछालामुखीयादीन इत्यर्थः। शालामुखीयादीनि सत्युक्ताः परानिति वचनात्तत्रस्था एवो
पतिष्ठेरन्। उपस्थितांश्चानुपस्थितांश्चाप्यपश्यंतो व्यतीक्षमाणाः। उपतिष्ठंत इति वर्तते। उपस्थिता आ
दिसादयः अनुपस्थिताः सदस्या होत्रीयादयः। चशब्द एवं शब्दानुकर्षणार्थः। अप्यपश्यंत इति वचनात्स
र्वं च शक्तिविषये भिमुख एव कर्माणि कुर्यादित्यवगम्यते। नईक्षमाणाः अनीक्षमाणाः विविधमनीक्षमाणाः

Indira Gandhi National
Centre for the Arts

प्रनीक्षमाणाः नप्रनीक्षमाणाः अप्रनीक्षमाणाः द्विः प्रतिपेधात्प्रकृतस्यार्थं प्राप्तिः विविधमीक्षमाणा इत्य
र्थः एतदुक्तं भवति। उपस्थिताननुपस्थितांश्च सर्वान प्रतीक्षमाणा अग्नयः सगरा इत्यनेन मं
१५२ त्रेणसकृदेव सदसः पूर्वद्वारप्रदेशस्थाएवोपतिष्ठेरन्निति। होतामैत्रावरुणो ब्राह्मणाछंसी पोतानेष्टेतिपूर्वयाद्वा
रा सदः प्रसर्पेयुरुक्तं नो लोकमनुनेष्यिविद्वानितिजपंतः पूर्वद्वारदेशगतत्वानयैव प्रसर्पणसिद्धेर्यत्पूर्वेत्युक्तं
रोति तत्स्थापयति सदः प्रवेशान द्वारनिर्देशमतिपूर्वयैवप्रवेशो भवतीति। उक्तं नो लोक इत्येतान्त्रं सर्वे सह जपं
तः पूर्वया द्वारा प्रसर्पेयुरित्यर्थः। उत्तरेण सर्वान्धिष्ण्यान् संतं संतान परेण यथास्वं धिष्ण्यानां पश्चादुपविश्य
जपंति यो अद्य सौम्यो वध इति। विषूकुहमिव धन्वनाव्यस्याः परिपंथिनं सदस स्यतमेनमदूति। १५२
स्तोत्रक्रमेण होता प्रथमः प्रविश्य ततो नेष्टा पोता ब्राह्मणाछंसिहोता मैत्रावरुण इत्यनेन क्रमेणोत्तरेण
सर्वान्धिष्ण्यान्गत्वा संतं संतान परेण गत्वा यो यो यस्य स्वो धिष्ण्यस्तस्य तस्य पश्चादुपविशेयुः। उपविश्य

योअद्येति जपेयुः नेष्टुः संतानपरेण गमनं नास्ति असंभवात्। एवमपरया द्वारा प्रसृत्य दक्षिणपुरस्तान्मैत्रा
वरुणस्योपविशेत्। एवमिस्तुप्रस्थानादिजपांतमत्रापि दृश्यते। तमन्वंच ऋत्विजः प्रसर्पकाः ऋत्विग्ग्रहणं प्रस
र्पकविशेषणं। ये प्रसर्पका ऋत्विजस्त एव होत्राणां प्रसर्पंतमनुतेनैव द्वारेण प्रसर्पेयुः। येद शेषे ये वक्ष्यंते तत एवे
त्यर्थः। तेनार्थितया दिदृक्षया वा प्रसृतानां तु प्रसंगो नास्तीति। तेषामयं नियमो न भवति। पूर्वेणौदुंबरीमपरेण
धिष्ण्यान्यथांतरमनुप्रविशंति। इदमपि तेषां स्थानविधानं। यथांतरं यथासंनिकृष्टमित्यर्थः। योयस्य चमस
भक्षसंबंधितया संनिकृष्टः स तस्य समीपे उपविशतीत्यर्थः। एतया द्वाराग्नीध्र आग्नीध्रीयमप्याकाशं। आग्नी
ध्रोप्यनेन प्रकारेणोपस्थानादि जपांतं कुर्यात्। आग्नीध्रीयं तु प्रविशेत्। संछादितमसंछादितमपीत्येवमर्थ
मप्याकाशमिति वचनं। दक्षिणाद्यो धिष्ण्या उदक्संस्थाः प्रसर्पिणां। स्वस्य धिष्ण्यस्य पश्चादुपवेशनमु
क्तं तत्र को धिष्ण्यः कस्येत्येतन्निर्णयार्थमिदमुच्यते। प्रसर्पिणो होत्रादयस्तेष्वधिकृतेषु तदधिकारार्थं पुनः

Indira Gandhi National
Centre for the Arts

प्रसर्पिग्रहणं अनधिकृतस्यापि प्रसर्पतो ज्ञापकस्य ग्रहणार्थं। दक्षिणा द्रव्य इत्येतावतैवोदक्संस्थे सिद्धे यत्तदु
१५२ दक्संस्थवचनं तत् ज्ञापयति सर्वं वदक्षिणोत्तररूपेण व्यवस्थिते यदुदक्संस्थे वृक्षि॰ कर्तव्यानान्यथेत्येवमर्थं।
आग्नीध्रस्तु विपरीतो। मैत्रावरुणस्य दक्षिणतस्तस्योत्तरतो होतुरिति। तेषां विसंस्थितसंचरा यथा स्वधिष्ण्यानुत्तरे
णातेषां धिष्ण्यवतां स्वधिष्ण्यस्योत्तरतो यो देशः स विसंस्थितसंचरो वेदितव्यः। विसंस्थिते समाप्ते सवने संच
र्यते ऽनेनेति विसंस्थितसंचरः। दक्षिणमधिष्ण्यानां। अधिष्ण्या नाम त्विजो दक्षिणाधिष्ण्यमुत्तरेण विसंस्थित
संचरो भवतीत्यर्थः॥३॥ अथैंद्रः पुरोळाशैरनुसवनं चरंति। याज्यानुवाक्यालिंगादेव ऐंद्रत्वे सिद्धे सत्यैंद्र इति व
चनं धानादीनां निर्वापकाले यद्देवताः संबध्यंते तासामपनयनार्थं। पुरोळाशैर्नसोमैरित्यर्थः। किंच धानादी
नां पुरोळाशशब्देनैव संव्यवहारार्थं। अनुसवनं सवने सवन इत्यर्थः। पुरोळाशा धुक्तमित्यतिदेशादेवानुस १५२
वनत्वे सिद्धे यदनुसवनवचनं तत् ज्ञापयति अनुसवनं चरंत्येव नान्यदा याहनाद्यपीति। धानावंतं करंभिणमि

ति प्रातःसवने ऽनुवाक्या। प्रातःसवनवचनं मध्याह्नसमये प्रात्यस्मिंत्सवन इयमेवानुवाक्या स्यात् नान्या क
स्त्वित्येवमर्थं॥ माध्यंदिनस्य सवनस्य धाना इति माध्यंदिने। तृतीये धानाः सवने पुरुष्टुतेति तृतीयसवने। होता
यक्षदिंद्रं हरिवां इंद्रो धाना अत्त्विति प्रैषो लिंगैरनुसवनं प्रैष इत्येकवचनं जात्यभिप्रायं। चमाणां पाठसिद्धत्वात्तद
ह्वादेशपदं तेन नेन्या। अत्राप्येकवचनं पूर्ववत्। देवतादेशस्वरूपत्वात् इंद्रमिति शब्द आदेशपदमित्युच्यते। त
द्ध्व सतैरेव प्रैषैर्यष्टव्यमित्यर्थः। होता यक्षदग्नीषोमयोस्तु स्थाने आगर्व ष द्वागे यत्र क्वचित्प्रैषेण यजेत। यत्र
कं चेति वचनात्सार्वत्रिकोयं विधिः। यत्र क्वचित्कर्मणि प्रैषेण यागेकर्तव्ये एतावुद्धृत्यतयोः स्थाने तो कृताय
पृष्ट्व्यमित्यर्थः। अथ स्विष्टकृतो ऽग्नेऽनुपस्त्वनो हविर्माध्यंदिनेसवने जातवेदो ऽग्ने तृतीयसवने इह कानि षड् इत्यनुस
वनमनुवाक्याः। अनुसवनाधिकारे पुनः। अनुसवनवचनं माध्यंदिने सवने पशुपुरोळाशेन सह स्विष्टकृ
ति क्रियमाणे तस्य मुख्यत्वे सत्यपि एता एव याज्यानुवाक्या भवेयुरित्येवमर्थं। होता यक्षदग्निं पुरोळाशाना

Indira Gandhi National
Centre for the Arts

मितिप्रैषो हविरग्ने वीहीति याज्या। एतास्वनुवाक्यासु पुरोडाशशब्दं बहुवदेके। एतास्वनुवाक्यासु
१५३ पुरोडाशशब्दास्तेबहुवचनांताः कर्तव्या इत्येके आचार्या मन्यंत इत्यर्थः। तस्मात्सामानाधिकरण्यादिंद्रवरु
णाभ्यां दृष्टोपीति पुरोडाशशब्दस्यात्र अग्निन्यायेन धानादिलक्षणार्थत्वाच्च बहुत्वसंबंधः विज्ञायते पृथ
तिवाएतदृचो क्षरं यदेन दृष्टितिनस्मादेवं नोहेत। एयतिस्त्रवती सर्वेः स्त्रवर्णतावछंदोरत्तभंगाद्दस्केना
शः तन्नाशेऋचाय दृष्ट्यमितिसाधनत्वनाशः अनहेपुनरनष्टेसाधनत्वेकस्यचित्पदस्यलक्षणया
गौणया वाभिधानं संभवतीति नातीव दोषः। तस्मादिमो विधिप्रतिषेधौ ब्राह्मणसंकीर्तितावपिन्यायमूला
वेवेति मंतव्यौ तेनायमक्षरद्भ्रातेषुषः सार्वत्रिक इति मत्वा सर्वेषु पुरोनुनिगदेष्वितिय जुष्टेवोहमुक्तवान्भ
गवानाश्वलायन आचार्यः॥४॥ द्विदेवत्यैः प्रचरंति। वक्ष्यमाणा ग्रहा द्विदेवत्यसंज्ञा भवंति। तेन चाश्विंद्रवायुदेव १५३
त्योपि द्विदेवत्यसंज्ञो भवति। ते प्रचरंति। तेषां याज्यासु प्रैषानुवाक्यावक्ष्यंत इति संबंधः। वायवइंद्रवायुभ्यां वा

यवा मा हिदर्शतं द्वाय इमे सुता इत्यनुवाक्ये अनवानं पृथक्प्रणवे। एते द्वे ऋचौ द्वे अनुवाक्ये भवतः। ते च समस्तान
यवामा हिदर्शतंद्वाय इमे सुता इत्यनुवाक्ये अनवानं पृथक्प्रणवे। एते द्वे ऋचौ द्वे अनुवाक्ये भवतः। ते च समस्तान
वानं वक्तव्ये पृथक्प्रणवे च। पृथक्प्रणववचनमनुवाक्याद्वित्वादेव प्रणवद्वित्वे सिद्धेपि न्यायमूलत्वेपि अनुवा
क्याद्वित्वाभावात्प्रणवद्वित्वं नास्तीत्येवमर्थम्॥ होता यक्षद्वायुमग्रेगां होता यक्षदिंद्रवायू अर्हंतेति प्रैषावनवानं। अत्रापि
नवानवचनं परस्परसंतानार्थं। अग्रे पिबा मधूनामिति याज्ये अनवानमेकागुरे पृथग्वषट्कारे। अस्मिन्प्रतीके द्वे ऋचौ द्वे
याज्ये भवतः। ते च समस्तानवानं भवतः। तत्र याज्याद्वित्वादागुरोद्वित्वे प्राप्ते एकागुरे एवेति नियम्यते। पृथग्वषट्कारवचनं च
मोस्मिन्याज्यासु ऋग्द्वित्वेपि याज्याद्वित्वाभावात्साधनद्वारेण एकवषट्कारता वक्तुं। यत्र पुनर्द्वाभ्यामृग्भ्यामेकमेव या
ज्याकार्यमनुवाक्याकार्यं च साध्यते तत्र पूर्वस्यामंते प्रणवो न कर्तव्यो वषट्कारश्च। कार्यभेदाभावात्। सामिधेनीष्वपि
प्रसृतं च प्रणवसंबंधः कार्यभेदनिमित्त एवेति मंतव्यः। इदमायुनवानं प्रातःसवन इत्यनुवाक्ये। अयं विधिः प्रातः
सवने प्रयुज्यमानानामपि भवति नोत्तरेषां नानाभवति न याजिनामनुवाक्यास्वनवानं वक्तव्या। प्रैषौ चोत्तरयोरिस्सम्मदिव
सवने प्रयुज्यमानानामपि भवति नोत्तरेषां नानाभवति न याजिनामनुवाक्यास्वनवानं वक्तव्या। प्रैषौ चोत्तरयोरिस्सम्मदिव

Indira Gandhi National
Centre for the Arts

चशब्दादुत्तरयोरपिग्रहयोरनुवाक्ययोरप्यनवानेसिद्ध्यानुवाक्ययोरंतराऽवनास्तीतिकृत्वाप्रयुज्यमानविषय
१५४ त्वमस्यसत्रस्यावगम्यते। प्रैषौचोत्तरयोर्ग्रहयोः। प्रैषौचयाज्यानुवाक्याश्चोत्तरयोर्ग्रहयोरनवानंभवंतीत्य
र्थः। हुत्वेतद्वपात्रमाहरत्यध्वर्युः। एतदिति प्रकृतंवाय्विंद्रवायुसंबंधियत्पात्रंतदित्यर्थः। गृह्यतइतिग्रहः
सोमः तस्यपात्रं। एतदुक्तंभवति। यदेनद्वाय्विंद्रवायुसंबंधिग्रहपात्रंहुत्वातदेवाहरत्यध्वर्युरेवेति। तेनान्यो
प्यत्रग्रहोहूयतेपात्रमप्यन्यदस्तीतिज्ञायते। अध्वर्युराहरतीतिवचनात्प्रतिप्रस्थाताप्यत्रजुहोतीतिगम्यते।ते
नास्मिन्नवस्यमाणेप्रतिप्रस्थातर्युपहवयाचनंकर्तव्यमित्यवगंतव्यं। तद्गृह्णीयादेतुवसुःपुरूवसुरिति। तदिति
वचनमाहृतंगृह्णीयान्नाह्रियमाणमित्येवमर्थं। प्रतिगृह्यदक्षिणमकृमपोह्यतस्मिंत्सादयित्वाकाशवतीभि
रंगुलीभिरपिदध्यात्। प्रतिगृह्येतिवचनंग्रहस्यहस्तांतरसंक्रमणनिवृत्त्यर्थं। दक्षिणवचनमपोह्यादनेसव्यस्य १५४
प्रापणार्थं। आकाशवतीभिरंगुलीभिरित्थंभूतेनपाणिनापिदध्यात्। अंगुलीभिरेवाकाशवतीभिरपिधातुम

शक्यत्वात्। एवमुत्तरे। एवमुत्तरेअपिपात्रेप्रतिगृह्यसादनापिधानेकुर्यादित्यर्थः। सव्येनत्वपिधायतयोः
प्रतिग्रहोभक्षणंच। प्रतिग्रहभक्षणकालेतुसव्येनापिधानंभवतीत्यर्थः। मैत्रावरुणस्यायंवांमित्रावरुणा
होतायक्षन्मित्रावरुणागृणानाजमदग्निनेति। ऐतुवसुर्विदद्वसुरितिप्रतिगृह्यदक्षिणेनद्वावपवंहस्ताभ्या
संसादनं। आश्विनस्यप्रातर्युजाविबोधयहोतायक्षदश्विनानासत्यावाद्यथानाशुभस्पतीइत्यैतुवसुःसंय
द्वसुरितिप्रतिगृह्यैवमेवहस्तोत्तरेणशिरःपरिहृत्याभ्यामंतरंसादनं। एवमेवेति। यथामैत्रावरुणःपूर्वमासा
दितमेंद्रवायवंदक्षिणेनहस्ताभ्यासमासादितः। एवमाश्विनःपूर्वसादितावेंद्रवायवंमैत्रावरुणौदक्षिणेनह
र्तव्यइत्यर्थः। ततस्तमुत्तरेणशिरःपश्चान्नीत्वापुनर्दक्षिणेनशिरःपुरस्तान्नीत्वामैत्रावरुणादप्यभ्यासं
तरंसादयेत्। अनुवचनप्रैषयाज्याकुनिसोध्वर्युतःसंप्रैषः। अनुवचनादिषुध्वर्युसंप्रैषः आकांक्षणी
यः। अध्वर्युग्रहणमध्वर्युपुरुषाणामपिप्रदर्शनार्थं। अतएवाध्वर्युतइत्युक्तवान्नाध्वर्योरिति। निखवच

Indira Gandhi National
Centre for the Arts

नं नित्यएव प्रैषआकांक्षणीयोनानित्य इत्येवमर्थं। तेन पशुसूक्तवाकप्रैषादीननियमेन प्रैष आकांक्षणीयः।
१५५ उन्नीयमानेभ्योन्वाहात्वावहं तसविदेंवमिहोपयातेत्यनुसवनं। उन्नीयमानेभ्य इति वचनं चमसेषून्नीयमा
नेभ्यः सोमेभ्य इत्यर्थः। अनुसवनं सवने सवने एतेषामेकैकं सूक्तमनुब्रूयादित्यर्थः। होतायक्षदिंद्रं माध्यं
दिनस्य सवनस्य होतायक्षदिंद्रं तृतीयस्य सवनस्येति संप्रैषितः प्रेषितो होतानुसवनं प्रस्थितयाज्याभिर्यजति।
एते त्रिभिः प्रैषैर्यथालिंगमेव प्रेषितो होतानुसवनं स्वाभिः प्रस्थितयाज्याभिर्होतैव यजेदित्यर्थः। नामादेश
मितरे। इतरे प्रशास्त्रादयो नामादेशं प्रेषिता यजेयुः न होता। तेन यद्यप्यध्वर्युर्वा होतर्यजेति प्रेष्यति। तथा
पि प्रशास्तैव यजेत्। नामादेशमिति नामादिरूपादिश्येत्यर्थः। इतरेषां क्रमस्वरूपे आह। प्रशास्ता ब्राह्म
णाच्छंसी पोता नेष्टाग्नीध्रः। अच्छावाकश्च। सत्र भेदकरणं तस्यैवोत्तरसूत्रे विशेषविध्यर्थं। उत्तरयोः सव
नयोः पुरोग्नीध्रात्। इदं ते सोम्यं मधुमित्रं वयं हवामहे इंद्रत्वा वृषभं वयं मरुतो यस्य हि क्षये अग्ने पत्नीरिहा १५५

वह होत्रा ग्नाय वशग्ना येति प्रातःसवनिक्यः प्रस्थितयाज्याः। पुनः प्रस्थितयाज्यावचनं प्रशास्त्रादिसंबं
धिनीनामपि तत्संज्ञाप्रापणार्थं। अच्छावाकस्यात्र नोच्यते मात्रपीदभिरागतमितियजतीति स्वावसरे वक्ष्य
ते। पिबा सोममभि यमुग्रतर्द इतिति स्त्रोर्वा उ॰ हि सोमकामं त्वाहुस्तवायं सोमस्त्वमेह्यर्वाङ् इं॰ प्रायसोमः प्रदि
वो विदाना आ पूर्णो अस्य कलशः स्वाहेति माध्यंदिन्यः। इंद्र ऋभुभिर्वाजवद्भिः समुक्षितमिंद्रावरुणा सुत
पाविमं सुतमिंद्रश्च सोमं पिबतं बृहस्पत आ वो वृहंतु सप्तयो रघुष्पदो मे वनः सुरवा अहिंगतनेंद्रा विष्णू पि
बतं मध्वो अस्य मं स्तोममर्हते जातवेदस इति तातीयसवनिक्यः। सोमस्याग्ने वीहीत्यनुवषट्कारः। अयमनु
वषट्कारः कर्तव्यः। अनुवषट्कारस्य प्रवृत्तिविषयमाह। प्रस्थितयाज्यासु प्रशास्त्रयाज्यासु मरुत्वतीयेहारि
योजने महिम्नि। आश्विने चैतेरोऽहन्ये। सत्र भेदग्रहणं वैषम्यख्यापनार्थं। वैषम्यं च शास्त्रोक्तेक्रियमाण
पि शस्त्रयाज्या न भवतीत्येवमर्थं। तेनायाज्यमाध्यंदिनमिसवगतं भवति। तदेषाभियज्ञगाथा गीयते। क्र

तुषाजां हि देवसान्यष्ठपात्नीवतोग्रहः। आदित्यग्रहसावित्रौ तांस्समानुवषट्कृथा इति। एतद्यज्ञगाथा स
१५६ को वेदोपष्टरं नास्ति। गाथाशब्देन ब्राह्मणगता ऋच उच्यंते। यज्ञार्था गाथा यज्ञगाथा सैषा तदनुवषट्कार
विधानं प्रस्तुयत इत्यर्थः। कोऽपि द्वयसंकीर्तनं सानुवषट्कारा अनुवषट्काराश्चैतावंत एवेति ज्ञापनार्थं। प्रति
वषट्कारं भक्षणं। प्रतिवषट्कारं भक्षणोऽप्रयत्नं कुर्यात् अत्र भक्षो विधीयतेऽन्यत्र विहितत्वात्तेन वचनांतरे
णाविहितेभक्षे तस्यानुवृत्तिमात्रमत्र गुणो विधीयते। यत्र हि द्विर्वषट्कारोऽस्ति तत्र भक्षोऽपि द्विरावर्तते। यत्र तु स
कृदेव वषट्करोति तत्र तु सकृदेवेति सिद्धं। तूष्णीमुत्तरं। उत्तरं प्राशनं तूष्णीमेव कर्तव्यं। वषट्कार इत्य प्र
संगादत्रैवेदमुक्तं। एत्यध्वर्युः आहवनीयप्रदेशात्सद आगच्छतीत्यर्थः। अयाळग्नीदिति पृच्छति। आग
छंतमध्वर्युं होता पृच्छतीत्यर्थः। अयाळिति प्रत्याह। प्रत्याहाध्वर्युरित्यर्थः। स भद्रमकर्मा नः सोमस्य १५६
पायपिष्यतीति होता जयति। होतृग्रहणमध्वर्य्वधिकारात्॥५॥ ऐन्द्रवायवमुत्तरे धुरि गृहीत्वाध्वर्युर्वेप्रण

मयेदेष वसुः पुरूवसुरिह वसुः पुरूवसुर्मयि वसुः पुरूवसुर्वाक्पा वाचं मे पाह्युपहूता वा
क्सह प्राणेनोपमां वाक्सह प्राणेन ह्वयतामुपहूता ऋषयो दैव्यासस्तनूपावानस्तन्वस्तपोजा उप मामृषयो दैव्या
सो ह्वयंतां तनूपावानस्तन्वस्तपोजा इति। इत्तरेण चमसेनापिधायैन्द्रवायवं दक्षिणेन हस्तेनोत्तरे भागे गृही
त्वाध्वर्योरपि ग्रहणाय प्रणामयेत्। एष वसुरिति मंत्रेण। अध्वर्यउपह्वयस्वेत्युक्ताव प्राणय नासिकाभ्यां वा
ग्देवी सोमस्य तृप्यत्विति भक्षयेत्सर्वत्र। अत्रोपहवविधानं क्रमार्थं। उत्तरत्र विहितत्वात्। नासिकाभ्यामिति
वचनं नासिकाद्वयेनावघ्राणं नियमेन कर्तव्यं। तेनान्यत्रेन्द्रियकार्यमनियमेन कर्तव्यं। एकेन द्वाभ्यां वेति सि
द्धं। सर्वत्रेति वचनमन्यत्राप्ययमेव सोमभक्षणमंत्रः स्यादित्येवमर्थं। प्रतिभक्षितं होतृचमसे किंचिदवनीया
नाचम्योपह्वानादि पुनः संक्षयित्वा न सोमेनोच्छिष्टा भवंतीत्युदाहरंति शेषं होतृचमस आनीयोत्सृजेत्। हो
तृभक्षितमध्वर्युणा चं प्रतिभक्षितं होतृचमसे किंचिदासिच्यानाचम्यैवोपह्वानादि पुनः सह भक्षयेत्। अपि वा शे

षं होतृचमस आनीयतत्रावसृजेत् न प्रागुत्सृजेदित्यर्थः। पुनर्भक्षे प्रतिप्रस्थातृवदुपहवमाचमनं कर्तव्यं।
१५८ अस्य स्वचमसमध्ये भक्षणनिमित्ताशुचित्वनिर्हरणाय प्रसक्तमाचमनं न कृत्वोपहवादिकर्तव्यमित्युक्तं
अनाचम्योपह्वानादीति। सोयमाचमनप्रतिषेधः सोमभक्षणेन शुचित्वाभावादुक्त इति तदुपपादनार्थं तत्स्व
त्रमध्य एव न सोमेनोच्छिष्टा भवंतीत्युदाहरंतीत्युक्तवानाचार्यः। उदाहरंतीति वचनादिदमपि स्मृतिवचन
मिति दर्शयति। सोमेनेति। सोमभक्षणेनेत्यर्थः। तेनान्यद्रव्यभक्षणेनाशुचित्वमेवेति गम्यते। सोमाधिका
रे पुनः सोमग्रहणं सर्वसोमभक्षणे प्रापणार्थं। एवमुत्तरे। एवमुत्तरे अपिग्रहणात्रभक्षयेत्। तत्र वि
शेषमाह। नत्वेनयोः पुनर्भक्षः। अनयोरपि प्रतिप्रस्थातृवदुपहवमाचमनमस्ति न कंचन द्विदेवत्यानाम १५७
नवनीतमवसृजेत्। द्विदेवत्यानां मध्ये कंचनग्रहं होतृचमसे अनवनीतं नोत्सृजेदित्यर्थः। मैत्रावरुण
मेष वसुर्विदद्वसुरिह वसुर्विदद्वसुर्मयि वसुर्विदद्वसुश्चक्षुष्पाश्चक्षुर्मे पाह्युपहूतं चक्षुः। सह मनसोप मां

चक्षुः सह मनसा ह्वयतामुपहूता ऋषयो दैव्यासस्तनूपावानस्तन्वस्तपोजा उप मामृषयो दैव्यासो ह्वयं
तां तनूपावानस्तन्वस्तपोजा इति। अध्वर्यवे प्रणामयेदिति शेषः। अक्षीभ्यां त्विहावेक्षणं दक्षिणेनाग्रे।
पश्चात्सव्येनेत्यर्थः। सव्येन पाणिना होतृचमसमाददीतेतु वसुन्नो पतिर्विश्वेषां देवानां समिदिति। मैत्रा
वरुणपात्रोत्सर्गांतं कर्म कृत्वा दक्षिणेनाभिनमपिधाय सव्येन पाणिना होतृचमसमाददीत मंत्रेण। पा
णिग्रहणमपिधानमपि पाणिनैवाकार्यं संगु। — मुक्ते न कुर्यात् नांगुलीभिरेवेत्येवमर्थं। तस्यारत्निना
तस्योरोर्वसनमपोच्छाद्य तस्मिन्सादयित्वा काश्यपनीभिरंगुलीभिरपिदध्यात्। तस्येति सव्यस्येत्यर्थः। ऊ
रोरिति वचनमूरोरेकदेशस्य यावत्पर्याप्त अपोच्छादनं न सर्वस्येत्येवमर्थं। अपिधानमपि सव्येनाधिकृ
तत्वादन्यस्यान्यत्र व्यापृतत्वाच्च। आभिनं यथाहृतं परिहृत्य पुनः सादयित्वाध्वर्यवे प्रणामये देवं वसुः सं
यद्वसुरिह वसुः संयद्वसुर्मयि वसुः संयद्वसुः श्रोत्रपाः श्रोत्रं मे पाह्युपहूतं श्रोत्रं सहात्मनोप मां श्रोत्रं

Indira Gandhi National
Centre for the Arts

सहोन्नताव्हयतामुपहूता ऋषयो दैव्यासस्तनूपावानस्तपोजा उप मामृषयो दैव्यासो ह्वयंतां तनूपावानस्त
१५८ न्वस्तपोजा इति। होतृचमसंसव्येनापि धायततो दक्षिणेनाग्निं नगृहीत्वा स्वशिरसो दक्षिणतः पश्चान्नीत्वा
तस्यैवोत्तरतः पुरस्तादानीय स्वस्थाने ओरोरोसादभिला ततः प्रणामादि कुर्यात्। कर्णाभ्यां विहाये ग्रहेष्ठिष्य
णायाग्रे निधाय होतृचमसंस्पृष्टोदकमिळामुपह्वयते। आग्निनमुत्सृज्य ततो दक्षिणेनैव पाणिना होतृ
चमसं निधाय स्पृष्टोदकमिळामुपह्वमते। उपो यच्छंति चमसान्। इळोपह्वानकाले चमसिनः स्वंस्वं च
मसमिळां समीपे उपयच्छंति चमसाध्वर्यवो वा। अवांतरेळां प्राश्या चम्य होतृचमसं भक्षयेदध्वर्यउपह्
मस्वेत्युक्त्वा। अवांतरेळाप्राशनविधानमत्र क्रमार्थं। आचमनविधानं नियमार्थं। इळोपह्वानानंतर
मवांतरेळाप्राशनमेव कृत्वा चम्य चमसमेव भक्षयेदिति। तेन इदानीमिळाभक्षणं नास्तीति ज्ञायते। १५८
इदमप्यनेन ज्ञायते प्रकृतावांतरेळाप्राशनमिळाप्राशनं च कृत्वा पश्चाच्छौचार्थमाचमनं भवतीनत

सोमं ध्येपीति। अध्वर्य उपह्वयस्वेत्युक्त्वा भक्षयेदित्यनेन वचनेनात्र चत्वारोऽर्थाः सूचिता भगवतासूत्रका
रेण। तत्रायमेकोऽर्थः। नानुपहूतेन सोमः पातव्यः। नं उ सोमपीथेन ह्वार्धुको भवतीति श्रुतिवचनादुपहूतेनै
व सोमो भक्षयितव्य इति। अयमपरोऽर्थः उपह्वयाचनं कर्म येन संबध्यते नोपह्वस्वेत्येव मेतेन वा केनने
ति। अयमप्यपरोऽर्थः। यत्र क्व च सोमे वषट्कारेण वा समाख्यया वा भक्ष्यमाणे होमाभियवनिमित्तेन भक्षणे
नेकस्मिन्पात्रे प्रतिभक्षितया सभंग्रो नास्ति तत्राध्वर्योरेवोपह्वयाचनमिति। अयं चापरो भक्षणमपि क
र्तव्यमिति। एतदुक्तं भवति। अवांतरेळां प्राश्य इळाभक्षणमकृत्वा चम्य होता स्वचमसं भक्षयेदध्वर्यावुपह
वमिष्टा वागेदवील्यनेन मंत्रेणेति। दीक्षितो दीक्षिता उपह्वयध्वं। दीक्षितश्चेद्धोता तदा दीक्षिता उपह्वयध्व
मित्युक्त्वा स्वचमसं भक्षयेत्। यजमाना इति वा। दीक्षित इत्यनुवर्तते। यजमाना उपह्वयध्वमित्युक्त्वा भ
क्षयेत्। मुख्यान्वा पृथग्गोत्रका उपह्वयध्वमितीतरान्। एवं चोपह्वयाचनं दीक्षितस्य मुख्यानध्वर्यादीन्

Indira Gandhi National
Centre for the Arts

ध्वर्यउपहूयस्वब्रह्मन्नुपह्वयस्व[illegible]तरुपह्वयस्वेति प्रत्युक्ता अमुख्यांश्चमसान्सकृदेव होत्रकाउपहूय
१५९ ध्वमित्येवमर्थः। एवमितरे। अदीक्षितो दीक्षितश्च होता यथोक्तमुपहवयाचनं कृत्वा स्वं चमसं भक्षयेदि
त्युक्तं। एवं दीक्षिता अदीक्षिताश्च मैत्रावरुणादयः स्वं स्वं चमसं भक्षयेयुः तेनैवोपहवयाचनप्रकारेण।
दीक्षितानामयमेवोपहवयाचनप्रकारः सर्वत्र। प्रतिभक्षिणि सत्यसति वा। अदीक्षितानां क्वचिद्विशेषो
स्तीत्याह। यथासभक्षं त्वदीक्षिताः। यो यस्य सभक्षः स यथासभक्षः। सभक्षो नाम समानभक्षः। एतदुक्तं भव
ति। एकस्मिन्काले एकस्मिन्पात्रे ययोर्भक्ष उत्सृज्यते तयोरन्यतरोऽन्यतरं प्रति सभक्ष इत्युच्यते। स एव होमा
भिषवकर्ता वषट्कर्ता प्रतिसभक्ष इत्यर्थः। यत्रैवं भवति तत्र तमेवोपहूय भक्षयेन्नाध्वर्युमित्यदीक्षिता
नामेवायमपवादः। दीक्षितानां तु ग्रहेषु चमसेषु च दीक्षिता उपहूयध्वमित्यादयस्त्रय एव प्रकाराः १५९
नान्यः क्वचिदपीति। मुख्यचमसाद्व्चमसाः। होतास्वं चमसं भक्षयेदित्युक्त्वा एवमितर इत्युक्तं। तेन हो

तुरन्येषां सर्वेषां भक्षणं विहितमिति मन्यमाना अश्चमसिनश्चमसेभ्यो भक्षयेति। अचमसाः पुनः प्रस्ता
सत्यास्त्ववर्ग्यस्य मुख्यस्य द्वितीयस्य तृतीयस्य वाऽन्तरतमस्य चमसवतश्चमसान्भक्षयेयुः। यस्य
पुनर्होमाभिषवनिमित्तं भक्षणमस्ति तस्य तदेव भवति। इतरेषां मुख्यस्य चमसादिति येन्यमं। तितेषां त्रो
तिमपनुनुत्सुरपि पूर्वपक्षेऽनुष्ठाननिर्वाहं कुर्णितवानाचार्यः। एवंप्रकारेष्वेवं न्यायोऽनुसर्तव्य इति प्रदर्शयि
तुं। मुख्यशब्दोऽत्रापेक्षिको गृह्यते। प्रस्तासत्यानुगुण्यादेनं पक्षं दूषयति। द्रोणकलशाद्वा। वाशब्दः पक्षं व्या
वर्तयति। नाप्यचमसानां सोमभक्षणमस्ति विधानाभावात्। सोमभक्षस्य हि निमित्तं वषट्कारो होमाभिष
वो चमसित्वं च। अचमसानां तु तेषां निमित्तानामन्यतमदपि नास्ति। अतस्तेषामत्र भक्षो नास्तीति सिद्धं।
द्रोणकलशात्तु भक्षणमस्ति वचनात्। यथा चमसमन्योऽश्चमसोश्चमसिनो भक्षयंति अथैतस्य हारियो
जनस्य सर्व एव लिप्संत इति श्रुतिवचनं तेन द्रोणकलशे हारियोजनशेषस्य चमसिभिरचमसैश्च भक्ष

Indira Gandhi National
Centre for the Arts

णं विहितं। तदनेन प्राप्तंभक्षणमसंस्त्रकारेण प्राणस्य रूपेण विधास्यति। तदेवं रूपमेवानेनोच्यते न भ
१६० क्षान्तरमित्यवगंतव्यं। उक्तः सोमभक्षजपः सर्वत्र। यउक्तः सोमभक्षणमंत्रो वाग्देवीति सर्वत्र सोमभक्षे भव
ति न द्रव्यांतरभक्षे। एवं सर्वत्रग्रहणं द्विदेव सेष्वेव चरितार्थमिति पुनस्तद्विधीयते। चमसानां भक्षणमुक्त्वा
तत्प्रसंगेन सर्वत्र सोमभक्षस्य निमित्तमुक्त्वा त्रादिचमसभक्षविच्छिन्नविचारस्याजेन दर्शयितुमाचार्यांतरम
तमनुपन्यस्यतिस्म। होतुर्वषट्कारेच मसा हूयंत उक्तं तु ब्रह्मण्यो यजमानस्य तेषां होताग्रेभक्षयेदिति गोतमो
भक्षस्य वषट्कारान्वयत्वात्। सोमभक्षणे त्रीणि निमित्तानि श्रुतानि। निर्द्दिष्टमिवा वषट्कर्तुः प्रथमभक्ष इति प्राथ
म्याने। शेषं भक्षणं वषट्कारनिमित्तं विदधाति। अभिषुस्त हुत्वा भक्षयतीति होमाभिषवनिमित्तं विदधाति। होत्रच १६०
मसतृप्त्यादिसमाख्यावत्त्वात्स पिसमाख्या भक्षणे निमित्तमिति गम्यते। तत्र होमाभिषवावस्मदीयेणानुक्ताविति
तेन निमित्तस्य भक्षस्यात्र विचारो न कृतः। तत्र वषट्कारनिमित्तं समाख्यानिमित्तं च भक्षणं विहितमेवास्तीतिम

न्यमानो गोतमस्तेषां होताग्रे भक्षयेदित्युक्तवान्। अग्रवचनसामर्थ्याद्युक्तावाद सोपि पश्चाद्भक्षयेयुरिति अ
स्याभिप्रायो गम्यत एव। होतृग्रहणं शस्त्रिणां चतुर्णामपि प्रदर्शनार्थं। उक्तात्र्यादिचमसग्रहणं च सर्वचमसानां
प्रदर्शनार्थं। तथा हि सर्वे चमसाः शस्त्रिणां वषट्कारेषु हूयमाना दृश्यंते किंत्वेषां त्र्याणां विशेषोस्ति सर्वदा
परवषट्कारेषु हूयंत इति। भक्षस्य वषट्कारान्वयत्वादिति वषट्कारनिमित्तत्वादित्यर्थः। एवं गोतमेनोक्ते समाख्य
या भक्षो न विधातुं शक्यत इति मन्यमानस्तौल्वलिराह। अनक्षणमितरेषामिति तौल्वलिः कृतार्थत्वात्। एवष
ट्कृतं भक्षणेनैव शेषस्य प्रतिपत्तेन तान्वेषणेनेरपेक्ष्यं भवतीति कृतार्थत्वादित्युक्तं। यद्यपि परं समाख्यापि भक्षस्य वि
धायिका स्यात्तदा तस्मिन्कृतेप्यकृतार्थमेवावतिष्ठते सा च न विधायिका नामधेयत्वमापि तादृशानामेव पदानां
समन्वयदर्शनादिति। एवमुक्ते गाणगारिर्गोतमपक्षमेव समर्थयितुमाह। भक्षयेयुरिति गाणगारिरतः संस्का
रत्वात्काचतच्चमसतास्यान्नचान्यः संबंधः। उक्तावाद सोपि भक्षयेयुः वषट्कारनिमित्तभक्षणेन संस्कृतानामपि

Indira Gandhi National
Centre for the Arts

शेषाणामस्मात्समाख्याभक्षणादपिसंस्कारत्वात्। वचनेसतिसंस्कृतानामपिसंस्कारस्यसंभवोस्तीत्यर्थः।
१६१ ये नसंस्कारत्वादितिवदंति। तयामयमर्थः। योयंसमाख्याभक्षःसंस्कारःसवषट्कारभक्षसंस्कारोनभवति
ततोन्यत्वादित्यर्थः। अन्यत्वेचाविरोधाञ्चसमुच्चयएवशेषाधिकारनियोगः सर्वकरणाधीतमकलपदोद्बो
धितपदार्थावच्छिन्नः प्रतीयमानःकार्यात्मकत्वादात्मनःस्वावच्छेदकमन्तानपिकार्यतयावगमयन्होत्र
चमसपदाद्यभिहितांस्तंबंधविशेषान्कार्यतयावगमयतीत्येवं। सचसंबंधविशेषोहोतास्मिंश्चमसतीति
होतृचमसइति। एतंमुख्यान्यःस्वसाम्यादिलक्षणोत्रनसंभवति। एवमप्यर्थंसूत्रकारःसूचितवान्। का
चतञ्चमसतास्यान्नचान्यःसंबंधइतिवदन्। यदाचमसिनोचमसेषुवषट्कारनिमित्तंसमाख्यानिमित्तंचभक्ष
१६२ हयमागच्छतितदैववषट्कारंकृत्वा होमाभिषवभक्षणंचकृतेततःसमाख्यातोभक्षयेत्। यत्रपुनः प्रति
भाविताभिततञ्चोभोमक्षोतंत्रेणासिध्यतः। वषट्कारनिमित्तभक्षेणानुवषट्कारेषुसर्वत्रचहितावनिरस्तेव। भक्ष

यित्वापामसोमममत्वाभभूमत्रसोभवहृदआपीत इंदविति मुखहृदयेअभिमशेरन्। भक्षणानंतरमे
ताभ्यामाभ्यांमुखहृदयेअभिमृशेरन्अद्भिर्यथासंख्येन। अनयोराप्यायनत्वंदर्शयिष्यति। प्रतिप्रस्थाप्रोण
कलशमात्मानमाप्याय्येति। आप्यायनत्वंचाद्भिःसंस्पर्शोनेभवसेवेति। आप्यायस्वसमेतुतेसंतेपयांसि
समुपंतुवाजाइतिचमसानाद्योराद्यान्सर्वयोःसवनयोः। स्वंस्वंचमसंद्वाभ्यामभ्यामद्भिरभिमृशेरन्पूर्वयोः
सवनयोभाद्योर्द्वितीयांश्चचमसान्। आद्यांस्तृतीयसवने। तृतीयसवनेआद्यानेवचमसानभिमृशेरन्। ए
तदाप्यायनं। चमसमाप्यायय्यभिरूपाभ्यामितिफलंचमसेश्रुतोदर्शनात्। सर्वत्रात्मानमन्यत्रैकपात्रेभ्यः।
एकपात्राण्यूर्ध्वपात्राणितानिवर्जयित्वासर्वत्रात्मानमाप्याययेयुः। आत्मत्वादेवात्रमुखहृदयेउच्येते। आप्या
यितोभ्र्मसांसोदयंति। तेनाराशंसाभवंति। नाराशंससंज्ञाभवंतीत्यर्थः। अन्वर्थसंज्ञेयं। नराशंसानाञ्चयः
पितृगणाः ऊमा और्वाः काव्याश्चेति। तेचानुसवनंयथासंख्येनाप्यायितानांचमसानांदेवताभवंतिइतिनारा

Indira Gandhi National
Centre for the Arts

शंसाश्च मसानवेतीति॥ ध॥ एतस्मिन्काले प्रपद्याच्छावाक उत्तरेणाग्नीध्रीयं परिव्रज्य पूर्वेण सद आत्मनो धिष्ण्य
१६२ देशे उपविशेत्। अच्छावाकस्य कर्मकालत्वादेतस्मिन्कर्मकाले प्रपदने सिद्धे काले। प्रदेशोऽच्छावाकः कर्मकाल
एव प्रपद्येत स एव समर्थः। तेनान्यकर्मकाला आग्नेय प्रातः सवैककाले प्रपद्येरंनिति सिद्धं भवति। प्रपद्येति वचनं
यजमानत्वेनान्यथा वा प्रपन्नो यद्यच्छावाकीयत्वात्तस्मिन्काले नियमेन प्रपद्येत स एव समर्थः। स स्वधिष्ण्यस्य पुर
स्तादद्दूरे सदसो बहिरुपविशेत्। पुरोडाशशकलं प्रत्तमिळामिवोद्यम्याच्छावाकवदस्वस्तु लोऽच्छावा अग्निमय स
इति तत्र मन्त्राः। इत्थंकरं शकलमिसर्थः। प्रत्तमध्वर्युणा इळामिवोद्यम्यास्य संमितं प्राणसंमितं वेसर्थः। संप्रैष
पाठः स्वशास्त्र चोदनया संप्रैषस्य संवादे समस्यानुवचनसिध्यर्थं। अंत्येन प्रणवेनोपसंतनुयाद्यजमानहोतरध्व
र्योऽग्नीदुल्लन्योतर्नेष्टरुतोपवक्तरिषेषयध्वमूर्जोऽर्जयध्वं निवो जामयोजिहतान्य जामयो निः सपत्ना यामनि वाधि १६२
तासो जम्मता भीत्वरीज पताभीत्वर्यः श्च वद्ध इंद्रः श्रलवद्वो अग्निः प्रस्थायेंद्राग्निभ्यां सोमं वोचतो पो अस्मान्त्रा ह्म

णान्ब्राह्मणाह्वयध्वमिति। अंत्येन प्रणवेनेति एतावतैव प्रणवेन निगदस्य संताने सिद्धे उपसंतनुयादिति वचनं रू त्मे
ण्यास्य निगदस्यानवानत्वसिध्यर्थं। समाप्तेऽस्मिंनिगदेऽध्वर्युर्हर्तर्युपहवं काङ्क्षते। एतदध्वर्योरुपहवयाचनमच्छाया
कार्थं। समाप्त इति वचनमुपहवयाचनकालविधानार्थं। अस्मिन्निति वचनमुत्तरोऽपि निगद एव न कृत्स्न उपहवमं
त्र इत्येतद्दर्शयितुं। तेन प्रत्येतेस्यादि उपहूता इत्यंतो निगद एव उपहत इत्येतावानेवोपहवमंत्र इति वेदितव्यः। प्रत्ये
तामुन्व न्यजमानः सक्नावामाग्रभीत्। उत प्रतिष्ठातोपवक्त रुतनो गाव उपहूता उपहत इत्युपह्वयते। उपहूता इत्यु
क्ता उपहत इत्युपह्वयते इति मध्ये ध्याहारः कर्तव्यः। उपहत इत्येष प्रत्युपहवमंत्रः। सर्वत्र चायमेव प्रत्युपहवमं
त्रः। अपेक्षितत्वादन्यस्य चानाम्नानात्। उपहूतः प्रसस्मा इत्युन्नीयमानायानस्य प्रातर्यावभिरागतमिति यजति।
उपहूत इति वचनमच्छावाकस्य ग्रहणार्थं। तेनोन्नीयमानाय चमसाय प्रसस्मा इत्येतस्य क्रमोऽच्छावाक एवानुब्रू
यात्। ततः प्रातर्यावभिरित्यनया यजति एषा स्य प्रास्थितयाज्या। निधाय पुरोडाशशकलं सहोदकं चमसं भक्षयेत्।

Indira Gandhi National
Centre for the Arts

निधायेतिवचनादेतावंतं कालं दृगकमुपयम्येवासीत। नास्पृष्टोदकः सोमेनेतराणि हवींष्यालभेरन्। सोमेनेति
१६३ सोमेन संस्पृष्टा इत्यर्थः। तेन सोमं स्पृष्टवंतः उदकोपस्पर्शनमकृत्वैवेतराणि पुरोडाशादीनि हवींषि नालभेरन्।
नैनं पुमेध्यान्नां स्पृष्टवंतः सोमस्पर्शने॥ उदकोपस्पर्शनं विधाय तदुपपादनाय वक्तव्ये सति विपरीतमुक्तं। त
स्यायमभिप्रायः। यथा स्पृष्टसोमस्य हविरंतरालंभने उदकोपस्पर्शनं तथा स्पृष्टपुरोडाशादिकस्य च सोमस्पर्शने
द्रष्टुमयथापि भवतीति। न केवलमिदं तत्स्पर्शन एव तन्द्रत्वा चस्पर्शनेपि भवति। निधाय होतृचमसं स्पृष्टोदक
मिति चमसस्पर्शनेपि विधानात्। आदायैनदादित्यप्रभृतीधिष्ण्यानुपस्थायापरया द्वारा सदः प्रसृप्य पश्चात्स्व
स्यधिष्ण्यस्योपविश्य प्राश्नीयात्। एतद्दृगकमादायनद्दुत एव धिष्ण्योपस्थानादियोज्येषेव मंत्रं कृत्वा तत्र स्थ एव
वतस्प्राश्नीयात्। उपविश्य प्राश्नीयादिति उपविश्य जपित्वा प्राश्नीयादित्यर्थः। अपरया द्वारा प्रसर्पणविधाना १६३
त् द्वार्येभिमर्शनं वतस्यामेव। सदः प्रसर्पणे कृते स्वस्येव धिष्ण्यस्य पश्चादुपवेशने सिद्धे यत्पश्चात्स्वस्यधिष्ण्यस्यो

पवेशनं विदधाति तत्तत्रैव दृगकप्राशनार्थं। तत्रैवोपविश्य दृगकं प्राश्नीयात् न बहिर्निष्क्रम्येति। इममेवार्थं प्रा
रब्धांतरे वाघोतरभंग्या श्रुतिरेनमाधयति। न दाहुर्यदन्य ऋत्विजोंतः सदसि सोमं प्राश्नंति। अथ कस्मादच्छावाको
बहिः सदसि प्राश्नातीति। यदेवैतदंतः सदसि पुरोडाशदृगकं प्राश्नाति तेनास्यांतः सदसि सोमः प्राशितो भवतीति
।उपविश्यैवास्याग्नीध्रीयं प्राप्य हविरुच्छिष्टं सर्वे प्राश्नीयुः प्रागेवेतरे गता भवंति। यदाच्छावाक उपविष्टस्तदान्ये स्या
तीर्थेन निष्क्रम्य बहिर्वेद्याग्नीध्रीयं प्राप्नोति। अच्छावाकश्च दृगकं प्राश्य तीर्थेन निष्क्रम्याचम्य तं देशं प्राप्नुयात्।
इतरे होत्रादयोप्यनुपविष्ट एवाच्छावाके तं देशं प्राप्ता भवेयुः। एते सर्वे संहतास्तस्मिन्देशे हविःशेषं प्राश्नीयुः। सर्वत्र
दर्शपौर्णमासिककर्तृनिवृत्त्यर्थं। आग्नीध्रीयं प्राप्येति वचनं प्राशनस्य बहिर्वेदिदेशत्वे सिद्धेप्याग्नीध्रीयमंडप
बहिर्वेदिदेशप्रापणार्थं। तच्चार्धमंतर्वेद्यर्धं बहिर्वेदि भवति। हविरुच्छिष्टशब्देन चात्र धानादीनां शेषमिश्रा
पात्रस्थमन्यदप्युच्यते। प्राश्य प्रतिप्रस्थाय॥७॥ ऋतुयाजैश्चरंति। प्राशने प्रकृते प्राश्यवचनमन्यदप्यस्मिन्ने

Indira Gandhi National
Centre for the Arts

१६४ त्रकालेऽस्मिन्निरस्यर्थं भोजनादि कुर्यात न प्रागित्येवमर्थः। प्रतिप्रस्थानवचनं सर्वेषु प्रतिप्रस्थेषु ऋतुयाजचरणा
र्थं। तेषां प्रैषाः। तेषामृतुयाजसंज्ञानां याज्यानां प्रैषा अपि भवति। पंचमे प्रैषसूक्तं॥ प्रैषसमाम्नाये यस्य चमे प्रैषसू
क्ते तदेषां प्रैषा भवंति। तेन तेनैव प्रेषितः प्रेषितः सस यथा प्रैषं यजति। प्रैषास्ताव त्सर्वे मैत्रावरुणेन वक्तव्याः। अ
स्मिं स्तु चे ऋतुयाजानां याज्यायामध्यारम्भ विधीयेते। येन येन प्रैषेण यथा प्रैषं यः प्रेषितस्तेन तेनैव प्रैषेण स स एव य
जति नान्यः। तेनैतत्साधितं भवति मैत्रावरुणास्य यष्टृत्वमपीति। होताध्वर्युगृहपतिभ्यां होतरेतद्यजेत्युक्तः। यजेदि
ति शेषः। होतरेतद्यजे त्येताभ्यामुक्तो होता यजेत। स्वयं प्रैषछेदछ्या इति। पार्ष्णिकेषछे इति स्वयमेवाध्वर्युगृहपतीय
जतः। पश्चादुत्तरवेदेरुपविश्याध्वर्युः पश्चाद्गार्हपत्यस्य गृहपतिश्च। अध्वर्युर्यजमानश्च निरसनं कृत्वा मंत्रवदेत
योः पश्चादुपविश्य यजतः। पश्चादिति प्रकृतेपुनः पश्चादिति वचनमन्येषामुपवेशनकालात्पश्चाद्यागकाल एव
उपवेशनं गृहपतेरित्येवमर्थं। अध्वर्यस्यजनमिति द्वित्वयुक्तेपि संप्रैषे मुख्य एवाध्वर्युर्यजति नान्यः। अथैतदृतु १६४

पात्रमानं तर्येण वषट्कर्तारो भक्षयंति। अथेति सर्वेष्वेवेष्टेष्वनंतरमित्यर्थः। अत्र होता चतुर्वषट्कारः। पोतनेष्टारौ द्वि
वषट्कारौ। एकवषट्कारा अन्ये। तत्र सर्वेष्वेषु भक्ष्यमाणे अनेकवषट्काराणामपि शेषाविभागात्कर्तृकाले क्वा च
वषट्कारो। एकवषट्कारा अन्ये। तत्र सर्वेष्वेषु भक्ष्यमाणे अनेकवषट्काराणामविशेषाविभागात्कर्तृकालेक्वा च
स कृत्स्नभक्षण प्राप्नोतीति तन्निवृत्त्यर्थमानंतर्येणेत्युक्तं। पृथगध्वर्युः प्रतिभक्षयेत। अध्वर्युग्रहणं प्रतिप्रस्था
तुरपि प्रदर्शनार्थं। अत्रापि तंत्रशंका निवृत्त्यर्थं पृथक्कमेव तत्र विधीयते इतरस्त्वनन्यते। तस्मिंश्चैवोपहवः॥८॥
तस्मिन्नेव प्रतिभक्षयितर्युपहवश्च भवति। अवधारणं दीक्षिता अप्यत्र प्रतिभक्षयितारमेवोपह्वयं मा चेरन्न नदी
क्षितं सर्वानिति। अन्यत्र दीक्षिता दीक्षितं सर्वानेव॥८॥ पराङध्वर्यो वा वृत्ते सुमत्सु द्वे पिता मातरिश्वाच्छिद्रप
दाधादच्छिद्रोक्था कवयः शंसन्। सोमो विश्वविन्नीथानि नेषद्बृहस्पतिरुक्थामदानि शंसिषद्वागायुर्विश्वायुर्विश्व
मायुः क इदं शंसिष्यति स इदं शंसिष्यतीति जपित्वानभिहिंकृत्य शोंसावो मित्युच्चैरा हूय तत्सीशं संशंसेदुपांशु
सप्रणवमसंतत्वन्। पराङिति सप्तम्यर्थे प्रथमा ऋक्युक्ता छंदोवत्सूत्राणि भवंति। ऋतुपात्रभक्षणानंतरमध्वर्यु

Indira Gandhi National
Centre for the Arts

होतुर्मुखत आसीनः पराङावर्तते पृष्ठतः करोतीत्यर्थः। तस्मिन्पराङ्व्यावृत्ते होता शुसदित्यादि जपित्वाभिहिंकारम
१६५ कृत्वा शोंसावोमित्युच्चैराह्वयत तस्मी शंसंशंसेदुग्रं शुसप्रलवमसंतन्वन्नध्वर्युमावार्न इति शस्त्रकालोपदेशार्थं।
शस्त्रांगमयं जपः। जपित्वेति शस्त्रेण संबंधदर्शनात्। अनभिहिंकृत्येति प्राप्तो निषिध्यते। शोंसावेति शंसावे
त्यर्थः। स एव प्रणवांतः शोंसावोमिति प्ल— ते। तेन शब्देनाध्वर्युमाहूय अभिमुखी कृत्वेत्यर्थः। अनेनाहूये
तिवचनादस्य शब्दस्याहाव इति संज्ञा भवति। उच्चैर्वचनं मंद्रस्वरप्राप्त्यर्थं। शस्त्रांगत्वादाहावस्य शस्त्रस्य च मंद्र
स्वरत्वात् आहावानंतरवर्तिनः शस्त्रैकदेशस्योपांशुत्वात् मुख्यानुग्रहन्यायेनोपांशुत्वाशंकायां भूयसामनुग्र
ह एवाश्रयितुमुक्त इति मंद्रस्वरसिध्यर्थमुच्चैरित्युक्तवानाचार्यः। यः पुनराहावः शस्त्रावयवभूतस्य स्तोत्रि १६५
यादेर्वा गं सतस्वेनस्वरं भजते तेननिष्केवल्येनुज्ञालक्षणस्वरपक्षे आहावस्यापि स्वरविशेषः सिद्धो भवति। तस्मी शं
स इते नामधेयं। स प्रणवं समानप्रणवं तस्मी शंसे ये प्रणवास्ते पठिता अपि संवानार्थिके लीक्षणि केः समानास्ति

मात्राद्यत्यर्थः। असंतन्वन्निति सर्वमप्राप्तप्रतिषेधः अनंतरंतत्वात्सरस्य चान्तस्थानेन ज्ञायते पठितोपि प्रणवः संत
नार्थीय इति। तेन शस्त्रादिना आहावेनोत्तरः संततो वक्तव्यः। अत्र तस्मी शंसस्याहावस्य च स्वरस्थानभेदात्स्वर
संततं भवति। एष आहावः प्रातःसवने शस्त्रादिषु पर्यायप्रभृतीनां च। सर्वत्र चांतःशस्त्रं। एषु स्थानेषु वचनां
तरेणाक्रांते विहिते शोंसावोमित्यनेनैव शब्देनाक्रान्तं कुर्वीत। नान्येनेति नियम्यते स्तत्रैयेण शस्त्रादिषु प्राप्ति
रेवमाहूयेति वचनात्पुरोरुक्ता। स्तोत्रियस्ता। प्रतिपत्तः दाक्षिणे अंतः शस्त्रेपि स्तोत्रियानुरूपानुचरः प्रगाथ। धा
प्यात दनंतरवर्ति। परिधानीयस्ता। दृचनाद्येति। माध्यंदिने तृतीयसवने च पर्यायेभ्यः प्राक शस्त्रादिषु वचनादध्व
र्योदिश इत्यो विधीयते तेषु शस्त्रादिषु तयोर्विहितत्वात्तदादिभूतानां प्रतिपदादीनां तावेव भवत इति नाक्रान्तं क
ल्प्यते। तेन चोपसंतानः। तेनाक्रान्तेनोत्तरस्योपसंतानः कर्तव्यः। चशब्दात्तस्य च पर्वे लोतिगम्यते। इदमंतः शस्त्रे
विधानं। मसंतन्वन्निति प्राप्ते संताने प्राप्तवत्प्रतिषेधात् शस्त्रादिभूतेनाक्रान्तेनोत्तरस्य संतान उक्तः। शस्त्रस्वरः

Indira Gandhi National Centre for the Arts

प्रतिगर ओ थामो दैवेति। शस्त्रस्वरइव स्वरो यस्य स शस्त्रस्वरः। उत्तरपदलोपोऽत्र द्रष्टव्यः। शस्त्रस्वरस्वर इत्यर्थः।
१६६ सवचनस्वरस्याविधेयत्वात् न्योपि यो विशिष्टस्वरो विहितः शस्त्रस्य तस्य प्रापणार्थं वचनं। ओथामोदैवेत्ययं प्रति
गरसंज्ञो भवति। शस्त्रस्वरश्च भवति। प्रतिगीर्यते प्रत्युच्चार्यते इति प्रतिगरः। वक्ष्यमाणविशेषविशिष्टतया
सकृद्वयविधातुं शक्येपि सामान्यस्य पृथग्विधानं प्रतिगरशब्दव्यवहारे विसामान्येनास्य ग्रहणार्थं। शोंसा
मोदैवेत्याहावे। प्रतिगरो भवतीति शेषः। यः पुनरयं प्रतिगरांतरविधिमध्ये विधीयते तत् ज्ञापयति प्रतिगरांत
रमध्यवर्तिन्याहावेयं नियम्यते। तेन शस्त्रमध्ये समेवस्यात्। शस्त्रादावयं ब्राह्मणोक्तः शंसामोदैवोमितिवा।
प्लुतादिः प्रणवे प्लुतादिरवसाने। व्यवहितस्यैमो विशेषविधी। अनंतरस्य प्रणवावसानरूपेण विषयभेदासंभवा
त्। प्रणवे प्रणव आहावोत्तरे। प्लुतादेरयमपवादः। आहावोत्तरे प्रणवे प्रणव एव प्रतिगरो भवति। अवसाने च। प्र १६६
णवः प्रतिगरो भवतीति शेषः। शस्त्रांते शस्त्रमध्ये चावसानेष्वयं विधिर्भवति। प्रणवांतो वा। विषयद्वयेयं विक

ल्पः। यत्र यत्र चांतः शस्त्रे प्रणवेनावस्यति प्रणवांत एव तत्र प्रतिगरः। शस्त्रांते तु प्रणवः। पूर्वोक्तस्य प्रतिगरद्वयस्य
विषयव्यवस्थापनमात्रमत्र क्रियते। ननु यद्ययमर्थो विवक्षितः स्यात्तर्हि एवं प्रणेतव्यं स्यात्। अवसाने चेत्यादि सर्व
मकृत्वा शस्त्रांते चांतः शस्त्रे प्रणवांत इति प्रणेतुं युक्तं। सत्यमेव प्रणेतुं युक्तं। तथा च न प्रणीतवानाचार्यः। किं कु
र्मः। एवं सति प्रणीतमनुसरामः। तत्र यदि पूर्वसूत्रे अवसानशब्दं समाप्तिवचनमभ्युपगम्य द्वाभ्यां सूत्राभ्यां शस्त्रां
ते विकल्प उक्तः। उत्तरेणांतः शस्त्रे प्रणवांतविधिरिति कल्प्येत तदा शस्त्रांते तु प्रणव इत्यतिरिच्यते। अथ मतं। यत्रे
त्यादिसूत्रे त्र्यवस्यति शब्दसंबंधात्कर्मचोदनायां होतारमिति होतृविषयमिदं सूत्रं पारिशेष्यात्पूर्वोक्तविकल्पो हो
तृकविषय इति। तदपि नोपपद्यते। अवस्यतीसत्र विधानाभावात्कर्मविधौ सा परिभाषा न कर्मानुवाद इति। अतः
पूर्वोक्त एवार्थः। यत्र यत्रेत्यादि प्रपंचोक्तिश्चैवमेव तिसूचयति। अत्र संक्षेपविस्ताररूपेण प्रपंचोक्तिरेवाश्रिता
सूत्रकारेणेति। प्रतिगरस्य शस्त्रसमकालत्वादाहावस्य चद्विवचनप्रयुक्तत्वात्प्रतिगरशब्दवाच्यत्वाच्च कर्त्रंतरम

Indira Gandhi National
Centre for the Arts

स्यान्वेषणीयं। तत्राध्वर्युरेव भवति। यत्र ऽध्वर्यो विलस्यैवाधिकारः। सर्वत्राध्वर्युरेव भवति। शंसामो दैवो
२६७ मित्यध्वर्युः प्रतिगृणातीति दर्शनात्। शंसावाध्वर्यो प्रति मे गृणीहीति च दर्शनात्। अनंतरं च अध्वर्यो शंसावोमि
त्याहावादि दर्शनात्। अत्राध्वर्युशब्दः प्रतिप्रस्थातुरपि प्रदर्शनार्थः। नन्वीम एतत्। किमित्याध्वर्यवमत्र विधी
यते। शस्त्रांगत्वात् शस्त्रस्य च गृहे विहितत्वात्तस्य याग्वैदिकत्वमेवेति। अध्वर्युकर्तृकत्वं तु वचनात्। न समाख्या
त इति सिद्धं। प्रतिगरस्वरूपमुक्तशस्त्रमेवानुसरति। अग्निर्ज्योतिर्ज्योतिरग्नेः। इंद्रो ज्योतिर्भुवो ज्योतिरिंद्रः। सूर्यो
ज्योतिर्ज्योतिः स्वः सूर्यमिति त्रिपदस्तूष्णींशंसः। यद्यु वै षट्पदः पर्वे ज्योतिः शंसेदेव स्यात्। त्रिपदः षट्पदो वायं शं
स्तव्यः। त्रिपदपक्षे यथापठितमेव। षट्पदपक्षे त्रीणि वाक्यानि द्विधा कृत्वा शंसेत्। द्विधाकरणे अवसानस्थाने प्र
वं ज्योतिः शंसेदेवत्येदिति। उच्चैर्निविदं यथानिशांतमग्निर्देव इद्ध इति। उच्चैर्वचनमुपांश्वधिकारनिवृत्त्यर्थं। निवि २६७
दिति निविदां नामधेयं। यथानिशांतं यथापठितं पदे पदे वसायेत्यर्थः। ऐष्वश्चुत्यं तु शस्त्रत्वादेव प्राप्तं। नास्या आह्वा

नं। आह्वानं च निविदामित्यत्र पदसमाम्नायनिवृत्त्यर्थं निविद्ग्रहणं कृतं। उत्तराधिकारश्च तत्रास्ति तच्च निविद्ग्रहणं
पदसमाम्नायनिवृत्त्यर्थं क्रियमाणमुत्तराधिकारं च निवर्तयितुं शक्नोतीति प्राप्तस्यायमपवादः। न चोपसंतानः। अ
स्या निविदस्तूष्णींशंसेन सहोपसंतानश्च न कर्तव्यः। तेनास्यैतत्त्वं नितिप्रतिषेधस्तूष्णींशंसेषु परस्परमेव पूर्वाप
रयोरिति। अत आह्वावेन तूष्णींशंसस्य संतानः सिद्धो भवति। स तु स्वरविरोधात्प्राण संतान इत्युक्तः। उत्तमेन प
देन प्रवो देवायेत्याज्यमुपसंतनुयात्। निविदुत्तमेन पदेन सूक्तमुपसंतनुयात्। अनुक्तादिदं विधीयते।
आज्यमिति सूक्तस्यैतत्स्यानापं नस्य नाम क्रियते। एतेन निविदुत्तराः। अस्या निविदः शंसनप्रकारो या
विहितस्तेन सर्वा निविदः शंस्तव्या इत्यर्थः। उत्तरवचनं पूर्वा अपि निविदः संतीति ज्ञापनार्थं। तेन देवे द्धमन्वि
द्ध इत्यादीनां चतुर्दशानां पदानां निवित्त्वं सिद्धं भवति। सर्वे च पदसमाम्नायाः। अन्ये चैतत्र प्रलापादयो ये पद
समाम्नातामेत्रास्ते निविद्वदेव शंस्तव्याः। निविदामपि पदशआम्नाने सत्यपि निविदां पृथग्ग्रहणं निवित्सु क

Indira Gandhi National
Centre for the Arts

चित्पदसमासोस्तीतिज्ञापनार्थं। प्रेदंब्रह्म प्रेदंक्षत्रमित्यादौ। उपसंतानस्त्वन्यत्र। अस्या निविदो न्यासु निविस्तु पद
१६८ समाम्नायेषु चपूर्वंणोपसंतानस्तुकर्तव्यः। आह्वानं च निविदां। निविद्ग्रहणं पदसमाम्नायनिवृत्त्यर्थं। आह्वानं
चान्यासु निविस्तु भवति। आज्याद्यास्त्रिः शंसेदर्धर्चशो विग्राहं। इदं त्रिर्वचनं शस्त्रादौ याजसूक्तादौ नियम्यते
आज्यग्रहणं सूक्ताद्यानिवृत्त्यर्थं। तेन यत्र द्वे सूक्ते त्रीणि वा आज्यकार्ये विहितानि तत्राद्यस्यैवाद्यास्त्रिः शंसेन्नो
त्तरस्येत्येवमर्थं। अर्धर्चश इत्यगावानपक्षेप्यर्धर्चसंताननिवृत्त्यर्थं। विग्राहं विगृह्येत्यर्थः। क्व विग्राहः कथं वा
विग्राह इत्येतन्निदर्शनेन दर्शयितुमाह। तन्निदर्शयिष्यामः। प्रवोदेवायाग्नये बर्हिष्ठमर्चास्मै। गमद्देवेभि
रासनोयजिष्ठो बर्हिरासदो३मिति। विग्रहे प्राणसंतानः कार्यः। पूर्वस्मिन्नेवार्धर्चसविग्रहो भवति। ऋगावा
नं चैवमेव। एतेनाद्याः प्रतिपदामन्त्रगावानं। प्रतिपदो या आद्या ऋचस्ता एतेन प्रकारेण शंस्तव्याः। प्रतिपदि १६८
ते प्रतिपदामिति बहुवचनं ज्योतिष्टोमाभ्याससूचनार्थं। तथा प्रथमयज्ञेनैकधर्ममित्यत्र प्रथमशब्दस्तमेवा

र्थं सूचयति। तथा शाखांतरेप्येवं वचनमस्ति। वसंते वसंते ज्योतिष्टोमेन यजेतेति। तत्रवीप्सया भ्यासोवगतः
तदाश्रयोयं बहुवचनप्रयोगः। अन्यत्र ऋगावानवर्जनमिति प्रतिपच्छब्दोयं प्रतिपत्संज्ञितं तृचमेव गच्छतीति न
यौगिकं। तेनाश्विन प्रउगयं धर्मो न भवति। अनुब्राह्मणं वानुपूर्व्यं। ब्राह्मणोक्तस्य क्रमस्य कृतार्थत्वात्समा
म्नायसिद्धस्य क्रत्वर्थत्वात् समाम्नायसिद्धस्य प्रयोगो न प्राप्नोतीति तस्यापि विकल्पेन प्रयोगसिध्यर्थमिदं
सूत्रं। आहूयोत्तमया परिदधाति। उत्तमायाः परिधानीयात्वसिद्धेस्तु उत्तमावचनं याज्यांतानि शस्त्राणीत्यन्या
र्थमप्युच्यमानं याज्याया उत्तमत्वं प्रतीतिं जनयतीति तत्प्रतीतिनिवृत्त्यर्थं। सर्वशस्त्र परिधानीयास्त्वेवं। सर्वासु शा
स्त्र परिधानीयासु आहूय परिदध्यात्। परिधानीयास्विति बहुवचनेनैव सर्वत्वे सिद्धे सर्वग्रहणं होत्रकपरि
हार्थं। उक्थं वाचि घोषाय त्वेति शस्त्वा जपेत्। अग्न इंद्रश्च दाशुषो दुरोण इति याज्या। उक्थपात्रमग्ने भक्षये
त्। उक्थं शस्त्रं शस्त्र संबंधितया कश्चिद्ग्रहो गृह्यते। शस्त्र याज्यायां हूयते च। तच्छेषवद्भक्षार्थं तदुक्थपात्र

Indira Gandhi National
Centre for the Arts

मित्युच्यते। तस्य भक्षणं वषट्कारनिमित्तत्वादविधेयं तदत्र क्रमार्थं विधीयते॥ इति। ततश्चमसांश्चमसिनः सर्वश
१६९ स्त्रयाज्यान्तेषु। ततश्चमसांश्चमसिनो भक्षयेयुः सर्वेषु शस्त्रयाज्यान्तेषु। भक्षणं च क्रमश्चात्र विधीयते भक्षणेन
सकृत्कृते नैव समाख्यायाः प्रवृत्तिनिमित्तसंभवात् पुनरादेतेभ्यासो नास्तीति भक्षविधानं। सर्वशस्त्रयाज्यास्विति
वक्तव्ये सति अंतवचनमाश्विनस्य शस्त्रस्य याज्याभावात् तदंते चमसभक्षणं न प्राप्नोतीति तत्संग्रहार्थं। तेनाय
मर्थः। सर्वशस्त्रयाज्यासु भक्षयेयुः। सर्वशस्त्राणामंते चेति। सर्वेशस्त्राणां याज्यानां चांताः सर्वशस्त्रयाज्यांता इ
ति विग्रहः। नन्वेषोयमाश्विनशस्त्रमंतो न भवति। सत्यं नांतः। तथाप्यतिरात्रस्थिहेत्यतिरात्रातिदेशात्तत्र चम
सभक्षणं भवत्येव। सर्वग्रहणं होत्रकशस्त्रपरिग्रहार्थं। एवं सर्वत्र चमसभक्षणविधानाद्यत्रोक्थपात्रमस्ति तत्र
तद्भक्षयित्वा चमसानां भक्षणं। अन्यत्र चमसानामेवेति गम्यते। वषट्कृतैकपात्राण्यादित्यग्रहसावित्रवर्जं। आदि १६९
त्यग्रहसावित्रग्रहयोर्वषट्कर्तुर्भक्षो नास्ति येनावदत्र विधीयते अन्यदन्यद्युते प्राप्तत्वात्प्रासंगिकं चेदं सूत्रं॥ एतास्तो

त्रमग्रे शस्त्रात्। भवतीति शेषः। शस्त्रकालपरिज्ञानमनेन क्रियते। एषेति प्रोक्त उन्नातुर्हिंकारे प्रातःसवन आह्व
यीरन्। एषेति प्रोक्ते प्रस्तोत्राय उन्नातुर्हिंकारस्तस्मिन्काले च प्रातःसवनग्रहणं प्रातःसवने शस्त्रास्याह्वयीरन्। ए
दुवचनं होत्रकशस्त्रसंग्रहार्थं होत्रकपरिग्रहार्थं। प्रतिहार उत्तरयोः सवनयोः। एषेति प्रोक्ते यः प्रतिहारस्तस्मिन्नु
त्तरयोः सवनयोराह्वयीरन्। वसुरग्नेणायज्ञप्रीरितिसप्तानां पुरोरुचां तस्यास्तस्या उपरिष्टात्तत्त्वं शंसेत्। एताः स
प्तपुरोरुचो नाम चैत्तासामेकैकस्या उपरिष्टादेकैकं तच्चं शंसेत्। सप्तवचनं षष्ठ्याः सप्तपदत्वसिध्यर्थं। वायवायाहि
दिदृक्षीतेति सप्त तृचाः। सप्तवचनं सप्तानां तृचानां ग्रहणार्थं इतरथा पादग्रहणादेकैकवच्चरपथा सप्त तृचाभवे
युस्तथाभ्यसितव्यास्य। तस्मात्सप्तवचनं। द्वितीयं प्रउगेत्रिः। प्रउगमिति अस्य शस्त्रस्य संज्ञा। अस्मिंस्तृचे प्रक
तिप्रामयदाद्यायास्त्रिर्वचनं ततद्वितीयायां नियम्यते न त्रिर्वचनांतरमपूर्वं विधीयते। पुरोरुग्म्य आह्वयीत षष्ठ्यां
त्रिरयस्येदर्धर्चे र्धर्चे। विश्वांदेवानिस्येषा षष्ठी सा सप्तभिः पादैरेकानत्तैः सप्तभिः पादैर्द्वे अनुष्टुप्गायत्र्याविति स

Indira Gandhi National
Centre for the Arts

स्मानां पुरोरुचामित्यत्र सप्तग्रहणेनोक्तं। आतोऽर्धर्चमित्यनेनार्धर्चशंसनमित्युक्तं। अर्धर्चोऽपि द्विप्रकारः। समाम्ना
१७० यसिद्धा लाक्षणिकाश्च। समाम्नायसिद्धः प्रसिद्धः। ऋचोऽर्धमर्धर्चमिति लाक्षणिकाः। तत्र कथमर्धर्चशः शंस
नमिति संशये तं निर्णयार्थं षष्ठ्यां त्रिरवस्येदर्धर्चे धर्चे इत्युक्तं। तेनास्यामव्यवसानत्रयविधानात्समाम्नायसिद्ध
एवार्धर्चाः सूत्रकारेणार्धर्चशंसने परिगृहीता इति ज्ञायते। एतत्सर्वासां विश्रमपदावसानानां प्रदर्शनार्थमुक्तं। उ
त्तमां न द्वांसे छंसत्येके तत्र आह्वानमशंसने। उत्तमायाः पुरोरुच अशंसने उत्तमेत्यत्रे आह्वानं कर्तव्यं। माधुछंद
सं प्रउगमित्येतदाचक्षते। अत्रापि प्रउगशब्दः कृत्स्नवाच्यपि तत्वापेक्षया प्रयुक्तः। एवमन्यत्रापि यत्र यत्र ऋषिछं
दोभ्यां प्रउगं विशेष्यते तत्र तत्र तत्वापेक्षमेव न पुरोरुग्विनृत्त्यर्थमिति द्रष्टव्यं। उक्थं वा त्रिश्लोकायत्वेति शस्त्वा जपे
द्विश्वेभिः सोमं मध्वित्याज्य प्रशास्ता ब्राह्मणाछंस्यच्छावाक इति शस्त्रिणो होत्रकाः। होत्रकाणां मध्ये एते श १७०
स्त्रवंतः। एतेषां शस्त्राणि भवंतीत्यर्थः। एते शस्त्रिण इत्युक्तं कुत एषां शस्त्राणि भवंति किंरूपाणि चैतेषां शस्त्राणि

त्येतदुभयं वक्तुमाह। तेषां चतुराहावानि शस्त्राणि प्रातःसवने तृतीयसवने पर्यायेष्वतिरिक्तेषु च। एषु स्थानेषु
तेषां शस्त्राणि भवंति तानि चतुराहावानीत्येतदुभयं विधीयते। पर्यायातिरिक्तानां तृतीयसवनत्वे सत्यपि पृथ
ग्ग्रहणमुक्थ्यशस्त्रेभ्योऽन्यानि तेषामपि शस्त्राणि भवेयुरित्येवमर्थं। अतिरिक्तेष्विति बहुवचननिर्देशादप्तोर्यामा
तिरिक्तेष्वेव भवंति। न वाजपेयातिरिक्ते। तत्रैकत्वादतिरिक्तस्येति। पंचाहावानि माध्यंदिने। अत्रापि पूर्ववदुभयं
विधीयते। आहावपरिमाणवचनं निमित्ताधिक्येऽपि एतेषामेतावत्त्वसिद्ध्यर्थं। इदानीमाहावस्य निमित्तानि प्रसं
गादुच्यंते। स्तोत्रियानुरूपेभ्यः प्रतिपदनुचरेभ्यः प्रगाथेभ्यो धाय्याभ्य इति पृथमाह्वानं। एतेभ्यः सर्वेभ्य आह
वः कर्तव्यः। एतेषां बहूनां संनिपाते पृथक्पृथक्कर्तव्यः इत्येतदुभयमत्र विधीयते। सर्वत्र यदर्थं तया आह
वो विधीयते तस्मादेव कर्तव्यः। होतुरपि। होत्रकाणामधिकाराद्धोतृग्रहणं। होतुरपि एतेभ्य आहावः कर्तव्यः।
तेभ्यश्चान्यदनंतरं। होतुरपीत्यत्राप्यनुवर्तते। स्तोत्रियादिभ्यो नंतरं यत्सूक्तं विधीयते तत्रापि होतुर्होत्रका

Indira Gandhi National
Centre for the Arts

णां चाहावः कर्तव्यः। आदौ निविद्धानीयानां सूक्तानां। अनेकं चेत्प्रथमे एवाहावः। निविद्धानीयसूक्तस्य चादौ भ
१७१ वति। तस्यानेकत्वे प्रथम एवाहावः। निविद्धानीयकार्यमाहावस्य निमित्तं न सूक्तस्य स्वरूपं। आपो देवतं चतुर्थे। आपो
देवतमन्त्र्यं तमित्यर्थः। स च आग्निमारुत आपो हि ष्ठेति तृच उच्यते। तत्र चाहावः कर्तव्यः। तेषां तृचाः स्तोत्रियानुरू
पाः शस्त्रादिषु सर्वत्र। तेषामधिकारे पुनस्तेषामिति वचनमस्मिं सूत्रे सर्वार्थोऽपि कश्चिद्विधिरस्तीति प्रदर्शनार्थं। तेन
तृचाः स्तोत्रियानुरूपाः सर्वत्रेत्येकोऽर्थः सर्वार्थः। अपरश्च तेषां शस्त्रादिषु ये आदेशास्ते स्तोत्रियानुरूपास्तेष्वाहावः
कर्तव्य इति व्यवहितयोजनया भवत्यर्थः। माध्यंदिने प्रगाथास्तृतीयाः। माध्यंदिने तेषामेव शस्त्रेषु तृतीया आदेशा
स्ते प्रगाथा वेदितव्याः। यथाग्रहणमन्यत्र। अतोऽन्यत्सर्वं यथाग्रहणमेव वेदितव्यं। प्रगाथ इत्युक्ते प्रगाथः। प्रगाथस्तोत्रि
य इत्युक्ते स्तोत्रियो भवति नान्यथेति। याज्यान्तानि शस्त्राणि। यत्र बहूनां शस्त्राणामृच आम्नायन्ते याज्याश्च विधीयन्ते १७२
तत्र कियदेकं शस्त्रमित्येतत्संशयनिरासार्थमेतद्वचनं। अन्यदपि प्रयोजनमस्ति यच्छस्त्रार्थं गायत्रमनं विहितं तद्याज्या

६

पर्यंतमनुवर्तत इति। उक्थ्यं वाचीत्येषां शस्त्राजपः प्रातःसवने। प्रातःसवनवचनं स्पष्टार्थं। ऊर्ध्वं च षोडशिनः सर्वे
षां। षोडशिन ऊर्ध्वानि शस्त्राणि तेषामयमेव शस्त्राजपः सर्वेषां भवति। सर्ववचनं होतुरपि प्रापणार्थं। उक्थं वाचीन्द्रा
येति माध्यंदिन उक्थं वाचीन्द्रायेत्ययमित्युक्थ्येषु सषोडशिकेषु। उक्थ्येषु षोडशिनि चायं भवतीत्यर्थः। उक्थ्यानीति
तृतीयसवने होत्रकशस्त्राण्युच्यंते। अनंतरस्य पूर्वेण। यत्रानेकपदार्थाः क्रमवर्तिनः स्युरेकरूपास्तत्र यदि तेषां कस्यचि
द्धर्मो कोऽप्याम्नातस्तेषामेवानंतरेण पूर्वेण धर्मविधिर्वेदितव्यः। किमुदाहरणं। तृतीयसवने धुरोकारणा घु क्रमित्युक्तं।
तत्र माध्यंदिने न विधिर्भवति। तथा सोमातिरेके शस्त्रे नंतरस्य शस्त्रस्यायः शस्त्राजपः स भवतीत्येवमादि द्रष्टव्यं। स्तो
त्रियेणानुरूपस्य छंदः प्रमाणलिंगदेवतानि। छंदो गायत्र्यादि। प्रमाणमेकस्मिन्नपि छंदस्यूनाधिकाक्षरता। लिंगं आ
वती प्रवतीत्येवमादि। देवतं प्रसिद्धं। स्तोत्रियस्य यान्येतानि तानि अनुरूपस्येत्यर्थः। आर्षं चैके। एक आचार्या आर्षं
च तद्देवत्यं इति। आनो मित्रावरुणा नो गंतं रिशादसा प्र वो मित्राय प्र मित्रयोर्वरुणयोरिति न वा याते मित्रावरुणेति या

Indira Gandhi National
Centre for the Arts

१०१ ज्यायाहि सुषुमा हित इति षट्स्तोत्रियानुरूपावनंतरः सप्तेंद्र त्वा वृषभं सुद्धं हभीतितिस्र इंद्र क्रतुविदं सुतमिति या
ज्यें द्राग्नी आगतं सुतमिंद्राग्नी अपसस्परि तोशा वृत्रहणा हुव इति तिस्र इंद्राग्नी उपेयं वामस्य मन्मन इति नवेंद्राग्नी आ
गतं सुतमिति याज्या। अत्र मध्ये आयाहि सुषुमा हित इति षट्स्तोत्रियानुरूपो इस्त्रत्र षट्त्वहण मासामस्त्वां या सु का सुचि
द्यरिहुंदोगाः स्तुवीरन् तदा तान् निमभिरेव स्तोत्रियैकृत्वा शिल्पाभिरनुरूपः। कर्तव्य इत्येवमर्थः॥ २०॥ संस्थितेषु सवनेषु
षोडशिनि चातिरात्रे प्रशास्तः प्रसुहीत्युक्तः सर्पतेति प्रशास्तातिसृजेद्धोता दक्षिणेनौदुंबरीमंजसेतरेषर याह्वरो त्तरां
वेदिश्रोणीमभिनिःसर्पेति। सवनेषु संस्थितेषु मध्ये चातिरात्रे षोडशिनि समाप्ते। अतिरात्रविशेषणमतिरात्रे यः षो
डशी तस्मिन्नेव समाप्ते न वाजपेयषोडशिनीत्येवमर्थः। एतेषु चतुर्षु कालेषु होता दक्षिणेनौदुंबरीं गत्वा इतरे च स्वस्व
धिष्ण्यस्यां जसा आर्जवेन गत्वा सर्वे उपरस्या ह्वानिष्क्रम्य उत्तरां वेदिश्रोणीमभिनिःसर्पेति। तया श्रोण्या बहिर्वेदि प्रा १०२
प्नुयुरित्यर्थः। यद्यस्मिन्काले ध्वर्युः प्रशास्तः प्रसुहीति ब्रूयात्तदा प्रशास्ता सर्पतेति ब्रूयात्। ततो निःसर्पणं कु

—रेतेष्वेव कालेषु। यद्यन्यस्मिन्काले ब्रूयात्तदा प्रसृतिसर्जनमेव न निःसर्पणमस्मदीयानामिति। यद्यध्व
र्युर्न ब्रूयात् प्रशास्तापि नातिसृजेत् तेष्वपि कालेषु। ततो नातिसृष्टा एव निःसर्पेयुः सर्वथा तावदेतेषु काले
ष्वतिसृष्टा अनतिसृष्टा वा अस्मदीया निःसर्पेयुरेव नान्यस्मिन्काल इति स्थितं। तृतीयसवनसमाप्तिरपि श
स्त्रसमाप्त्यैवास्माकं न हारियोजनं तिपत्नीसंयाजांतं इति स्थितं। पुनः सदसः प्रवेशप्रयोजनाभावात्तत्र
न संस्थासु निःसर्पणस्य सदः प्रवेशपर्यंतत्वादिति। मगतीर्थं निस्येतदा चसते। संव्यवहाराभावेपि संज्ञाया
नित्यत्वात्परिज्ञानार्थमुपदेशः। एते न निष्क्रम्य यथार्थं नत्येवान्यत्र स्मज्ञेभ्यः। अतीर्थेन निष्क्रांतानां बहिःस्था
नामपि प्राक्प्रेष्ठतादयो नियमा यथासंभवमनुवर्तेतइत्युक्तं प्राक् दनेन निष्क्रांतानां नास्तीत्येवमर्थं यथा
र्थवचनं। यथार्थवचनात्तैरेक कर्माण्यपि प्रसज्येरन्निति तन्निवृत्त्यर्थं नत्येवान्यत्र स्मज्ञेभ्य इत्युक्तं तेन पद
वरप कंताव न्मात्रमेव भवति अतो नान्यदिति। आवश्यकमपि यत् शम्या प्रासाद् ध्वं कर्तुं शक्यते तदनेन

Indira Gandhi National
Centre for the Arts

ष्क्रम्यन कर्तव्यं तीर्थेनैवनिष्क्रम्यता दृत्रांकुर्यात्। अनेन निष्क्रम्यश म्याप्रासात्परस्तां नगच्छेयुरितिवच
२७३ नात्। एतेननिष्क्रम्य कृतोदकार्थेवेद्यांसमस्तानुपस्थायापरया द्वारानिलयावृतासदो द्वार्ये चाभिमृश्यत
ल्नींप्रतिप्रसर्पेति। एते इतिनिष्क्रांताः निर्दिश्यंते। एतेनिष्क्रमणानंतरं यत्किंचिदुदककार्यमस्तिचेत्तत्कृ
त्वा नास्ति चेदकृत्वा वेदिं प्रविश्यवेद्यां येधिष्ण्यास्तेषांसमस्तोपस्थानं कृत्वा उपस्थितांश्चानुपस्थितांश्चेसे
तत्कृत्वेत्यर्थः। अपरया द्वारानिलयावृतामंत्रेण सदो द्वार्ये चाभिमृश्यतल्नींप्रतिसर्पेति। कृतोदकार्थामि
त्यत्रनविधीयते यथाप्राप्तमनूद्यते। एषावृत्सर्पतेतिवचने। सर्पतेतिवचन इत्यनेन पूर्वोक्ताश्चत्वारः
कालाउच्यंते तेषु तस्य वचनस्य संभवात्। अतस्तेषु सर्वेषु य एवउक्तः प्रयोगोग्निः सर्पणादिः प्रतिप्रसर्प
णांतः सकर्तव्यः नकेवलंप्रातः सवनांतएवेति। पूर्वयैव गृहपतिः। यजमानस्तु पूर्वयैव द्वारा प्रतिसर्पणं
कुर्यादेकाहाहीनेषु सत्रेषु गृहपतिरेवेति॥ ११॥ एतस्मिन्काले यावत्सुत्यमपद्यते। अस्याप्यस्मिन्नेवका १७३

ले प्रपदनं न प्रातरनुवाककाल इत्यछावाकेन तुल्यं। तस्योक्तमुपस्थानं। अस्यापि पूर्वोक्तमुपस्थानं
प्रसर्पणं च भवति तत्र विशेषमाह। पूर्वया द्वारा हविर्धाने प्रपद्य दक्षिणस्य हविर्धानस्य प्रागुदगुत्तरस्या
क्षस्त्रिरसस्तृणं निरस्य राजानमभिमुखो वतिष्ठते। प्रसर्पणमेवात्र प्रपदनमित्युच्यते। असौ तु हविर्धा
नं पूर्वया द्वारा प्रपद्यते पूर्ववदेव हविर्धाने इति द्विवचनं शालायामेवोपचारात्। शकटद्वय संबंधादुप
चारः। हविर्धानशब्दः शालायामपि मुख्य एव योगस्याविशिष्टत्वादुभयोस्तत्प्रपद्य दक्षिणस्य शकट
स्य यदुत्तरमक्षशिरस्तस्य प्रागुदग्यो देशस्तस्मिन्मंत्रेणानिरसनं कृत्वा तत्र राजानमभिमुखस्तिष्ठेत्। दक्षि
णामुखः प्रसन्दक्षिणामुखो वा। नात्रोपवेशनः। निरसनोपवेशनयोः साहचर्यप्रदर्शनार्थं अप्राप्त ए
वोपवेशनमंत्रः प्रतिषिध्यते। यो अद्य सौम्य इति तु उपविष्टस्य विहितत्वान्निष्ठतोन प्राप्नोतीति विधी
यते। अथास्मा अध्वर्युस्तृणीयं प्रयच्छति। उत्तरीयं शिरसो वेष्टनवासः। तदंजलिना प्रतिगृह्य त्रिः प्रद

Indira Gandhi National
Centre for the Arts

क्षिणं शिरः समुखं वेष्टयित्वा यदा सोमांशून् अभिषवाय अध्वर्योर्हस्तयोर्ग्राव्णोभिषुयात् यदा सोमलता अभि
१७४ षवार्थं अध्वर्योरध्वर्योर्हस्ते विक्षिपति तदा ग्राव्णामभिषवनं कुर्यात् मध्यमस्वरेणेदं सवनं। इदमादौ दं
माध्यंदिनं सवनं मध्यमस्वरेण प्रयोक्तव्यं। इदं ग्रावस्तोत्रमारभ्य माध्यंदिने सवने वर्तते। तत्र स्वरग्रहणं वा
चकवाधनार्थं। बार्हस्पत्ये ष्टोसोमिष्य इति प्रधानो पांशुत्वं प्राप्तं तस्य बाधनार्थो। तेन तत्कामिष्टौ प्रधान
मपि मध्यमस्वरेण भवति। अभि त्वा देव सवितः युंजते मन उत युंजते धिय आ त्वा नं इन्द्र शुमंतं मा चिदन्यद्वि शं
सत प्रेतेवदं त्विस्यर्बुदं। एतत्सूक्तमर्बुदनामधेयं प्रतिमेधा तद्भवति शामुत्तमा या आवर्त्तं जसे प्रयो ग्रावा
ण इति। सूक्ते आवपेतेति शेषः। अर्बुदस्य प्रागुत्तमाया इत्यर्थः। सूक्तयोरंतरोपरिष्टात्सुरस्ताद्वापावमानी
रोप्यय यथार्थमाग्रयहग्रहणाच्छिष्टया परिधाप्य वेधं यजमानस्योष्णीषं। सूक्तयोरुपरिष्टात्सुरस्ताद्धेति संबं १७४
धः। सूक्ते इत्यध्याहृत्य अंतराशब्देन संबंधः। त्र्याणामन्यतमस्मिं स्थाने पावमानीरावपेत यथार्थं यावत्स

योजनमित्यर्थः। यावदभिषवमिति। तदारंभे आरंभविधानात्तत्रैव ग्राव्णां व्यापारसंभवात् अस्य च ग्रावस्तोत्र
त्वादिति। आग्रहग्रहणाद्ग्रावस्तोत्रांतर्भावेपि पावमानीनां पूयमानसोमाभिधानात्सं पूयमानः सोमस्तावंतं का
लमनुवर्तत इति कुलेदमुच्यते। शिष्टयार्बुदस्योत्तमया परिधाय वेधं यजमानस्योष्णीषं यजमानाय दातव्यमि
त्यर्थः। आदाय यथार्थं मंस्येषहःसु यजमानाय दत्तेन तस्यार्थप्राप्तमुच्यते नाप्रातं विधीयते अनेन सूत्रेण दान
मध्यग्रहस्ताद्धस्तांतरसंक्रमणमात्रं यजमानस्यैव तत्स्वमिति। प्रतिप्रयच्छेदितरेषुः अनंस्येषहःसु येनेदं दत्तं
तस्मा एव पुनः प्रयच्छेदिति प्रतिशब्दसंबंधादवगम्यते। अथापरमभिरूपं कुर्यादिति गाणगारिः। अपरमिति
अपरमिदं ग्रावस्तोत्रेन पूर्वमित्यर्थः। प्रकृताविदं न प्रवर्तते इति भिन्नविषयत्वादपरशब्दप्रयोगो युक्तः। कार्य
विशेषेण तल्लिंगस्य विधानादेवाभिरूपत्वे सिद्धे अभिरूपवचनं कार्यमस्यास्तेत्तच्च्यस्यासिध्यर्थं। गाणगारिव
चनं पूजार्थं। आप्यायस्व समेतु त इति तिस्रो मज्जंति त्वा दशाक्षिपणतमुत्संदशक्षिपो मज्यमानः सुहस्त्या दश

Indira Gandhi National
Centre for the Arts

१७५ भिर्विवस्वतो दुहंतिमत्ते कामधुक्षः सिंचंतु दीभिषनाकशेषुधावतिपविन्ने परिषिच्यत इत्येका कलशो धावति
श्येनो वर्म विगाहत इति द्वे। एतासामर्बुदस्य चतुर्थीमुद्धत्य तच्चांते पुनश्चानवद्ध्यात्। एताद्वा दश ऋचो नुक्रां
तास्ताश्चत्वारस्तृचा भवंति। एतासां पावमानीनां तृचांतेषु अर्बुदस्य तृचानवद्ध्यात्। विपरीतं वा। अत्र विशेषो
नत्रास्य तेव कुंदुरवगमत्वात्॥ आप्याय्यमाने प्रथमं। आप्यायनमुदकसेकः। मज्यमाने द्वितीयं। मार्जनं चूर्ण
मादाय हस्ताभ्यां पेषणं। दुह्यमाने तृतीयं। दोहनं प्रसिद्धं। आसिच्यमाने चतुर्थं। आसेचनमभिषवेण द्रवीकृ
तस्याधवनीये संभरणं। तृचं छंदे तृचं छंदे चतुर्थी॥ निमित्तावृत्तावावृत्त्यर्थं वीप्सावचनं। माचिदन्यद्विशंसतेति प
द्विपावाणः संह्लादेरन्। संह्लादनं शब्दनं। अत्रापि निमित्तावृत्तावावृत्तिरस्ति। अस्याश्चो निमित्ताभावेपि प्रयोगः स्व
स्थाने चतुर्थ्यां उद्धरवचनादिदमवगम्यते। समानमन्यत्। अर्बुदपावमानीभ्यो न्यत्सर्वं समानं भवति। सर्थः। १७५
अर्बुदमेवेत्येके। अवधारणादिदमेवसर्वं नान्यत्किंचित्। प्रेतो ग्रावाण इत्येके। अत्राप्यवधारणं द्रष्टव्यं। उक्तं

सर्पणं। प्रसर्पणमत्र कर्तव्यमित्यर्थः। स्तुते माध्यंदिने पवमाने विहृत्याग्न्यगारान्॥१२॥ दधिघर्मेण चरंति प्रवर्ग्य
वांश्चेत्। अंगारविहरणवचनं तत्कालपरिज्ञानेन धिष्ण्यपरिहारेयत्नकरणार्थं। दधिघर्मो नाम कर्मविशेषः।
तेन चरंति प्रवर्ग्यवांश्चेद्यं क्रतुः। न चेन्न कर्तव्यो दधिघर्मस्य विधेः प्रापणमिति। घर्मेणेति वचनमङ्गावाना
द्न्यस्य घर्मेण संबद्धस्यैकस्तुत्यस्यापि प्रापणार्थं। तेनोन्निष्ठतावपश्यतेत्यस्याः शंसत्यादिचोदनाभावेपि ऐकश्रु
त्यं भवति। इज्या अभिक्षिणश्च। इज्या च घर्मेण व्याख्याता भक्षिणश्च घर्मेणैव व्याख्याताः। भक्षिशब्दो न कर्तुपलक्ष
णार्थं प्रयुज्यते कथं तर्हि स्वात्मनोपि विधेयत्वाय। तेन भक्षस्य भक्षकर्तृणां च घर्मवत्ता विधीयते। होतर्वदस्वेत्यु
क्त उन्निष्ठतावपश्यतेत्याह। अस्या लिंगजनितमेव कार्यं। आहेति वचनमस्या अनुवाक्यात्वमाभूदित्येवमर्थं।
तेनोत्तरैवानुवाक्या भवति। अनया ध्वर्युप्रैषरूपमभिधानं क्रियते। श्रातं हविरित्युक्तः श्रातं हविरित्यन्वाह।
इयमनुवाक्या। श्रातमन्य ऊधनि श्रातमग्नाविति यजति। अग्नेर्वीहीत्यनुवषट्करोदधिघर्मस्याग्नेर्वीहीति

Indira Gandhi National
Centre for the Arts

वा। मखिस्यदिद्विषं बृहन्नपि द्युम्नमुत क्रतुः। त्रिष्टुद्धर्मो विभातु म आकूत्या मनसा सह विराजा ज्योतिषा सह तस्य
१७९ दोहमशीय तेन तस्य त इंद्रपीतस्य त्रिष्टुप्छंदस उपहूतस्योपहूतो भक्षयामीति भक्षजपः। ये धिष्ण्यवंतः प्राचमंगारै
रभिविहरेयुः पश्चात्स्वस्य धिष्ण्यस्योपविश्योपहवमिष्ट्वा परिलाग्नेपुरं वयमिति जपेत्। धिष्ण्यवतां मध्ये यं क
श्चिद्धिष्ण्यवंतं धिष्ण्येभ्यः प्राचं संतं यद्यंगारैरभिविहरेयुस्तस्यैनैमित्तिकमिदं। पश्चात्स्वस्य धिष्ण्यस्योपविश्योप
हवं यजमानादिष्ट्वा परिलाग्नेपुरं वयमिति जपेत्। अनिष्टादीक्षितः। दीक्षितस्योपहवयाचनप्रतिषेधाददीक्षित
स्योपहवयाचनं यजमानादिति गम्यते। अस्यैव नैमित्तिकस्य निमित्तापत्तिकालादन्यत्राम्नातत्वात्तृतीयसवनेप्य
स्य नैमित्तिकस्य प्रापणार्थो। सवनीयानां पुरस्तादुपरिष्टाद्वा पशुपुरोडाशेन चरंति। प्रकृतिप्राप्तस्य पशुपुरोडाश
स्य कालविधिरयं। अक्रियामेकेन्यत्र तदर्थवादवदनात्। तस्य पुरोडाशस्याक्रियामेके आचार्या मन्यंते हेतुबलात्सो १७९
ऽयं हेतुः। अन्यत्र तदर्थवादवदनादिति। तत्प्रयोजनो वादस्तदर्थवादः तस्य वदनं तदर्थवादवदनं तत्प्रयोजनवाद

स्यान्यत्र वदनादित्यर्थः। अन्यत्रेति सूक्तवाकप्रैष उच्यते। तत्राग्नीवृधत पुरोडाशैरित्याम्नातं। पुरोडाशैरिति बहुव
चनदर्शनात्सवनीयदेवताऽभिधीयते न पशुपुरोडाशदेवतेति गम्यते। तेनात्र प्रकृतिप्राप्तमभिधानमपश्यंतोऽकरण
निमित्तमेवेदमभिधानमिति मन्यमाना अक्रियामुक्तवंतः। क्रियामाश्मरथ्योऽन्वितप्रतिषेधात्। अतिदेशप्राप्तस्यात्र
निषेधाभावादाश्मरथ्यः पशुपुरोडाशस्य क्रियामेव मन्यते। आश्मरथ्यग्रहणं तस्य पूजनार्थं न विकल्पार्थं। तस्मात्पशु
पुरोडाशः कर्तव्य एव। यत्पुनरिदमन्यत्र तदर्थवादवदनादित्यनभिधानादकरणमुक्तं तदयुक्तं। प्राप्तस्य प्रतिषेधाभावा
त्करणमेवेति। अनभिधाने पुनर्यः सूक्तवाकप्रैष उक्तं तद्धेतुरेव। प्रसक्ष पठिते मंत्रेऽभिधानशक्तिर्नास्ति चेदनभिधा
नमस्तु किंकुर्मः। यथाकथंचिदभिधानं वा कल्पनीयं। पुरोडाशाद्युक्तमानाराशंससादनात्। न त्विह द्विदेवत्याः एत
स्मिन्काले दक्षिणा नीयंते हीनैकाहेषु। अधिकृते काले पुनः कालविधानं यत्रानुसवने दक्षिणानयनं विहितं तत्र वि
घपिलवने पुनर्नाराशंससादनोत्तरकालमेव दक्षिणानयनमित्येवमर्थो। अहीनैकाहग्रहणं सत्रेष्वस्य दक्षिणाविनासी

Indira Gandhi National
Centre for the Arts

तिसृणामर्थः। कृष्णाजिनानि धृत्वेतः स्वयमेव दक्षिणापथं यंति दीक्षिताः सत्रेष्विदमहं मां कल्याण्यै कीर्त्यै तेजसे यशा
१२१ सेमृतत्वायात्मानं दक्षिणां नयानीति जपंतः। दीक्षितवचनं पत्नीनिवृत्त्यर्थं। सत्रवचनमसत्रेष्वस्य समुच्चयनिवृ
त्त्यर्थं। आत्मानं दक्षिणां नयानीति मंत्रवादः सत्राणामदक्षिणत्वं स्तुतिपरत्वान्नात्मदक्षिणत्वं विधातुं शक्नोति। उन्ने
ष्यमाणास्वाग्नीध्रीय आहुती जुह्वति। उन्नेष्यमाणासु दक्षिणासु दक्षिणाद्रव्येष्वित्यर्थः। केनचिन्मानविशेषेण दक्षि
णाद्रव्याणि दक्षिणाकाले नेतव्यानि तस्मात्पूर्वक्षणे सर्वे ऋत्विज आहुती जुह्वति। इदानीमग्निर्वेदतिका प्रगृहत
येति ततः। हंतेति चेद्रमाः ससमादिसः ससमोमापत्तस्स समाभरन्। दिशो यज्ञस्य दक्षिणा दक्षिणानां प्रियो भूयासं
स्वाहा। प्राचिंद्रेधिप्राचिं जुषाणा प्राच्यास्य वेतु स्वाहेति द्वितीया। द्वितीयाग्रहणं मंत्रभेदप्रदर्शनार्थं न द्वयोराहुत्योरे
ताभ्यामेको मंत्र आवर्तयितव्य इति। क इदं कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रतिग्रहीता कामं समु १२१
द्रमाविश कामेन त्वा प्रतिगृह्णामि कामैतत्ते। वृष्टिरसि द्यौस्त्वा ददातु पृथिवी प्रतिगृह्णात्विति सतीतासनुमंत्रयेत

प्राणि। विहारदेशमतीसनीतेषु दक्षिणाद्रव्येषु तन्मध्ये यत्प्राणिद्रव्यं तदेते नानुमंत्रयते। अभिमृशेदप्राणि। तन्म
ध्ये यदप्राणि तदभिमृशेत्॥ कन्यां च। अभिमृशेदिति शेषः। दैवेन विवाहप्रकारेण तदा यदि कन्या दीयते तामप्य
भिमृशेत्। अनेनैव मंत्रेण। न ब्राह्मणादिष्विदमभिमर्शनमस्ति ऋतुसंबंधाभावात्। सर्वत्र चैवं। सर्वत्र चैवं। सर्वत्र
वैतानिकेष्विष्टिपश्वादावेवं प्रतिगृह्णीयात् न लिंगैवेति प्रसंगाभावात्। प्रतिगृह्याग्नीध्रीयं प्राप्य हविरुच्छिष्टं सर्वे प्रा
श्नीयुः प्रास्य प्रतिप्रसृप्य॥१३॥ मरुत्वतीयेन ग्रहेण चरंति। मरुत्वद्देवत्यो मरुत्वतीयः। गतार्थं सूत्रद्वयं। इंद्रमरुत्व
इह पाहि सोमं होता यक्षदिंद्रं मरुत्वंतं सजोषा इंद्र सगणो मरुद्भिरिति। भक्षयित्वेतत्याज्ये मरुत्वतीयं शस्त्रं शंसेत्। भक्ष
यित्वेति वचनं शस्त्रकालोपदेशार्थं। मरुत्वतीयमिति शस्त्रनाम। अध्वर्यो शोंसावोमिति माध्यंदिने शस्त्रादिषा
ह्वावः। माध्यंदिने सवने यानि शस्त्राणि होतुर्होत्रकाणां च तेषामेवं रूप आहावो विधीयते। बहुवचनं होत्रकशस्त्र
परिग्रहार्थं। आ त्वा रथं यथोतय इदं वसो सुतमंध इति मरुत्वतीयस्य प्रतिपदनुचरौ। पुनर्मरुत्वतीयवचनं सर्वशस्त्र

Indira Gandhi National Centre for the Arts

धिकारात्। प्रतिपदनुचराविति संज्ञे यथासत्येन द्वयोस्तृचयोः। इंद्र नेदीय एदिहीतीद्र निहवः प्रगाथः। इदमपि
१७८ संज्ञा। प्रनूनं ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यः प्रगाथ इति शेषः। इयमपि संज्ञैव। तृचाः प्रतिपदनुचरा द्वौ प्र
गाथाः। आतोर्धर्चसर्वो। शस्त्राणामादिभूतमाज्यमारभ्य आस्माद्ब्राह्मणस्पत्यात् सर्वमर्धर्चे भवति। आज्यमारभ्य
ब्राह्मणस्पत्यपर्यंतं सर्वमर्द्धर्चशस्यं भवतीत्यर्थः। सर्वेषु च नात्र कृतौ विकृतौ चात्रिष्टुबादीनि पंक्तिर्वा विछंदो वा
अस्मिन्नवधौ यदागच्छति तत्सर्वमर्धर्चमिति गम्यते। स्तोत्रियानुरूपाः प्रतिपदनुचराः प्रगाथाः सर्वत्र। एते च
सर्वत्रार्द्धर्चशः शस्याः। प्रगाथस्यार्द्धर्चशंसनविधानं बृहतीकारपक्षे चतुर्थषष्ठयोः पादयोः पुनर्द्विरभ्यस्तयो
रवसानविध्यभावात् समाम्नायप्रसिद्धर्धर्चाभावादर्धर्चावसानं न प्राप्नोतीति तत्रावसानप्राप्त्यर्थं। सर्वत्र वचनं छं
दोगप्रत्ययप्राप्तस्यापि प्रगाथस्याभ्यासेन शस्यमानस्य एतदवसानं भवतीत्येवमर्थं। प्राकृच्छंदांसि त्रैष्टुभा १७८
त्। गायत्र्यादीनि पठितानि अर्द्धर्चशः शस्यानीत्यर्थः। सर्वाण्येवा चतुष्पदाः। गायत्र्यादीनां च सप्तानामक्षर

परिमाणमेव प्रवृत्तिनिमित्तं न पादविन्यासः। तत्र बृहत्युक्तानां पादविन्यासानपेक्ष्या सर्वप्रकाराणामर्द्धर्चशंसन
मुक्तं। पंक्त्या अप्यपंचपदाया अर्द्धर्चशंसनमेव। पंचपदायास्तु वक्ष्यति। तत्र पंक्त्या उत्तरे ष्टुत्रिष्टुब्छंदः सुत्या अच
तुष्पदास्तासामर्द्धर्चशंसनमनेन विधीयते। सर्वत्र हलं वृषाकप्यामि दिष्टिप्येव यामरूत्स्वर्द्धर्चशंसनमेवेत्येवम
र्थं। पंक्तिषु द्विरवस्येद् द्वयोर्द्वयोः पादयोः। अयं विधिः पंचपदास्वेव पंक्तिषु द्वयोर्द्वयोः पादयोरवस्येदित्यस्य विधे
स्तत्रैव संभवात्। अर्धर्चशो वाश्विने। आश्विने शस्त्रे याः पंक्त्यस्तासामर्द्धर्चशंसनं पंक्तिशंसनं वा भवतीति विक
ल्पोयं विधीयते। तत्रार्द्धर्चशस्यांतर्गतानामर्द्धर्चशंसनेस्तु तं त्राणां पंक्तिशंसनमेवेति विनिवेशो युक्तः। पच्छः
शस्यगतां तु पच्छः। शंसने क्रियमाणे यं विशेषः। सर्वत्र विषये पच्छः शस्यस्त्वृक्गता या एकस्याः पंक्तेः पच्छः श
स्यतेव। तत्रस्त्वृक्मुखीया उदाहरणं। अर्वाग्रथमिति चेव मादिनमो वाक इत्यर्द्धर्चशः शस्यास्याहृक् तत्स्येस्य
स्याः पंक्तिशंसने। समासमुत्तमे पदे। पंक्त्याः पच्छः शंसने क्रियमाणे ये उत्तमे पदे अतिरिक्ते ते तयोः समासं कु

Indira Gandhi National
Centre for the Arts

त्वा शंसेत्। उत्तमे परे समस्य शंसेदिति वा योजना। पङ्क्तो न्यत्। उक्तादन्यत्स्तुः शंसेत्। यदिदमर्द्धर्चशंसनविधा
१७९ नं सामिधेन्यतिदेशप्राप्तमप्युपदिश्यते तत्स्तुः शस्यविषयनियमार्थं न स्वरूपविधानपरं। पादैरेवमा पार्द्धर्चीतैः
संतानः। इदं पच्छः शस्य प्रकारप्रदर्शनार्थं। अर्द्धर्चीतैः संतान इत्यर्द्धर्चीतेषु पणवं क्लृप्ता तैः संतानः कर्तव्यः। अ
ग्निर्नेता त्वं सोम क्रतुभिः पिन्वंत्वप इति धाय्यः। धाय्या इति नाम। प्रव इंद्राय बृहत इति मरुत्वतीयः प्रगाथः। इ
दमपि नाम। जनिष्ठा उग्र इति। इंद्रं सूक्तं। एकभूयसीः शस्त्वा मरुत्वतीयं निविदं दध्यात्सर्वत्र। एतस्य सूक्तस्या
धीए काधिकाः शस्त्वा तदंतराले इंद्रो मरुत्वानिसेतां निविदं दध्यात्। अर्द्धी इति क्त्वा लक्षणा लभ्यते। तस्यार्द्धः श
स्त्वार्द्धः परिशिष्य मध्ये निविदं दधातीति। सर्वत्रग्रहणं सूक्तमुखीया यां सप्तमपि तं मुक्त्वा सूक्तस्यैवैकभूय
सीर्ऋचः शस्त्वा निविदं ये सेन मर्थं। एवमयुजामुमाध्यंदिने। सवनवचनं विस्पष्टार्थं। एकां तृचे। अर्धायुग्मा १७९
सु। शस्त्वे सनुवर्तते। एकां शिष्टा तृतीयसवने। निविदं दध्यादित्यनुवर्तते। अक्षिणीमजानः परिदध्यात्। ध्या

यत्नेन आत्मनः। उभयं कुर्वन्परिदध्यात्। एतस्त्रिष्वपि वचनेषु कर्तव्यं। एनः पापं। आत्मन इति वचनान्न यज
मानस्येति गम्यते। अन्यत्रा प्येतया परिदध्यदेवं। अतिदेशप्राप्तानां वचनाद्वेतेपि भवति। इदं तु वचनं जनिष्ठा
उग्र उग्रो जज्ञ इति मध्यंदिन इति उपदेशप्राप्तानां प्रापणार्थं। उक्थं वाचीन्द्राय शृण्वते त्वेति शस्त्वा जपेत्। ये
त्वाहिहत्ये मघवन्नवर्धन्निति याज्या। १४॥ निष्केवल्यस्य। अधिकारो यं निष्केवल्य इति शस्त्रनाम। अभित्वा शू
र नोनुमो भित्वा पूर्वपीतय इति प्रगाथौ स्तोत्रियानुरूपौ यदि रथंतरं पृष्ठं। रथंतरमिति सामविशेषः। पृष्ठमित्य
स्मिंस्थाने ज्योतिष्टोमांगभूतसामाभिव्यक्तऋगक्षरसंपाद्यस्तुतिजन्यं शस्त्रैकसमधिगम्यं कर्म्मोच्यते। तत्र
यदि रथंतरं पृष्ठमित्ययमर्थः। यदि पृष्ठकार्ये रथंतरं साम कुर्युश्छंदोगा इति। एवं बृहत्पृष्ठे वैरूपं पृष्ठमित्येवमा
दिष्वपि वेदितव्यं। सामान्याधिकरण्यं त्वौपचारिकमिति मंतव्यं। प्रगाथवचनं द्व्यृचग्रहणार्थं। स्तोत्रियानुरूपवच
नं तृचत्वादिसिध्यर्थं। यद्युवेबृहत्वामिद्धि हवामहे त्वंह्येहि चेरव इति प्रगाथा एते भवंति। सिद्धे सत्यारंभो नियमा

Indira Gandhi National
Centre for the Arts

र्थः। यद्येतेषु छन्देषु छंदोगा द्विपदोत्तराकारं तृचं कृत्वा स्तुवंति तथा प्यस्माभिर्ऋचा एव कृत्वा शंस्तव्याः। नयथा
१८० स्तुतं तृचाकारं शंस्तव्य इत्यर्थः। तां द्विपदोत्तराकारं शंसेत्। अनभ्यासेन तृचाकारस्तवने छंदोगा एव न तृचाः कर्तव्या
इत्युक्तं। इदानीं अभ्यासेन तृचाकारस्तवने तान् प्रगाथान् द्विऋचौ सन्तौ अभ्यासेन तिस्र ऋचः कृत्वा शंसेत्। इ
तिसूत्रार्थः। तदेवं प्रकारमित्याह। चतुर्थषष्ठौ पादौ बार्हते प्रगाथे पुनरभ्यसित्वोत्तरयोरवस्येत्। बृहती सतो बृ
हत्योर्यौ द्वृचः स बार्हतः प्रगाथ इत्युच्यते। ककुप्सतोबृहत्योः काकुभ इति। बार्हताधिकारे पुनर्बार्हतवचनमन
धिकृतानामप्यस्य विधेः प्रापणार्थं। तस्मिंश्चतुर्थषष्ठौ पादौ पुनरभ्यस्य सप्तमपंचमयोः पादयोरवस्येत्। अत्रा
वसानाभ्यासौ विधीयेते। एवं कृते पूर्वा बृहत्युत्तरे ककुभौ भवतः। बृहतीकारं चैतावेव द्वौ। बृहतीं कृत्वा शंसनं
बृहतीकारमित्यर्थः। यदि तिस्रो बृहत्य एव चिकीर्ष्येत तदा तावेव पादौ पुनर्द्विरभ्यस्य तत्रैवावस्येत्। तत्रैवावसा १८०
नलाभार्थं प्रगाथस्यार्धर्चशंसनविधानमित्युक्तं। तृतीयपंचमौ तु काकुभेषु। एतेषु तावभ्यस्योत्तरयोरवस्ये

त्। उत्तरयोरवस्येदित्यत्रानुवर्तते। तदनुवर्तमानमपि प्रगाथस्यार्धर्चशंसनविधिबलात्सर्वत्र नियमो
नमेवावतिष्ठते। अत्र तु प्रयोजनमस्तीत्युक्तं। प्रसादानाद्युत्तरा। ऋग्भवतीति शेषः। एवमेतत्पृष्ठे ष्वहः
स्विंद्रनिहवब्राह्मणस्पत्यान्। एतत्पृष्ठेष्विति समासनिर्देशादेतद्वेस्यवधार्यते। एतच्छंदेन प्रकृतत्वाद्बृहद्र
थंतरे उच्येते। एतदुक्तं भवति। येष्वहःसु बृहद्रथंतरं वा तयोः संहतिर्वा पृष्ठकार्यं भवति तत्र यथा बृहद्रथंतरस्तो
त्रियानुरूपयोः शंसनं भवति तद्वदिंद्रनिहवब्राह्मणस्पत्ये। शंसेत्। तयोस्तु शंसनं यथास्तुतमिति वक्ष्यति। बृ
हतीकारमितरेषु पृष्ठेषु। बृहद्रथंतराभ्यामितरेषु पृष्ठेषु तान्बृहतीकारं शंसेत्। इतरेष्विति समासनिर्देशादि
तरसमाभात्रेपि बृहतीकारमेव भवति। तेनाप्तोर्यामे रथंतरेणाग्रे ततो वैराजेनेत्यत्र यद्यपि बृहद्रथंतरे पृष्ठे तथा
पि वैराजसंबंधाद्बृहतीकारमेव भवतीति। बृहद्रथंतरयोर्व्यत्यस्तयोः। यदा बृहद्रथंतरे गायत्रीषु वा न्या
सु वा नभ्यस्तासु निस्त्रिषु ऋक्षु स्तुवते स्तयोर्निष्टुवाद्विपदोत्तराकारं तदापीन्द्रनिहवब्राह्मणस्पत्ये बृहतीका

Indira Gandhi National
Centre for the Arts

रं शंसेत्। होत्रकाश्च येषां प्रगाथास्तोत्रियानुरूपाः। येषां होत्रकाणां प्रगाथास्तोत्रियानुरूपा भवंति ते पी
१८१ द्विनि हव ब्राह्मणस्य सवत्तो छंसेयुः। सर्वमन्यद्यथास्तुतं। उक्तादन्यत्सर्वं यथास्तुतं शंसेत्। सर्वग्रहणं बृहद्र
थंतरयोस्तोत्रियानुरूपसंग्रहार्थं। परिमितशस्य एकाहः। परिमितः सर्वतोमितं शस्यं यस्याहः स परिमित
शस्यः। एतदुक्तं भवति। यः स्वकीयैर्धर्मजातैरुपदेशत एव परिपूर्ण इति। स चैकेनाह्ना समाप्यत इत्येकाहः।
अनेन प्रकारेण परिमितशस्यशब्देन प्रकृतिभूतोग्निष्टोम उच्यते। योयमधिकृत एकाहः स सर्वत औपदे
शिकशस्य इत्यर्थः। एवं चेत्तस्य विशेषणं किमर्थमन्यदपि धर्मजातं तस्योपदेशादवगतमेव। अत्रोच्यते।
सत्यमेवं किं तत्र विशेषोस्ति सोमद्रव्यसंबंधिनो ये धर्मा उत्पत्तिविध्यनुप्रवेशिनस्ते चतुःसंस्थस्य ज्योतिष्टो
मस्य साधारणाः। ये पुनरधिकारविध्यनुप्रवेशिनो दीक्षणीयादयः स्तुतशस्त्रादयश्च त उपदेशतोग्निष्टो
मस्यैव अतिदेशत एवोक्थ्यादीनामपि संस्थानामित्यनेन विशेषेण शस्यविशेषणं कृतवानाचार्यः। त १८१

स्यैवैकाहत्वं प्रसिद्धमेवोच्यते तेन शब्देनास्य व्यवहारार्थं। स यद्युभयसामा यस्तवमाने तस्य योनिरनुरूपं।
स प्रकृत एकाहो यद्युभयसामा स्यात्। बृहद्रथंतरसामा स्यादित्यर्थः। उभयसामत्वेनामेवं भवति। बृहद्रथं
तरं वा पृष्ठस्थाने भवतीतरत्तवमान इति। तत्र यत्तवमाने भवति तस्य योनिं निष्केवल्यस्यानुरूपं कुर्यात्। क्ष
त्रियस्यायमर्थः प्रत्यक्षाम्नात एवेदं तु रूत्रवचनं सर्वार्थतायोच्यते। योनिस्थान एवैनामन्यत्र शंसेत्। अन्य
त्रेत्युक्थ्यादीन्यपि गृह्यंते अग्निष्टोमादन्यो यः कश्चिदुभयसामैकाहः संस्थावा बृहद्रथंतरसामास्यादित्यर्थः।
तत्र यत्तवमाने कृतं तस्य योनिं योनिस्थान एव शंसेत्। योनिस्थानमाह। ऊर्ध्वं धाय्याया योनिस्थानं। निष्केव
ल्ये धाय्याया ऊर्ध्वं यत्स्थानं तद्योनीनां स्थानं शंसनस्थानमित्यर्थः। अनेकानंतर्यं सकृत्त्वार्थं ग्राह्यानां। अनेका
नां धाय्याया ऊर्ध्वं यत्स्थानं तद्योनीनां स्थानं शंसनस्थानमित्यर्थः
सामानामयोनीनां सह शंसने प्राप्ते आदावेव सर्वासामाहावः सकृत्कर्तव्यः प्रतियोनि वेति विकल्पः। तेभ्यश्चाम्
दनंतरमित्यनेनादौ सकृदाहावः प्राप्त एवोत्तरविकल्पेन विधीयते। एवमूर्ध्वमिंद्र निहवात्प्रगाथानां। ब्राह्मण

Indira Gandhi National
Centre for the Arts

स्यत्यमरुत्वतीयसामप्रगाथायदा॰ नेकेसहसंगछेयुस्तदातेष्वपि सकृत्स्वथ्ग्वाहावः कर्तव्यः। अत्रसर्वत्राहा
१८२ वेप्रासेअनेनाद्येषु विकल्पोत्रविधीयते। यद्वावनितिधाय्या। पिबासुतस्यरसिन इति सामप्रगाथः। संज्ञाशब्द
वेनौ। इंद्रस्यनुवीर्याणीत्येतस्मिन्नैंद्रीनिविदंदध्यात्। इंद्रोदेवतायस्य। इत्यैंद्रीनिवित्। अनुज्ञाल्लणीयास्वरः।
उक्थंवाचीन्द्रायोपश्रण्वतेत्वेतिशस्त्वाजपेत्। पिबासोममिंद्रमंदतुत्वेतियाज्या। होत्रकाणांमाध्यंदिनेपिशस्त्रा
णिभवंतीत्युक्तं। तान्येतानीत्याह॥१५॥ होत्रकाणांकयानश्चित्रआभुवत्कमात्वंनऊत्याकस्तमिंद्रत्वावसुंसद्यो
हजातएवात्वामिंद्रोशंनुषुणः सुमनाउपाकइतियाज्याते वोदस्ममतीषहंतत्वायामिसुवीर्यमितिप्रगाथौस्तो
त्रियानुरूपाउदुत्येमधुमत्तमाइंद्रःपर्भिदुद्ब्रह्माण्यजीषीवज्रीवृषभस्तुरापाळितियाज्यातरोभिर्वोविदद्
सुंतरणिरित्यिषासतीतिप्रगाथौस्तोत्रियानुरूपाउदित्वस्यरिच्यतेभ्रमइदिमाम्षिलुपोनमामुद्रेत्सर्वत्रपि १८२
दावर्द्धस्वतवयासुतासइतियाज्या। अत्रोपोनमामुद्रेत्सर्वत्रेत्युक्तं। तस्यसर्वत्रग्रहणस्यप्रयोजनमन्यत्रापि

तपेस्यनेनान्यग्रहणेनतुल्यं। आसिन्नवसरेसवनसंस्थानिमित्तंकर्मकर्तव्यं॥१६॥ अथतृतीयसवनमुत्त
मस्वरेण। स्वरग्रहणंपूर्ववद्बाधकबाधनार्थं। तेनपाशुकेहविःसंप्रचारेषुनमःस्वरः सिद्धोभवति। आदित्येन
ग्रहेणचरंति। आदित्योदेवतायस्यग्रहस्यआदित्यग्रहस्तेनचरंति। आदित्यानामवसानूतनेनहोतायक्षदादित्या
न्प्रियान्प्रियधाम्नआदित्यासोअदितिर्मादयंतामितिनैतंग्रहमीक्षेतहूयमानं। अत्रप्रतिषेधान्नियमेननेक्षेतनेतना
न्यत्रानियमः। स्तुतआर्भवेपवमानेविहृत्यांगारान्मनोतादिपश्विळांतंपशुकर्मकृत्वापुरोळाशाद्युक्तमानाराशंसस
दनात्। कर्तव्यमितिशेषः। विहरणेपदेशस्तत्कालपरिज्ञानात्तद्यवायपरिहारार्थः। अत्रापिद्विदेवत्यानसंति। पश्विळां
तंकर्मस्येत्यावतैवसिद्धेपशुग्रहणंब्रह्मणःपशुवदासनप्राप्त्यर्थं। तेनैतस्मिन्नवसरेआहवनीयस्यदक्षिणतआस
नंभवति। संनेषुमदिष्ठात्पुरोळाशस्यतिस्त्रस्त्रिस्वःपिंडीर्दक्षिणतःप्रतिसंचमसेभ्यःसेभ्यःपितृभ्यउपास्येयु
रत्रपितरोमादयध्वंयथाभागमावृषायध्वमिति। नाराशंसेषुसादितेषुपुरोळाशस्यसदुतमात्रप्रदेशाद्दृहीत्वासर्वेच

Indira Gandhi National
Centre for the Arts

मसिनः पुरोडाशं तिस्रस्तिस्रः पिंडीः कृत्वा स्वां स्वां चमसाद्दक्षिणतः स्वान्स्वान्पितॄननुद्दिश्य चमससमीपे अस्येयुः।
१८३ ता पिंडीः प्रतिस्वमिति चमसेभ्य इत्यस्य विशेषणं पितृशब्दस्य संबंधिशब्दत्वात् वस्त्वेत्सि इत्यस्य श्रवणाद्ग्रहणं करो
ति तस्मात् पयति संबंधिपदार्थः। अपि यत्नाहृते यजमानस्येवेति। तेन यस्यां द्वेष्यो नता मिस्यन्न यजमानद्वेष्यए
षपरिगृह्यते। सव्याहृत आग्नीध्रीयं प्राप्य हविरुच्छिष्टं सर्वे प्राश्नीयुः। प्राश्य प्रतिप्रसृप्य।२१। सावित्रेण ग्रहे
ण चरंति। एतदुभयं गतार्थं। सवितृदेवत्यो ग्रहः सावित्रग्रहः। अभूद्देवः सविता वंद्यो नु नो होता यक्षद्देवं सविता
रं दमूनादेवः सविता वरेण्यो दधद्रत्नादक्षपितृभ्य आयूंषि। पिबात्सोमं ममदन्नेनमिष्टाः परिज्मा चिद्रमते अ
स्य धर्मणीति। वषट्कृते होता वैश्वदेवं शस्त्रं शंसेत्। वषट्कृत वचनमत्रापि शस्त्रकालज्ञापनार्थं। होतृग्रहणम
त्विक्कर्मव्यतिकरविषये पि होतैव वैश्वदेवं शंसेदित्येवमर्थं। वैश्वदेवमिति शस्त्रनाम। सर्वा दिशो ध्यायन्शं १८३
सिष्यन्। यस्यां द्वेष्यो नतां। यस्यां द्वेष्यो न तां दिशं ध्यायेदिति वचनात्सुखं ध्यानमत्र न संभवतीति प्राप्यादि

शत्रुरेव ध्यानं कर्तव्यं। अध्वर्यो शोंशोंसावो मितित्त्वं तृतीयसवने शस्त्रादिष्वाहावः। उक्तार्थमेतन्माध्यंदिने। त
त्सवितुर्वृणीमहे घानो देवसवितरिति वैश्वदेवस्य प्रतिपदनुचरौ अभूद्देव एकया च दशभिश्च स्वभूते द्वाभ्या
मिष्टये विंशती च। तिसृभिश्च वहसे त्रिंशता च नियुद्भिर्वायविह ता विमुंच प्रद्यावेति द्वे घृतमसंसुरूपकृत्नुमूतये
त सत्र थ म यं वेन श्चोदय त्पृश्निगर्भा पेभ्यो मातामधुमत्पिन्वते पय एवा पित्रे विश्वदेवाय वृष्णे आ नो भद्राः क्रत
वो यंतु विश्वत इति नव वैश्वदेवं। पुनर्वैश्वदेवग्रहणं शस्त्रादिष्विति व्यवायात्। एकया चेति कल्पजातौ घृतमसेति
यासिष्ठनिवृत्त्यर्थं। नवग्रहणं अस्य सूक्तस्य त्तमावर्जस्येदं वैश्वदेवसूक्तत्वसिध्यर्थं। एतत्सावित्रिकं उत्तमा। याः परि
धानीयत्वेन सर्वत्र विनिवेशात्। वैश्वदेवाग्निमारुतयोः सूक्तेषु सावित्रादिनिविदो ध्यानात्। सप्तसूक्तानि निविदाद्
ध्यात। सप्तसूक्तानि सप्तैव च निविदो वक्ष्यंते। उत्तमायाः षोडशिनि विनियोगात्। अतो यथासंख्यं न विनि
वेशः सिद्धो भवति तदेव स्पष्टयति। चतस्रो वैश्वदेवे। शस्त्र इत्यर्थः। उत्तरास्तिस्र उत्तरे। आग्निमारुत इत्यर्थः।

Indira Gandhi National
Centre for the Arts

सूक्तानां तद्धिदेवतं। सूक्तानां यद्दैवतं भवति तद्देवनिविदो दैवतमित्यर्थः॥ हि शब्दो हेत्वर्थसूचकः प्रसिद्धिद्वारे
१८४ णानेनायमर्थः। यस्मादनयोरेकदेवतत्वं प्रसिद्धं तस्मादग्निष्टुदादौ सूक्तानां देवताभेदे सति निविद ऊहेन तद्देव
त्याः कर्तव्याः॥ तासु देवतापदानामूहः कर्तव्य इत्यर्थः॥ दैवतेन सूक्तांतः। यद्येतयोः शस्त्रयोः सप्तैव सूक्तानि तदा नि
विद्भिर्यथासंख्यमुपपद्यते। यदा पुनर्विकृतिषु सप्तभ्योऽधिकानि सूक्तानि तदा कथं यथासंख्यमिति तदुपपाद
नार्थमिदं सूत्रं दैवतेन सूक्तांत इति दैवतेनैव सूक्तानां नानात्वमवगंतव्यं न समाम्नायप्रसिध्या। एतदुक्तं भवति।
एतयोः शस्त्रयोः सप्तैव कार्याणि प्रकृतौ परिछिन्नानि। तत्रैकं कार्यमेकं वा सूक्तं कुर्यात् द्वे बहूनि वा। सर्वथा
तावदेकसूक्तकार्यानुप्रविष्टमेकमेवेति कृत्वा यावतां सूक्तानामेकं दैवतं तावदेकमेवेति मन्यमानो दैवतेन
सूक्तांत इत्युक्त्वा नाचार्यः। धाय्याश्चात्रैक — तिनीः॥ विद्यादिति शेषः॥ अत्रेति वैश्वदेवाग्निमारुतयोरित्य १८४
र्थः॥ अस्यविधेरनर्थक्याभावो नरस्तु नेवैश्वदेवशस्त्रं प्रयुक्त्वा नाचार्यः॥ अदितिर्द्यौरदितिरंतरिक्षमिति परि

दध्यात्सर्वत्र वैश्वदेवे द्विःपठेद् ईर्चशः सकृद्भूमिमुपस्पृशन्। सर्वत्र प्रकृतौ विकृतौ च वैश्वदेवशस्त्रे अन
येन परिदध्यात्। इत्थं च परिदध्यादिदं च कुर्वन्परिदध्यादित्यर्थः॥ उक्थं वाची न्द्राय देवेभ्य आश्रुत्वेति शस्त्वा
जपेत्। विश्वेदेवाः शृणुतेमं हवं म इति याज्या॥ ॥ ॥ त्वं सोम पितृभिः संविदान इति सौम्यस्य याज्या। सौम्यो नामकर्म
विशेषश्चरुर्हविष्कः सोमदेवत्यः॥ तं घृतयाज्याभ्यामुपांशूभयतः परियजंति। तं सौम्यमभितो घृतयाज्याभ्यामुपां
शु परियजंति। तत्रैव विशेषमाह॥ घृतवती घृतपृष्ठो अग्निर्घृते श्रितो घृतमस्य धाम। घृतप्रुषस्त्वा हरितो वहंतु घृ
तं पिबन्यजसि देव देवानिति पुरस्तात्। उरु विष्णो विक्रमस्वोरुक्षयाय नस्कृधि। घृतं घृतयोने पिब प्र प्र यज्ञपतिं तिर स्वाहेत्यु
परिष्टात्। अन्यतरश्चेदग्ना विष्णु महि धाम प्रियं वामित्युपांश्वेव। यद्यन्यतरतो यजंति तदा ननायजेत्तदाप्युपांश्वेव।
एवकारः पौनर्वचनिकः॥ आहृतं सौम्यं प्रथममुद्गात्रभ्यो गृहीत्वावेक्षेतयन्नेचक्षुर्दिविष्यत्सुपर्णो येन्ने क्राज्यमजयोहि
त्वा। दीर्घं यच्चक्षुरदितेरनंतं सोमो नृचक्षा मयि तद्दधात्विति। अध्वर्युणा आहृतमुद्गातृभ्यः प्रथमं गृहीत्वा सौम्यमवे

Indira Gandhi National
Centre for the Arts

क्षेतमंत्रेण। अपश्यन्। हृदिस्पृक्क्रतुस्पृग्वर्चोधावर्चो अस्मासु धेहि। यन्मे मनोयमंगतंयद्वामे अपरागमं। राज्ञासो
१८५ मेन तद्वयमस्मासु धारयामसि। भद्रं कर्णेभिः शृणुयाम देवा इति च। तस्मिंश्चेग्रे घृतस्तु तेईक्षमाणाः स्वछायां प
दिनपश्येत्तस्याप्रत्युतो नैमित्तिकमिदं। हृदिस्पृगित्यादि यजुश्च भद्रं कर्णेभिरित्यृचं ब्रूयात्। अंगुष्ठो — कनिष्ठि
काभ्यामाज्येनाक्षिणी अज्य छंदोगेभ्यः प्रयछेत्। अंगुष्ठोपकनिष्ठिकाभ्यां चरुस्थेनाज्येनाक्षिणी अंक्त्वा छंदो
गेभ्यः प्रदानार्थमध्वर्यवे प्रयच्छेदित्यर्थः॥ अंजनादि नित्यमेव। विहृतेषु शालाकेष्वाग्नीध्रः पात्नीवतस्य प्रज
स्येभिरग्नेसरथं यास्यर्वाङिति स्रुपांश्वेव। शलाकादर्भेषीकाः तेषु भवा अग्नयः शालाकाः॥ तेषु विहृतेषु इति वि
हरणकालोपदेशस्तस्य व्यवायपरिहारार्थः॥ शालाकाः धिष्ण्या अग्नयः॥ उपांश्वेवेत्यवधारणं तेषामुच्चैः मंत्रे
ष्वप्युपांश्वेव यष्टव्यमित्येवमर्थं। नेष्टारं विसंस्थितसंचरेणानुप्रपद्य तस्योपस्थ उपविश्य भक्षयेत्। नेष्टुर्वि १८५
संस्थितसंचरेण नेष्टारमनुप्रपद्य तस्य उपस्थ उपविश्य भक्षयेत् पात्नीवतं। नेष्टर्यधिकृते उपस्थ इति वच

नात्तस्येवेत्यवगतो सत्यां तस्येति वचनं शास्त्रं। नेष्टरेणोपस्थ आसीतेति प्रतिषेधे सत्यपि उपस्थ एवोपविशे
दित्येवमर्थं। अस्य सूत्रकारस्यान्याश्रुतिर्मूलमस्तीत्यनुमिमीमहे॥१९॥ अथ यथेतं। अथानंतरमेव यथेतं नि
ष्क्रामेत्॥ सदस आग्नीध्रं प्रतिगच्छेत्। तस्मिन्नाग्नीध्रीये यथेतं निष्क्रांत एवाग्निमारुतमारभेतेति वचनप्रयोज
नं यथेतमिति येनैव मार्गेणागतस्तेनैवेति। स्तुप्यग्रमाग्निमारुतं। स्तुप्यग्रं द्रुतं शस्येत्यर्थः॥ वाचस्तिस्रो वृत्तयो वि
लंबिता मध्यमा द्रुता चेति। तत्र विलंबितायां मएकमात्रः सम मध्यमायां द्विमात्रः एवं द्रुतायां त्रिमात्र इत्यासु विशेषः।
एवं प्राप्ते तेनासंत्वरमाणश्चरेदृक्षु भिसारभ्य त्रिषु सवनेषु संत्वरमाणश्चरेदृक्षु रिसारभ्य त्रिषु सवनेषु संत्वरमा
णाश्चरेदृक्षुरिति स्थिते असंत्वरमाण इति संत्वराप्रतिषेधादनंतरम मध्यमावृत्तिः विहिता भवति। तत्राग्निमारुते म
ध्यमामपेक्ष्य द्रुता विधीयते। उच्चनीचभावेनैव शंस्तव्यं। त्रिषु सवनेषु मंद्रादयो यमाः आरोहक्रमेणैव प्रयोक्तव्याः
।आग्निमारुतमिति शस्त्रनाम। तस्माद्यापछत्रगावानेपत्तुः शस्याचेत्। तस्माग्निमारुतस्याद्यामत्र सगावानेशं

Indira Gandhi National
Centre for the Arts

१८६ सेत्। यदि स्म पङ्क्तिः शस्या भवेन्न तदा पादे पादेवसायानुष्टुभं संनेव शंसेत्। अर्द्धर्चशः इतरां। यदि सार्धर्चशस्या स्यात्त
दार्धर्चे अवसायानवानमित्यर्थः। संतानमुत्तमेन वचनेन। ऋग्गावानवचना त्रिष्टुब्वचनेषु असंताने प्राप्ते उत्त
मेन वचनेन नहितो यथा संतानं विधीयते। वैश्वानराय पृथुपाजसे शंसेत्। ऋचस्सर्वत्र प्रत्यक्षमः प्रतवसो यज्ञायज्ञा
वो अग्नये देवो वा द्रविणोदा इति प्रगाथो स्तोत्रियानुरूपौ प्रत व्यसी नव्यसीमापो हि ष्ठेति तिस्रो वियतमनुपउप
स्पृशन्नन्वारब्धे प्रावृतशिरस्क इदमादि प्रतिप्रतीकमाव्हानमुत नोहिर्बुध्न्यः शृणोतु देवानां पत्नीरुशतीर
वंतु नः इति हि राकामहमिति हि पावीरवी कन्या चित्रायुरिमं यम प्रस्तरमा हि सीद मातली कव्यैर्यमो अंगिरोभिरुदी
रतामवर उत्परास आहं पितॄन्त्सुविदत्रां अविसीर्दपस्तभ्यो नमो अस्त्वद्य स्वादुष्किलायमिति व्रतस्तोमध्ये चाव्हा
नं भद्रामोदैनमोदामोदैवोमित्यासां प्रतिगरो ययोरोजसा स्कभिता रजांसि वीर्येभिर्वीरतमा शविष्ठा। या पत्यते १८६
अप्रतीता सहोभिर्विष्णू अगन्वरुणा पूर्वहूतौ। विष्णोर्नुकं वीर्याणि प्रवोचं तंतुं तन्वन्रजसो भानुमन्विहि ग्यान

इन्द्रो मघवा विरप्शीति परिदध्यात्। भूमिमुपस्पृशन्। अत्र वियतमप उपस्पृशन्नित्यापो हि ष्ठीये उक्तं वि
यतमितिष्ठु परतो। स्थित्वा स्थित्वा शंसेदित्यर्थः। अपश्चोपस्पृशन् शंसेत्। अन्वारब्धे प्रावृतशिरस्कः। उ
ग्राद्याद्यात्मानं अन्वारब्धेषु शिरसः प्रावरणमपोहेत्। अनेनैव न्यायेनैतत्तो चोपाकरण काल एव सर्वे प्रावृत
शिरस्का भवेयुरिति। इमादि प्रतिप्रतीकमाव्हानमित्यत्रेदमादीत्यापो हि ष्ठीयादीत्यर्थः। अस्य विधेर्विषये
धाय्यात्वादनंतरत्वाद्विशेषवचनाच्च काराद्वचवर्जं अन्येषु सर्वेषु हावः प्राप्त एव किमर्थोयं महान्प्रयास इति
न विघ्नः। राकाद्यर्थमिति चेत्तदेवं वक्तव्यमापो देवते चत्वेराकाद्वे चेति तत्रैव वक्तव्य। मत्रैव येतमो
राहाव सिद्ध्यर्थं। इदमादीत्येतन्न वक्तव्यं स्यात्। एवं लघुनोपायेनोभयोराहावे विधातुं शक्येपि अर्द्धेवतस्य
यसुरस्मादाहावं विदधाति न त्वापयस्माचार्यो स्य विधेरनित्यत्वं। तेन राकाद्वचे आहाव विकल्पः सिद्धो भव
ति। मदामोदैवमोदामोदैवोमित्यासां प्रतिगरो विस्पत्रेदं प्रतिगरद्वयमोथामोदैवेत्यस्य प्लुतालुता द्विरूपद

Indira Gandhi National
Centre for the Arts

यद्विशिष्टस्यापवादः। प्रणवे प्रणव आहावो नर इत्यर्थं प्रणवः प्लुतादेरपवादः नमोदामोदैवो मित्यस्य। अतः
१८७ स्वादुष्किलीयास्ताहावोत्तरे पिन प्रणवः प्रतिगरो भवतीति सिद्धं। एवमादिप्रयोजनार्थं प्रसंगादपवादो व
र्लीप्याग्निमुक्तं। भूमिमुपस्पृशन्परिदध्यात्। उत्तमे नव वचनेन ध्रुवावनयनं कांक्षेत्। परिधानीयायाउत्त
मे नव वचनेन ध्रुवावनयनं प्रतीक्षेत। ध्रुवो नाम ग्रहः तस्यावनयनमवसेचनं होतृचमसे। तदस्मिं छस्त्रे अ
समाप्त एव कर्तव्यं। तत्सर्वमनवनीतं चेत्परिधानीयायामध्यमे वचने उत्तमं पादमवशिष्याविलात्तस्मि
न्नवनीते शेषं समापयेत्। उक्थं वाची द्रायदेवेभ्य आश्रुतायेति शस्त्वा जपेत्। अग्ने मरुद्भिः शुभयद्भि
र्ऋक्वभिरिति याज्या। इत्यंतोऽग्निष्टोमाग्निष्टोमः। इतिशब्देन प्रकृतमाग्निमारुतमुच्यते। एतदंतः सोमया
गोऽग्निष्टोमसंज्ञो भवतीत्यर्थः॥ यद्यंत ग्राष्टोनोच्येत यदिदमाग्निमारुतं तदग्नेः स्तोत्रमित्येवोक्तं स्यात्त १८७
स्त्र नवक्तव्यं स्वरूपत एव तदग्नेरन्येष्व स्तोत्रमेव। अन्यनिवृत्त्यर्थमिति चेत्तदपि वक्तुं न शक्यते। लिंगवि

रोधादेदीवदूवनाभावाच्चतेनेत्यंत इत्युक्तमेतदंतस्य नामधेयमेष शरू इति साधयितुं॥२०॥ इत्याश्वला
यनसूत्रवृत्तौ नारा—यणीयायां पंचमोध्यायः॥५॥ हरिः ॐम्॥ उक्थ्ये तु होत्रकाणां। तृतीयसवन इत्यनु
वर्तते। उक्थ्ये त्वयं विशेषः। तृतीयसवने होत्रकाणामपि शस्त्राणि भवेयुः। तानीमानीत्याह। एन्द्रावरुणानि
त आग्निरगामिभारतस्त्वर्षणीधृतमस्तम्भाद्यामसुर इति तच्चाविंशायरूणाध्रुवमावोराजानाविंद्रावरुणामधु
मत्तमस्येति याज्या वयमुत्वाम पूर्व्य मो न इदमिदं पुरेति प्रगाथो सर्वाः ककुभः प्रमंहिष्ठायोद्गुतो छा मइंद्रं बृह
स्पते युवमिंद्रश्च वस्व इति याज्या धाहीन्द्रगिर्वण इपंत इंद्रगिर्वण ऋतुर्जनित्री नमस्तेभवामित्रः संवोकर्मणेश
विष्ठमदपतीमदानामिति याज्या। अत्र सर्वाः ककुभ इत्युक्तं। किमनेनोक्तं काकुभेषु तावत्प्रगाथेषु तृती
यपंचमयोरभ्यासे सति ककुभ एव सर्वा भवंतीति तथैव स्तुवंति च छंदोगाः। अतोन्यत्प्रयोजनमन्वेषणी
यं तदिदमुच्यते। होत्रकाश्च येषां प्रगाथास्तोत्रियानुरूपा इतीदं निह्नवब्राह्मणस्य स्यवछंसनेविहितं

Indira Gandhi National
Centre for the Arts

तत्रबार्हतानामेवायं विधिरित्यनुक्तत्वात्। काकुभेष्वपि प्राप्नोतीति तंनिवृत्त्यर्थं ककुभ इति वचनं। सर्वग्रहणं
१८८ सर्वककुभप्रगाथसंग्रहार्थं। तेन बार्हतेष्वेवासौ विधिरिति मंतव्यं। इत्येतदुक्थ्यः। एवमंतउक्थ्यः। एवमंत
उक्थ्यः। एवमंतउक्थ्यः क्रतुरित्यर्थः। इत्यतोग्निष्टोम इत्यस्यानंतरं होत्रकाणामेतानि शस्त्राण्युक्थाइत्येत
उक्थ्य इत्येतावत्युच्यमानेपि एतानि शस्त्राण्युक्थ्य एवेति गम्यते तत्किमर्थं उक्थ्यं तु होत्रकाणामित्यत्रोक्थ्य
ग्रहणमयमभिप्रायः। अथ सोमेनेत्यारभ्य त्रिष्वध्यायेषु ज्योतिष्टोमाख्यः सोमयागोधिकृतः। स च संस्थाभे
दान्नामभेदाच्च चतुर्धा भिन्नो ज्योतिष्टोमादितो भवति। तत्र सर्वत्र सोमेन यजेतेत्यस्मिन्विधिविहित एवैको यागः केन
चिदुपाधिविशेषेणाभ्यस्तो भिन्नो नाम प्रतीयते। अतः सर्वेषां प्रकरणित्वे प्राप्ते अग्निष्टोम एव प्रकरणी अन्ये त
स्यैव गुणविकारा इति ज्ञापयितुमुक्थ्य इत्युच्यते उक्थ्य एतावदेवोपदेशिकमन्यत्सर्वमातिदेशिकमित्य १८८
र्थ इति॥१॥ अथ षोडशी। अथ शब्द आनंतर्यार्थः। षोडशीत्ययं शब्दः शस्त्रवाची। तत्स्तोत्रं तस्य क

तोरपि वाचकः। तत्रैकेनोच्चारणेनोभयमत्र विवक्षितमाचार्येण। तेनायमर्थो गम्यते। यदि षोडशी
क्रतुः स्यात्तदा तृतीयसवने होत्रकशस्त्रानंतरं षोडशी नाम स्तोत्रं भवतीति तस्य विधिरुच्यत इति संबंधः।
असावि सोम इंद्र त इति स्तोत्रियानुरूपौ। अस्मिन्नेव प्रतीके पच्छ इत्यर्थः। आ त्वा वहंतु हरय इति तिस्रो
गायत्र्यः। अत्र छंदोनिर्देशः संव्यवहारार्थः। उपो षु शृणुही गिरः सुसंदृशं त्वा वयं मघवन्नि सकाहच
पंक्ती। पंक्तय इत्यर्थः। यदिंद्र पृतनाज्ये देवा। अस्तु ह्यर्हत इत्योर्विद्वाहतोत्वो। आ धूर्ष्वस्मा इति द्विपदा।
द्विपदावचनं पच्छः शंसनार्थं। ब्रह्मन्वीर ब्रह्मकृतिं जुषाण इति त्रिष्टुप्। एष ब्रह्मा य ऋत्विय इंद्रो नाम श्रुतो
गृणे। विश्रुतयो यथा पथ इंद्र त्वद्यंति रातयः। त्वामिच्छवसस्पते यंति गिरो न संयत इति तिस्रो द्विपदाः। प्र ते
महे विदथे शंसिषं हरी इति तिस्रो जगत्यः। त्रिकद्रुकेषु महिषो यवाशिरं। प्रोष्वस्मै पुरोरथमिति द्वे अति
छंदसौ। अतिजगत्यादीनि छंदांस्यतिछंदः शब्देनोच्यंते त्रिकद्रुकेष्वित्यत्र प्रथमाष्टिः उत्तरे अतिशक्वर्यौ

Indira Gandhi National
Centre for the Arts

प्रोक्षितित्वात् शाक्वर एव तेनातिछंदसा विस्तुच्यते। पंक्तः पूर्वं द्वेधाकारं। अनयोः पूर्वत्वे द्वेधा कृत्वा शंसेत्
१८९ एकैकामर्चं द्वेद्वे ऋचौ कुर्यादित्यर्थः। पंक्तः शंसनेन तत्संपद्यत इति पंक्तद्वस्तुक्तं। एवं चेत्पंक्तः शंसनमत्र सिद्ध
मेव चतुःपादत्वात् तथापि पंक्तद्वस्तुक्तं द्वेधाकारमित्यस्यार्थं चेशंसनविधिपरत्वा शंकानिवृत्त्यर्थं। तेनैता
स्तिस्रः षट् भवंतीति स्तोमातिशंसनकाले षट्पण्याः। उत्तरमनुष्टुप् गायत्रीकारं। अस्यत्वस्य सप्तपदत्वा
द्वैकैकां ऋचमेकामनुष्टुभमेकां गायत्रीं च संपादयतीत्येवमुक्तं। आद्यैश्चतुर्भिः पादैरनुष्टुभस्तिसृभिर्गा
यत्र्यः अनेन प्रकारेणैता अपि च षट् भवंति। प्रयोजनं पूर्ववत्। प्रचेतनप्रचेतयायाद्वि पिवमत्स्व। कतुच्छं
दकृतं वृहत्सुम्न आधेहि नो वसविस्तनुष्टुप्। प्रभवस्त्रिष्टुभमिषमर्चतशार्चत। यो व्यंतीरफाणयदिति त्व
चा आनुष्टुभाः। अस्यानुष्टुभवचनस्य पूर्वोक्तप्रयोजनस्यासंभवादन्यदुच्यते निविदं तिपतौ सत्सामन्यासि १८९
न्नप्यानुष्टुभ एव तच्चेनिविद्वपसेत प्रयोजनं न जागतसवनछंदस्केतत्वहति। तेनैतत्साधितंभवति। यत्र

छंदो निर्देशमंतरेण सवनविरुद्धछंदसि सूक्ते निविद्विहितास्यात्तत्र तस्मिन्निविदंतिपतौ सत्यां सवनछंद
स्कमेव नसूक्तमाहर्तव्यं नातिपन्न निविस्त्सूक्तसमानछंदस्कमिति। उत्तमस्या नमां शिष्टा त्तमां निविदं दध्या
त्। उत्तमां शिष्ट्वेतदेकां शिष्ट्वा सनैनैव सिद्धं पुनर्वचनं निविद्धानीयो त्र तत्व एव नसूक्तमिति ज्ञापनार्थं। तेना
त्र निविदंतिपन्नो तत्व एवान्य आहर्तव्यो न सूक्तमिति सिद्धं। उत्तमां निविदमिति प्रसिद्धानुवादः। तस्य प्रयोजनं स्वा
ध्यायकाले प्यस्याः शाखाया अंते निविदः पठितव्या इति। लिंगैः पदानुपूर्व्या ख्यास्यामो मत्स्वदहिरत्रमपां
जिन्वदुदार्यमुधां दिविसमुद्रं पर्वतां इह। अस्या निविदः पाठविप्रतिपत्तौ स सामर्विच्छिन्न संप्रदायागत पाठप्र
दर्शनार्थोयमुपदेशः। उद्धद्भप्रस्यपिष्टपमिति परिधानीया। एवा ह्येवे वाहीदं। एवा हि शक्रो वशी हि शक्र इति
जपित्वापाः पूर्वेषां हरिवः सुतानामिति यजति। जपित्वा यजतीति वचनादुत्तरत्र च याज्या संसर्गदर्शनाद्याज्यांग
मयं जपो न शस्त्रांग जप इति गम्यते। तेनात्र शस्त्राजपठक्यं वाचीद्रायदेवेभ्य इत्ययं भवति। तदनंतरमेवा हीति

मंत्रमुक्थायजति॥२॥ विहृतस्येंद्र जुषस्व प्रवहायाहि शूर हरीइह। पिबासुतस्य मतिर्न मध्वश्चकानश्चारुर्मदा
१९९ य। इंद्र जठरं नव्यं न पृणस्व मधोर्दिवो न। अस्यसुतस्य स्वर्णोप त्वा मदाः सुवाचो अस्थुः। इंद्र तुराषाण्मित्रो
न जघान वृत्रं यति र्न। बिभेद वलं भृगुर्न ससाहे शत्रून्मदे सोमस्य। श्रुधी हवं न इंद्रो न गिरो जुषस्व वाजी नाइं
द्रसयुग्भिर्दिद्युं नमस्त्वा मदाय मदे रणाय। आ त्वा विशंतु कविर्न सुतास इंद्रत्वष्टा न। पृणस्व कुक्षी सोमो ना विद्धि
शर्धियाहि यानः। मा धुर्नगृभ्णुर्भुर्नास्ति वशः रश्च मसोन। या ते व भीमो विह्नुर्न त्वेषः समस्तु क्रतुर्नैतिस्तो
त्रियानुरूपौ। विहृतस्य षोडशिन इंद्र जुषस्वेत्यादिना अत्रैवाम्नाताः षडृचस्तो। त्रियानुरूपौ भवतः। तेन पूर्वोक्त
व विहृतस्येति गम्यते। ऊर्ध्वं स्तोत्रियानुरूपाभ्यां तदेव शस्यं विहरेत्। अत्र द्वावर्थौ विधीयेते शंस्तव्यमेतावदेताव
द्विहर्तव्यमिति। एवदुक्तं भवति। विहृतस्य स्तोत्रियानुरूपाउक्तौ ताभ्यामूर्ध्वमविहृतेन छंसं तदेव शंस्तव्यं। स्तो १९०
त्रियानुरूपौ तु प्रसाम्नानान्निवर्तेते इति। एवं शस्य प्राप्तिरेकोऽर्थः। अपरस्तु विहृतस्येत्यधिकृतस्य वचनात्सर्वत्र वि

हरणे प्राप्ते ऊर्ध्वं स्तोत्रियानुरूपाभ्यामिति विहरणस्य विषयो नियम्यत इति। अत एतौ स्तोत्रियानुरूपौ नास्माभिर्वि
हर्तव्यौ विहृतावेव पठितव्यौ नाचार्य इति गम्यते। तदेतदुक्तं ब्राह्मणे। तद्यदिना नदं कुर्युरित्यादिना विहृतानुस्तु
वृत इत्येवमेतेन। विहरणस्वरूपमाह। पादान्यवधायार्धर्चशः शंसेत्। द्वाभ्यां पादाभ्यामनर्धर्चौ तेऽथ व्यवसानं भ
वेत्। तत्र अन्तर्गतेऽपि प्रणव इत्येवमर्थं अर्धर्चश इति वचनं। पूर्वासां पूर्वाणि पदानि। एतदेवास्मिन्नर्थे सिद्धे पु
नर्वचनं गायत्र्यः पंक्तिभिरित्यत्र पंक्तिपदानां पूर्वं प्रयोगे द्वयोरेवाव्यवधानं भवति गायत्रीणां इक्रमानुसारेण त्र
याणामव्यवधानं स्यात्। तदापादान्यवधायेत्येतद् दूरोत्सारितमिति पाठक्रमत्यागः स्यात्तन्निवृत्त्यर्थमिदमुच्यते।
गायत्र्यः पंक्तिभिः। विहर्तव्या इति शेषः। पंक्तीनां तु द्वे द्वे पदे शिष्येते ताभ्यां प्रणुयात्। इदं न वक्तव्यं। प्राप्त एवायमर्
थ उच्यते। अभ्यासेन पंक्तिपादसाम्यं गायत्रीपादानां न कर्तव्यमित्येवमर्थं। तेनान्यत्र न्यूनाधिकपादयोर्विहारे
कर्तव्येऽभ्यासेन पादसाम्यमापाद्य पादयोर्विहरणं कर्तव्यं भवतीत्युक्तानां विस्तेत साधितं भवति। उष्णिहो बृहतीभि

Indira Gandhi National
Centre for the Arts

रुक्मिहोतृत्तमान्पादान्नहूं कुर्यात्। अत्र च पादद्विभागे क्रियमाणेऽर्धर्चेनान्युत्तरांगमिति स्मर्तव्यं। चतुरक्षरमाद्यं।
१९१ ततोऽष्टाक्षरमिति शेषः। एवं चतुरो भागान्कृत्वाहूतीपादैर्विहर्तव्यमित्यर्थः। द्विपदाश्चतुर्धा कृत्वा प्रथमां त्रिष्टु
भोत्तराजगतीभिः। अत्र द्विपदाश्चतस्रः सर्वाश्चतुर्धा कर्तव्याः। प्रथमायां सर्वे भागा व्यहेनाव्यहेन चपं चाक्ष
राः उत्तरास्तु चतुरक्षरा भागाः। तत्र च प्रथमां त्रिष्टुभा विहरेत्। उत्तरास्तिस्रो जगतीभिः। द्विभागे क्रियमाणेऽर्धर्चेन
नान्युत्तरांगमिति स्मर्तव्यं। उत्तमायाश्चतुर्थमक्षरं संपूर्वः स्यादुत्तरस्य। उत्तमायां द्विपदायां चतुर्थमक्षरं
तत्प्रथमस्य भागस्यांसंभवति। तदेव द्वितीयस्य चाद्यं भवति। अनुष्टुभमतिछंदःस्ववध्यात्। प्रचेतनेस्येताम
नुष्टुभमतिछंदःसु स्वव धायत्रोसादेत्यर्थः। इत्थमवध्यादित्याह। द्वितीयतृतीययोस्तृतीययोः पादयोरव
सानत उपदध्यात् चेतनेति पूर्वस्यां प्रचेतयेत्युत्तरस्यां। अनुष्टुभः प्रथमे पादे द्विधा कृत्वाधस्तिष्ठीमान्स्याकं १९१
ज्ञात इत्यनयोर्ऋचोस्तृतीयपादावसान उपधायतत्रायस्येत्। प्रचेतनातेति द्वितीयस्यां प्रचेतयेति तृतीयस्या

मित्यर्थः। उत्तरास्वितरान्पादान्षष्ठान्कृत्वानुष्टुप्प्रकारं शंसेत्। उत्तरासु प्रोषुस्मा इत्येतास्वित्यर्थः। इतराननुष्टुभो
द्वितीयतृतीयचतुर्थानित्यर्थः। एतान्पादानुत्तरास्वृक्षु यथासंख्येन षष्ठान्कृत्वा एकैकोऽत्र चं छंदः अनुष्टुभौ कुर्या
त्। ऊर्ध्वं स्तोत्रियानुरूपाभ्यामातो विहृतः। स्तोत्रियानुरूपाभ्यामूर्ध्वं प्रोषुस्मा इत्येतदंतो यः शस्त्रावयवः स विहृ
तो भवति एतावत्येव विहृतत्वसिद्धे विहृतवचनं विहृतधर्मस्य प्रतिगरादेरेतावत्येव नियमार्थं। तेन स्तोत्रियानुरू
पयोर्विहृतयोरपि विहृतप्रतिगरो न भवति। आनुष्टुभानामपि तृचानां विहृतस्य त्वधिकारात् कथंचिद्विहरणं प्रा
मुष्मान्नन्त्रिहृत्यर्थं च। तत्र प्रतिगर ओथामोदैवमदं मदामोदैवोमथेति। एवैतौ प्रतिगरौ तत्रैकवचनं जात्यभिप्रा
यं तत्र ग्रहणं यत्र यत्र विहृतो भवति तत्र तत्रैतौ प्रतिगरौ भवत इत्येवमर्थं। ओथामोदैवमदं मदामोदैवोमथेसे
वमेतो प्रतिगरौ। याज्यां जपेनोपसृजेत्। मिश्रयेदित्यर्थः। तमुपसर्जनप्रकारं स्वयमेव पठति। एवाह्येवाणः
पूर्वां हरिवः सुतानामेवाहीदं। अथो इदं सवनं केवलं ते। एवाहि शक्रो ममद्धि सोमं मधुमंतमिंद्र वशी हि शक्रः

Indira Gandhi National Centre for the Arts

सत्रारंपंजठर आवृषस्वेति। लक्षणत एव सिद्धस्य पुनः पाद प्रयोजनं च पदसंधिषु संध्यं पदक्षरे तस्याप्यहीनाक्षर
१९२ णे सत्यपि ह्रस्वणार्थं प्लुतादि न कर्तव्यमित्येवमर्थं। समानमन्त्रता यो यं विहृतस्य विशेष उक्तः ततोन्यत्सर्वमवि
हृतेन समानमित्यर्थः। स्तोत्रियामनिविदं परिधानीयामाहुत्याहावः। अयमपि विहृतस्यैव विशेषः। आहावनिय
मो नुरूपतदनंतरयोः प्रतिषेध फलः। तेनाविहृतस्य पंचाहावलं भवति। अहृतं षोडशिपात्रं समुपहावं भक्षयं
ति। इदं विहृताविहृतयोः साधारणं षोडशिपात्रमिति शेषणात्। आहृतमिति प्राप्तानुवादः। समुपहाव वचनं
येनैतं भक्षयंति तेषां सर्वेषां परस्परमुपहवयाच्ञन प्राप्त्यर्थं न वषट्कर्तृहोमकर्त्रोरेव परस्परमिति प्रदर्शनार्थं। अ
त्रैते भक्षयितार इत्याह। घर्मे च भक्षिणः। प्रथमं तावद्वषट्कर्तृहोमकर्तारौ घर्मे ये भक्षिणस्ते चेत्यर्थः। मैत्रावरु
णस्त्रय श्छंदोगाः सुब्रह्मण्यवर्जिताः। इंद्रषोडशिन्नोजस्विंस्त्वं देवेषु स्योजस्वंतं मामायुष्मंतं वर्चस्वंतं मनुष्ये १९२
षु कुरु। तस्य त इंद्रपीतस्यानुष्टुप्छंदस उपहूतस्योपहूतो भक्षयामीति भक्षजपः। एष भक्षमंत्रः। इत्येतः षोड

श्रीत्यध्याहारः कर्तव्यः॥३॥ अतिरात्रे पर्यायाणामुक्तः शस्योपायो होतुरपि यथा होत्रकाणां। उक्तः षोडशी। इदा
नीमतिरात्र उच्यते। तस्मिन्नतिरात्रे वक्ष्यमाणो विधिर्भवति। तदधिकारार्थमतिरात्र इति वचनं। वक्ष्यमाणानि द्वा
दश शस्त्राणि पर्याया इत्युच्यंते। तेषामाद्यानि चत्वारि प्रथमः पर्यायः मध्यमानि मध्यम उत्तमान्युत्तम इत्ये
वं नाम विशेषः पर्यायाणां। एषां शस्योपाय उक्तः। तत्र होतुर्होत्रकाणां च यः साधारणः न तत्र विधेयमस्ति यः
पुनर्होत्रकानुद्दिश्य विहितः शस्योपायः स यथा होत्रकाणां भवति होतुरपि तथैव भवतीत्यत्र विधीयते। उक्तग्र
हणमुक्तस्यैवायमतिदेशो न वक्ष्यमाणस्येत्येवमर्थं। तेन निर्ह्रासे होतृसंबंधो नास्तीति गम्यते वक्ष्यमाणत्वादि
ति। प्रथमे पर्याये होतुराद्यां वर्जयित्वा प्रस्तं स्तोत्रियानुरूपेषु प्रथमानि पदानि द्विरुक्त्वावस्येति। प्रथमे पर्या
ये ये स्तोत्रियानुरूपास्तेषामाद्यस्याद्याम्चं वर्जयित्वा अन्यासु सर्वास्वृक्षु प्रथमानि पदानि द्विरुक्त्वा तत्रैवा
वस्यपुरित्यर्थः। पदानीति पादानित्यर्थः। शिष्टे समस्य प्रणवं कुर्वंति। शिष्टो यो पादौ तौ समस्य प्रणवं कुर्वंति।

Indira Gandhi National
Centre for the Arts

ऋगंतेप्रणवविधानं समाम्नातत्वादर्धर्चानां संदेहनिवृत्त्यर्थं। सर्वेसर्वासांमध्यमेमध्यमानि प्रसादायऋगंतैः
१९३ प्रणुवंति। प्रत्यंचस्तोत्रियानुरूपेष्विसनुवर्तते। सर्वइत्युत्तरार्थं। सर्वासामितिहोतुराद्यावने यिल्लेस्पेतन्निवृ
त्त्यर्थंप्रसादायेतिवचनान्मध्यमानिपदानिसकृदुक्त्वावसायतान्येवप्रसाद्यायतेऋगंतानिसंधायऋगंतैःप्र
णुवंतीत्यर्थः। उत्तमास्तूत्तमे। सर्वइतिअत्रसंबध्यते। तदत्राछावाकसंग्रहार्थंभवति। उत्तमेपर्यायेस्तोत्रियानु
रूपेषुसर्वासामृचामुत्तमानिपदानिसर्वेसाछावाकाहिरुक्तातैरेवप्रणुयुरित्यर्थः। चतुरक्षराणि त्वछावाकः।
उत्तमेपर्यायेअछावाकउत्तमेपादेअंततश्चतुरक्षराणिद्विरुक्त्वाप्रणुयात्। अछावाकस्यपदाभ्यामभ्यासस्त्वा
राभ्यासश्चोभयंविधीयते। तत्रार्थाद्विकल्पोभवति। तत्रतुशब्देनव्यवस्थाविकल्पइत्ययंविशेषउच्यते। यत्र
गायत्र्यस्तत्रपदाभ्यासः। यत्रोष्णिहस्तत्रचतुरक्षराभ्यासइति। चतुःशस्त्राः पर्यायाः। उक्तार्थमेतत्। होतुरा १९३
द्यं शस्त्रंभवतीतिशेषः। त्रिषुपर्यायेष्वेवंभवतिमुख्यत्वादेवहोतुराद्यमेवभवति। वचनप्रयोजनमाद्यशस्त्रस्य

होत्रासंबंधकारणंतथेतरैरितरेषामिति। तेनप्रथमाद्योतेस्वमाद्यो स्वस्वमेवशस्त्रंशंसेयुरित्येतत्साधितंभ
वति। अतिरिक्तंतुचानेनक्रमेणशस्त्रिणां। शस्त्रसंबंधः सिद्धोभव[illegible]ज्याभ्यः पूर्वेपर्यासाः। याज्याभ्यःद
र्वाणियानिप्रतीकानितानिपर्यासस्तान्निभवंति। पांतमायोअंधसोपादुशिप्रथसस्तमुवः सत्रासाहमितिरू
रूपेषोभिस्संमेयनध्वर्यवोभरतेंद्रायसोममितियाज्याप्रवइत्यमादनेप्रकृतान्यजीषिणः प्रतिश्रुतायवोधृष
द्रिति पंचदशादिवश्चिदस्येतिपर्यासः सनोनव्येभिरितिचास्यमदेवरुपर्यासिविद्धानितियाज्यावमनुत्वात
दित्यर्थावयमिंद्रत्वायवोभियावृहत्सायेत्युत्तमासुद्वैदिंद्रोअंममहद्यमाभिन्यस्तुवाचमप्सुधूतस्यहरिवःपिब
इतिमात्यंद्रायमहत्येसुतमिंद्रमिकाथिनोहदेंद्रसानसिमेतोर्धिंद्रस्तवामेशानंमानोअस्मिन्मघवन्निंद्रपिब
तुभ्यंसुतोमदायेतियाज्याः पंतइंद्रसोमोयंतेमानुषेजनउद्धेदभीत्युत्तमासुदेदहंभुवमपाय्यस्यांधसोमदाय
तियाज्यातनइंद्रसुमेनमायद्रवपराबतोनस्तुमंचकाकर्मिस्सष्टावीरवयंतीरहंदोपातासुतमिंद्रोअस्तुसोमंहं

१८५ तावृत्रमितियाज्याभित्वावृषभासुतेभिप्रगोपतिंगिरातन्इंद्रमर्चयथाविदेसत्यस्यसूनुंसत्पतिमितिसक्रेभथ्यावतिशोग्मापीतिंत्वमद्यर्षिमि
सत्रामितियाज्येदंवसोसुतमंधइंद्रेहिमत्स्यंधसःप्रसम्राजमुपक्रमस्यभरध्वघतातदस्मैनव्यमस्यपिवयस्यजज्ञा
नइंद्रेतियाज्येदंद्यन्वोजसामहांइंद्रोयओजसासमस्यमन्यवेविशइतिद्विचत्वारिंशद्विश्वजितेविष्ठाहरीरथआ
युज्यमानेतियाज्यात्वेतानिषीदताभ्राववागहिनकिरिंद्रत्वदुत्तरइत्युत्तमामुद्धरेत्क्रतेदधामीदन्यस्यात्रमिंद्रपान
मितियाज्यायोगेयोगेतवस्तरंयुंजंतिब्रध्नमरुषंयदिंद्राहंप्रतेमहऊतीन्याचीयस्तववीर्यंतेतियाज्येंद्रःसुतेषु
सोमेषुयइंद्रसोमपातमआघायेअग्निमिंधतइतिसप्तदशायइंद्रचमसेष्वासोमःप्रवःसतांप्रोद्रोणेहरयःक
र्मोग्मन्निति याज्या।अत्रमध्येपर्यासवचनमनुत्तमस्यापिपर्यासत्वसिध्यर्थं।पांतमावः।प्रवइंद्रायावय
मुत्वा।इंद्रायमद्वनेसुतं।अमंतइंद्र।आतूनः।अभित्वावृषभासुते।इदंवसो।इंद्रंद्यन्वोजसा।आत्वेतानि
षीदत।योगेयोगे।इंद्रःसुतेषु।एतेत्रयःपर्यायाः।नकिरिंद्रेत्येतस्यादयहणेपिसूक्तमेवउत्तमामुद्धरेदि १८४

तियाज्यशेषात्।इतिपर्यायाः।इत्येतेपर्यायसंज्ञाभवंतीत्यर्थः।पर्यासवर्जंगायत्राः।छंदोनिर्देशःस्तोमाति
शंसनार्थमावापेकर्तव्येगायत्राणामेवावापसिध्यर्थं॥४॥संस्थितेप्याश्विनायस्तुवते।अतिरात्रइत्यनुवर्तते।
आश्विनइतिशस्त्रनाम।पर्यायेषुसमाप्तेषुछंदोगाआश्विनायशस्त्रायस्तुवते।अनेनाश्विनारंभकालोविहितो
भवति।शंसिष्यन्विसंस्थितसंचरेणनिष्क्रम्याग्नीध्रीयेजान्वाच्याहुतीर्जुहुयादग्निरन्नेगायत्रेणछंदसातमस्यां
तमन्वारभेतस्मैमामवतुतस्मैस्वाहा।उषाअश्विनीत्रैष्टुभेनछंदसानामश्यांतामन्वारभेतस्यैमामवतुतस्यैस्वाहा।
अश्विनावग्निनौजागतेनछंदसातावश्यांतावन्वारभेताभ्यांमामवतुताभ्यांस्वाहा।बण्महांअसिसूर्येतिद्वाभ्यामिं
द्रंयोविश्वतस्परीतिच।शंसिष्यन्नितिवचनंप्रतिनिधिप्रवृत्तोपदिशंसेनतदाहुहुयादित्येवमर्थं।विसंस्थितसंच
रग्रहणंसंस्थितेपितिसंस्थितशब्ददर्शनात्संस्थाशंकाप्राप्नोतीतितन्निवृत्त्यर्थं।एताःषडाहुतयः।चत्वारोहोमेमं
त्रसमुच्चयार्थः।तेनाज्यशेषप्राशनंतस्मीमेवभवति।प्राश्याज्यशेषमप उपस्पृश्यान्वाचामेद्धिन्वायतेदेवरथोवा

पयद्धोतानाक्षमद्भिः करवाणीति। होमार्थं पृथक्कृतस्य परिशिष्टं यदाज्यं तस्माच्छ्रीयात् प्राश्य च अप उपस्पृशे
९९५ त्। शुध्यर्थमाचमनं न कुर्यात्। अनाचमने कारणत्वेन श्रुतिरेव दर्शिता। सैषा श्रुतिर्देवरथ इत्यादि। होता देवानां
रथस्तस्य वक्रं च कं जिह्वा अक्षः मम देवरथभूतस्य होतुरक्षभूतां जिह्वामाज्येन लक्तां नाद्भिः प्रक्षालयामीति
श्रुतेरर्थः। अनेन प्रकारेणाशुचित्वमेवात्र नास्तीति गम्यते। प्राश्य प्रतिप्रस्थाय पश्चात्स्वस्य धिष्ण्यस्योपविशेत्स
मस्तजंघोरुरत्निभ्यां जानुभ्यां चोपस्थं कृत्वा यथा शकुनिरुत्पतिष्यन्। प्राश्य प्रतिप्रस्थायेति वचनमस्य प्राश
नस्याशुचित्वकारणत्वाभावादतः सदस्यपि प्राशनमविरुद्धमिति प्रसक्त्यापि प्राश्नीयादिति तन्निवृत्त्यर्थमुच्यते। प
श्चात्स्वस्य धिष्ण्यस्येति वचनं प्रातरनुवाकन्यायविधानाद्धविर्धान उपवेशनाशंकानिवृत्त्यर्थं। जंघा च ऊरू च जंघो
रु। प्राण्यंगत्वादेकवद्भावः। जंघोरु जंघोरू चेति जंघोरुणी ते समस्ते यस्य सः समस्तजंघोरुः। एवंभूतो ऽरत्निभ्यां ९९५
जानुभ्यां चोपस्थं कृत्वा भूमिमाश्लिष्येत्यर्थः। पादांगुलीभिश्च भूमिमाश्लिष्यैवमुपविशेत्। एवमुपविष्टः शकु

निरिवोत्पतिष्यन्भवति। एतदासनं शस्त्रादौ य आहावस्तदुच्चारणसमकालमेव नोपविष्टात्। एतेन शकुनिरिवो
त्पतिष्यन्नात्युपवीतेति श्रुतिवचनाल्लभ्यते। उपस्थकृतस्तत्राश्विनं शंसेत्। उपस्थकृत इति यथा प्रकृतमुपविष्ट इत्य
र्थः। आश्विनाधिकारे पुनराश्विनग्रहणं आहावादूर्ध्वं सर्वमाश्विनं उपस्थकृत एव शंसेत् इत्येवमर्थं। तेन शकु
निरिवोत्पतिष्यन्निति वचनं प्रथमाहावस्यैव न परिधानीयाहावस्येत्यवगम्यते। अग्निर्होता गृहपतिः स राजेति प्रति
पदेकपातिनी पठः। प्रतिपद्वचनं ब्राह्मणोक्तस्य प्रतिपदंतरस्य निवृत्त्यर्थं। एषैव प्रतिपद्भवतीति। प्रतिपद्वचनात्स्व
स्वार्धर्चशंसनप्राप्तौ तन्निवृत्त्यर्थमेकपातिनी पठ इत्युच्यते। एतयाग्नेयं गायत्रमुपसंतनुयात्। एतया प्रतिपदा
प्रातरनुवाकार्थस्य समाम्नायस्याग्नेयं गायत्रं यत्तदुपसंतनुयात्। तेनापो रेवतीरिति इत्यमृद्भवति। आग्नेयमिते
तावत्तेव सिद्धे गायत्रमिति वचनमाग्नेयस्य गायत्रस्य कृत्स्नस्य शंसनार्थं। प्रातरनुवाकन्यायेन तस्यैव समाम्ना
यस्य समाम्नायमसौ रतोः शंसेत्। प्रातरनुवाकन्यायेनेति सप्तछंदसः स्तोत्रग्रहणं नान्यैराग्नेयं गायत्रं यथास्या

Indira Gandhi National
Centre for the Arts

नभ्युपाणिमांगलानि ईळे द्यावी यमावर्तयेदातमसोपघातादित्येवमादिः शस्त्रविषयोन्यायोतिदिश्यते। नकूर्दवि
१९६ षयउत्सर्पणादिः। स्वरस्तुतृतीयसवनत्वादुत्तमएव। तस्यैवसमाम्नायस्येतिप्रातरनुवाकार्थस्येत्यर्थः। सहस्राव
ममितियस्यशस्त्रस्य ऋचांसहस्रमवसामात्रात्सहस्रावममित्युच्यते। तदुदयात्प्रागेवशंसेत्। उदयोनामादित्य
मंडलदर्शनमात्रमदर्शनंअनुदयः। तेनात्राभिन्निधेरसंभवान्मर्यादैवगृह्यते। तेनोदितेयच्छस्यंतद्गर्भितेवस
हस्रावममित्युक्तंभवति। बार्हताग्न्यस्तृचास्तोत्रियाः प्रगाथावातामुरस्तादनुदैवतंस्वस्यछंदसोयथास्तुतंशंसे
त्। बार्हताबृहतीछंदस्कानामतेत्रयस्तृचाभान्युषोश्विदेवत्याः संधिसाम्नः स्तोत्रियाश्छंदोगैः क्रियंतेबार्हताश्चप्र
गाथास्तामस्तृचाश्चगाथान्वायथादैवतंबृहतीछंदसः पुरस्ताद्यथास्तुतंशंसेत्। सर्वमन्यद्यथास्तुतमित्यनेनैवसिद्धे
पुनर्यथास्तुतवचनमत्राम्नातानांयथास्तुतत्वेनस्वस्यछंदसः पुरस्ताद्यथादैवतंशस्तानांपुनः स्वस्यस्थानेशं १९६
सननिवृत्त्यर्थं। येष्ववान्येषु। अन्येषुवायेषुकेषुचिछंदःसुपरिस्तुयुः तथापियथादैवतंस्वस्यछंदसएवपुर

---

स्ताच्छंसेयुरित्यर्थः। पंक्तोद्विपदाः। द्विपदाः पंक्तिः शंसेत्। अत्रद्विपदानांबहुत्वासंभवात्सर्वार्थोयंविधिरित्यवग
म्यते। उपसंतनुयादेकपदाः। एकपदाः पूर्वेणप्रणवेनोपसंतनुयात्। ताभ्यश्चोत्तराः। ताभ्यएकपदाभ्योयाउत्तरा
ऋचः ताश्चएकपदांतगैः प्रणवैरुपसंतनुयात्। एकपदानामप्यत्रबहुत्वासंभवादयमपिविधिः सर्वार्थएव।
एकपदाद्विपदानांप्रातरनुवाकेदृष्टस्योपसमासस्यापवादार्थोयंयत्नः। विछंदसउद्धरेत्। विछंदसोविरुद्धश
स्यछंदसः ताश्चैवंप्रकारावेदितव्याः। अर्धर्चशस्येषुपच्छःशस्याः। पच्छःशस्येषुचार्धर्चशस्याइतिताउद्ध
रेत्। अपिवातेन्यायेनशंसनं। अपिवानैवोद्धारः कर्तव्यः तन्न्यायेनस्वकन्यायेनशंसनमुद्धारोवेतिविकल्पइ
त्यर्थः। एवंविकल्पेप्राप्ते अर्धर्चशस्यगतानांपच्छःशस्यानांस्वकन्यायेनार्धर्चशंसनमविरुद्धंक्वचिद्दृष्टत्वा
दिति। नत्वोद्धारन्यायशंसनयोर्विकल्पउपपद्यते। एवंपच्छःशस्यगतानामपिअर्धर्चशस्यानामुद्धारपच्छःशंसन
योर्विकल्पप्राप्तेतंनिवृत्त्यर्थमाह। ननुपंक्तोन्यास्त्रिष्टुब्जगतीभ्यः। अत्रायंविशेषः। पच्छःशस्यगतानामर्धर्च

Indira Gandhi National
Centre for the Arts

शस्त्राणां पङ्क्तिः शंसने कर्तव्ये त्रिष्टुब्जगतीभ्यामन्यया ऋचा त्रिष्टुब्जगतीस्तु क्रमध्यगतास्ताः पङ्क्तेन शंसितव्या इ
१९७ त्यर्थः। कथं तर्हि तासां कर्तव्यमिति उद्धारस्तच्छंदोन्यायेन वा शंसनं। एतदुद्धारवचनेन स्तुक्तन्यायशंसनवचनं चाश्वि
न एव त्राण्ये। अन्यत्र सर्वत्र तच्छंदोन्यायशंसनमेवेति सिद्धं। विच्छंदस उद्धरेत्। अपि वा तन्न्यायेन शंसनं। एवं वान
योः सूत्रयोरर्थः। प्रातरनुवाकार्थे समाम्नायेगायत्र्यादिवचनेषु सत्स्वपि तासां स्वरूपत एव गायत्र्यादित्वे सिद्धे
पुनर्गायत्र्यादिवचनमाश्विने गायत्र्याद्युत्तरभूतानामन्यच्छंदसामुद्धारार्थमिति मन्यमानो विच्छंदस इत्युक्तवा
नाचार्यः स्वयमेव। एवं प्राप्ते आह। अपि वा तन्न्यायेन शंसनं। अपि वेति पक्षव्यावृत्त्यर्थः। नैव गायत्र्यादिवच
नादेवोद्धारः कर्तुं शक्यते। तत्र प्रकरणे उद्धारवचनाभावात्। गायत्र्यादिवचनस्य श्रुत्यनुवादत्वेन प्रायिक १९७
त्वसंभवाच्च। अतस्तासां तन्न्यायशंसनं कर्तव्यं। तत्र यासां स्तुक्तन्यायशंसनमुपपद्यते तासां तथा भवति। या
सामेवं न संभवति तासां छंदोन्यायशंसनमिति सिद्धं भवति। पांक्तेनोदिते सौर्याणि प्रतिपद्यते। उदित आ

दित्ये प्रतिप्रियतममित्यस्योत्तमेन प्रणवेन सूर्यो नो दिव इत्येतत् संधाय तदादीनि सौर्याणि सूक्तानि शंसेदित्यर्थः
। उदिते सौर्याणीत्यनेनैवास्मात्प्राक् अनुदयात्प्रागेवेति सिद्धं पदोदितोः शंसेदिति वचनेन तस्येतत्प्रयोजनमोदितोः
शंसेद्देवनोपरमेदिति। तेन केचिदावीपावर्तनेनान्येन वा ओदयादनुपरमन् शंसेत्। अथ मेवार्थे भगवतापस्तंबे
नोक्तः। यस्याश्विने शस्यमाने सूर्यो नाविर्भवति सर्वा अपि दाशतयीरनुब्रूयादिति। सौर्याणीति वचनमेषां च
तुर्णां सूक्तानां सौर्याणीति संज्ञाकरणार्थं। तेनैतानि दिवेवाध्येतव्यानि। सौर्याणि सूक्ते एतान्येव प्रस्तोतव्यानि चेति।
सूर्यो नो दिव उदु त्यं जातवेदसमिति नव चित्रं देवानां नमो मित्रस्य। इंद्र क्रतुं न आभरभित्वा शूर नोनुमो वहवः सू
र्यो वृक्षस इति प्रगाथाः। मही द्यौः पृथिवी च न इत्येते द्यावापृथिवी विश्वशंभुवा। विश्वस्य देवी मृचयस्य जन्मनो
नयारोषाति न ग्रभदिति द्विपदा। द्विपदावचनं पङ्क्तिः शंसनार्थं। बृहस्पते अति यदर्यो अर्हादिति परिधानीयापरि
रिधानीयावचनं विस्पष्टार्थं। प्रतिपदं परिधानीयायाद्याहावः। प्रतिपद्यमान आहावो विधीयते। अनुचराभावा

Indira Gandhi National
Centre for the Arts

११८ न्च त्ला भावात्र्चनेयं लाक्षणिका प्रतिपत्तिः। परिधानीयायाविधाने प्रगाथस्तोत्रिये बाहावनिवृत्त्यर्थं। बृहत्साम्नेवे
नस्य योनिं प्रगाथेषु हृतीयांत्त तीयायासंधिस्तोत्रे रथंतरं सामेत्युत्सर्गः। तत्र यदि बृहत्सामकुर्युस्तदा तस्य बृह
तो योनिं त्वामिद्धि हवामह इति हृचमेतेषु प्रगाथेषु हृतीयामिंद्र क्रतुमित्यस्याः परिष्टान्नीयामभिलेत्यस्योपरि
ष्टादित्यर्थः। एतयोरन्यतरस्मिन्क्रमे शंसेत्। नवा। कृतेपि बृहत्सामनि बृहतो योनिं न शंसेदित्यर्थः। आश्विनेन
ग्रहेण सपुरोळाशेन चरंति। आश्विनेनेत्याश्विदेवत्येनेत्यर्थः। ग्रहेणेति प्रदर्शनार्थं। ग्रहेण वा चमसेन वा सपुरो
ळाशेन चरंतीत्यर्थः। इहेसोमासस्त्रिरो अन्ह्यासस्ती ब्रास्त्रिसंति पीतये युवभ्यां। इति विष्मतानाससार्थेनायातमु
पभूषतं पिब ध्याइत्यनुवाक्या होता यक्षदश्विना सोमानां तिरो अ — नामिति प्रैषः प्रगांध्यासिमद्यान्यस्तु रु
भा पिबतमश्विनेतियाज्या अध्वर्युमनवानं। अत्राप्यचौरेवाहुतिनयाज्या कार्यस्य। अत्राश्विनेनेति देवतावि ११८
धानेनेमं शस्त्रयाज्येति ज्ञापनार्थं। यद्येतस्य पुरोळाशस्य स्विष्टकृता चरेयुः पुरोळाशमन्नेयं चतोग्नेर्हृधानमा

ङु तिमिति संयाज्ये। इत्येतोतिरात्र इति शेषः॥५॥ यदि पर्यायानभिमुक्ले सर्वेभ्य एकं संभरेयुः। एवं तावच्चतु
र्विधः सोमयागो ज्योतिष्टोमाख्य उक्तः। तस्यैव विशेषमुपरिष्टाद्वक्ष्यति। अत्रांतरा केपर्यायाश्विनप्रसंगेन ते
षां नैमित्तिकमपि वक्तुं प्रारभते। यदि पर्यायानभिमुक्ले दिति। अस्यायमर्थः। यदा सर्वे पर्यायाः प्रयुक्ता न भवंति।
यद्येवमाशंकास्यादतिक्रांतप्राया रात्रिः सा पर्यायाणामाश्विनस्य चापर्याप्तेति तदा सर्वेभ्यः पर्यायेभ्यः एकं प
र्यायं संभृत्य कुर्युरित्यर्थः। एतमेवार्थं विवृणोति। प्रथमाद्धोता द्वितीयान्मैत्रावरुणो ब्राह्मणाछं — चोत्तमाद
च्छावाकः। प्रथमात्सर्याप्राद्धोतास्यं शस्त्रमाददीत। मैत्रावरुणब्राह्मणाछंसिनौ द्वितीयात्स्वेशस्त्रे उत्तमादि
तरः स्वमेव शस्त्रमिति। द्वे वे द्वौ प्रथमाद्वा उत्तमात्। प्रथमः पर्यायः प्रयुक्तः मध्यमोत्तमावप्रयुक्तौ तयोरा
श्विनस्य चापर्याप्ता रात्रिरित्याशंकास्यात्तदेवं कुर्युः। द्वौ होतृमैत्रावरुणौ प्रथमाद्ब्राह्मणाछंस्यच्छावाकावुत्त
मादिति। अत्र प्रथमादिति वचनमप्रयुक्तयोरेव प्रथमान्मध्यमादित्यर्थः॥ अत्र द्वयोरधिकृतत्वादित्यस्य हि

Indira Gandhi National Centre for the Arts

तीयत्वेप्युत्तमशब्दप्रयोगादन्यत्रापिद्वयोरंत्यस्योत्तमत्वं साधितंभवति। तेनान्यत्राप्युत्तमादित्ययंविधिर्द्विरा
१९९ त्रेप्यंतेभवति। अपिवासर्वेस्युःस्तोमनिर्ह्रासाः। अपिवासर्वेस्तोमानिर्ह्रासाभवेयुः नसंभरणमिति। सर्वत्रचनद्वयो
रुक्थयोर्द्वयोरभिप्लुत्योः संभरणनिरपेक्षः अयंस्तोमनिर्ह्रासोहोत्रकाणामेवभवति। नहोतुरित्युक्तं। उक्तः शस्योपा
यद्यत्रउक्थग्रहणेनस्तोमनिर्ह्रासादयेनेनैतद्विधीयते। पूर्वेपंचदशास्तोमाः संतः पंचदशास्तोमानुवर्त्स्युरिति होतु
स्तुपंचदशास्तोमाएवसर्वत्रस्तोमनिर्ह्रासेसत्येवंशस्यनिर्ह्रासइत्याह। ऊर्ध्वंस्तोत्रियानुरूपेभ्यः प्रथमोत्तमौस्त
वौछंसेयुः। स्तोत्रियानुरूपौत्ववयथापूर्वंभवति। तेभ्यऊर्ध्वंयच्छस्यमस्तितस्यादितस्त्वचान्तस्तौसुर्वंतत्र्यः।
तदेवंचत्वारस्तृचाभवेयुः। एतस्माणानिहोत्रकशस्त्राणिभवेयुः। होतुस्तुपूर्ववदेव। निर्ह्रासएवैकस्मिन्नह
र्द्वयोरभिप्लुत्योः संभरणनिर्ह्रासयोर्विकल्पइत्युक्तः। अत्रसंभरणस्यासंभवेनिर्ह्रासएवैकोविधीयते। अथवा १९९
रणवचनंअस्मिन्पक्षेनिर्ह्रासएवअसाधारणोधर्मइतिज्ञापयितुं। तेनोत्तरसत्रेविहितंहोतृवर्जंनसंभरणम

व्युष्टिषुसाधारणंभवतिनानंतरायामेवाभिप्लुत्यो। होतृवर्जमित्येके। एकेशाखिनोहोतृवर्जमेवनिर्ह्रासंकु
र्वंति। आश्विनायैकस्तोत्रियोग्नेविवस्वदुषसइति। इदंचाभिप्लुत्यनिमित्तमेव। तेपुरस्तादनुदैवतंस्वस्वछं
दसोयथास्तुतंशंसेत। तस्तोत्रियमाग्नेयक्रतौबृहतीछंदसःपुरस्तात्सकृच्छंसेत्। अनुदैवतमितिनात्रवीप्सा
विवक्षिता। यथास्तुतमितिपूर्ववदेव। त्रीणिषष्टिशतान्याश्विनं। आश्विनोद्देशेनास्याः संख्यायाः विधाना
त्तत्रितयस्मांगलसौर्यादीनिचतस्यामेवसंख्यायामेतर्भवंतीत्यवगंतव्यं। प्रायश्चित्तप्रसंगादन्यान्यपिसोमप्रा
यश्चित्तान्यत्रैवोच्यंते। विमतानांत्रसवसंनिपातेसंसवोनतर्हितेषुनद्यावापर्वतेनवा। विमताविरुद्धमतयः।
विद्विषाणाइत्यर्थः। प्रसवशब्देनसुत्यालक्ष्यते। नद्यावापर्वतेनवाअव्यवहितेदेशेविमतानामेकस्मिन्नहनिसु
त्यासंनिपातेसतिसंसवोनामदोषोभवतीत्यर्थः। नद्यावापर्वतेनवेत्युभयत्रवाशब्दप्रयोगादन्यदपिव्यव
धायकंशास्त्रांतरोक्तमस्तीतिगम्यते। तच्चशास्त्रांतरादवगंतव्यं। अपोकेंतर्हितेष्वपि। विमतानांनद्यादि

भिरन्ने तर्हि ते क्षितिच विशेषणद्वयमुक्तं तदुभयव्यभिचारायअपिशब्दद्वयेन संमतानामपिसंसवदोषोस्ती
२०० त्येकोर्थः। अंतर्हिते च पिदिशोपसंसवोस्तीत्यन्योर्थः। एवमेके सूत्रकृत आमनंतीत्यर्थः। तथा सति संस्तवादेव
तावाहनात्। एवंसति आसवनदेवतानामावाहनासंस्तवाः कर्तव्या। एतदंतं कर्मकाम्यिकं वाचिकं च तु तयाव्रसा
कर्तव्यमित्यर्थः। लघवश्चोपायाः शतप्रभृत्यादयः प्रयोक्तव्याः। किंच। कया शुभेति च मरुत्वतीये पुरस्तात्सू
क्तस्य शंसेत्। इदं च तस्मिन्निमित्ते कर्तव्यं। मरुत्वतीये शस्त्रे यस्मिन्सूक्ते निविद्धीयते तस्य सूक्तस्य पुरस्तादिदं सू
क्तं शंसेत्। चशब्दो निविद्धानीयत्वसमुच्चयार्थः। तेन तस्य मरुत्वतीयस्य पूर्वावस्थायामेकसूक्तत्वेऽनेकं चे
त्ययमेवाहावद्वयमाहावः कयाशुभीयादौ भवति। द्व्यादिसूक्तत्वे कयाशुभीयस्यानाद्यत्वादस्यादौ न भ
वति तत्र सर्वेषामाद्ये भवति आहावः। योजातएवेति निधेयत्वे। चशब्दः पुरस्तात्सूक्तस्येति चानुवर्तते। तेना
त्रापि पूर्ववदेवार्थो योजनीयः। मम अग्ने वर्च इति वैश्वदेवसूक्तस्य। अत्रापि पदत्रयमनुवर्तते। वैश्वदेवशस्त्रे वै २००

श्वदेवसूक्तस्य पुरस्तादित्यर्थः। अपि वैते ष्वेव निविदो दध्यादुद्धृते ष्वितराणि। अपि वा एते ष्वेवागंतुषु निविदो द
ध्यात्। येभ्यः पुरस्तादिमानि सूक्तानि विहितानि तान्युद्धरेत्। पूर्वेषां निविद्धानसूक्तानामुद्धारसंयोगेनैतेषु
निविदो दध्यादिति पक्षद्वयमेतत्। यस्मिन्निविद्धीयते तस्यानवधानेन पुरस्तादेतानि भवंति न निवि
द्धानीयानां पुरस्तादिति। स्थाने चेन्निविदोऽतिहरेन्माप्रगामेति पुरस्तात्सूक्तं शस्त्वान्यस्मिंस्तद्देवते दध्यात्। निवि
दः स्थानं पद्यत इति हरेत्। यस्मिंस्त्वे निविदति पन्ना तत्सर्वापरभूतं समाप्यागंतुकान्तद्देवतान्पुरस्तान्माप्रगामे
तीदं सूक्तं भरद्वाजेति शस्त्वान्यस्मिन्नागंतुके तद्देवते तां निविदं दध्यात्। निविदस्थानातिहारो नामैवं रूपः। सूक्तस्य
यस्मिन्नंतराले निविद्धीयते तस्याद्यापर्वा ऋकं तरं तगतेन प्रणवेनाहावमकृत्वैवानंतरामेव ऋचं संधाय तस्या
मर्धर्चोदिते वसानेऽवसानपर्यंतमुक्त्वा यदावस्येत्। एवं प्रकार एव निविदतिहारो नान्यप्रकार इति। अतोन्यथा
यः प्रमादः स ऋग्दोष एव न निविदतिहारः। पुरस्तादुद्धृत्वनं माप्रगामीयस्य पुरस्तादनिपं न निविल्के सम्माप्रगा

Indira Gandhi National
Centre for the Arts

मीमंसा(?)स्त्वान्य तद्दैवतमानीयतस्मिन्निविद्देमेसेवमर्थः सूक्तग्रहणं बृहस्पतिसयादिष्टुपितीनस्तोमेष्वमाग्र
२१ गामीयस्या(?)सेडनार्थः अत्र किंचिदुच्यते। यदि पर्यायानित्यत्र पर्यायानितिकर्मप्रवचनीययुक्ते द्वितीया। अभी
तिकर्मप्रवचनीयो लक्ष्यलक्षणसंबंधद्योतकः। उक्तिर्विवादे पूर्वं। संभावनायां लिङ्। अत्र पर्यायाः लक्षणं व्यु
ष्टिर्लक्ष्या। एतदुक्तं भवति। यदि पर्यायोपक्रमे तेषु वा शस्यमानेषु उषःकाल आगच्छेत्तदा वक्ष्यमाणं नैमित्तिकं
कर्म कर्तव्यमिति॥६॥ सोमातिरेके स्तुतशस्त्रोपजननं। सोमातिरेको नाम सवनार्थो यः सोमः स सवने परिसमाप्ते
यद्यतिरिच्येत। तदा सोमातिरेक इत्युच्यते। तदा स्तुतशस्त्रयोरुपजननो भवति। छंदोगैः स्तोत्रमस्माभिः शस्त्र
मित्यर्थः। प्रातःसवने त्वितो मो अयं सुतो गोर्धयति मरुतामिति स्तोत्रियानुरूपौ महांइंद्रो य ओजसा नो देवा अव
तु नद्देसं(?) द्राभिर्वैम्नवीभिश्च सोममतिशस्यं स्यायजेत्। पादग्रहणं पंद्राभिर्वैम्नवीभिश्चेति बहुवचननिर्देशा २.१
द्यावदर्थं सुभयोगृहीतयोः। ऐंद्राभिर्वैम्नवीभिश्चेति च शस्त्रसामर्थ्यात्समुच्चिताभिरेवोभयीभिः सोमातिरेक

निमित्तं सोममतिशस्य एकया द्वाभ्यां वा प्रातःसवने ऽपरिमिताभिरुत्तरयोः सवनयोरित्यनेन न्यायेन। यथा क
थाचिदैंद्राग्नमायजेत्। प्रातःसवनत्वाद्वायव्येतिविशेष्यते। वैष्णव्या वा। गायत्र्येति शेषः। ऐंद्रावैष्णव्येति गा
णगारिदैवतप्रधानत्वात्। यद्यैंद्रावैष्णव्या वा यजेत तदा यथायाव शस्त्रमेवं याज्यस्ते तद्विरुध्येत। अथ यद्यैंद्रा
वैष्णव्या यजेत तदा तद्देवत्याया गायत्र्याः अभावात् गायत्र्यं प्रातःसवनमित्येतद्विरुध्येत तत्रैकस्य त्यागे सति छंद
एव सक्तव्यं। बहिरंगत्वादप्राधान्यात्तस्येति देवतायास्त्वभिधेयत्वादंतरंगतेति मन्यमानो गाणगारिदैवतप्रधानत्वादि
सुकृतान्। संवां कर्मणा समिषा हिनोमीति। सैषा ऐंद्रावैष्णवी त्रिष्टुप् भनये वयष्टव्यमितिसिद्धंतितं। माध्यंदिने व
म्नद्दा अग्निमर्वोदुसयद्वर्शतं व पुरितिप्रगाथौ स्तोत्रियानुरूपौ। महां इंद्रो नृवदि त्योर्नुकं यो विश्वा सां जनिता रामतीना
मिति याज्या। ऐंद्राभिर्वैम्नवीभिश्चेत्याद्यत्राप्यनुवर्तते। अतो हीनपादग्रहणमत्राक्षरलाघवार्थमेव न कृत्स्नस्व
स्वग्रहणार्थं। तृतीयसवन उत्तरोत्तरां संस्थामुपेयुरानिराकात्। तृतीयसवने यदि सोमोतिरिच्येत तदा उत्तरोत्तरां

Indira Gandhi National
Centre for the Arts

संस्थां कुर्युरतिरात्रात्। एतदुक्तं भवति। यद्यग्निष्टोमे तृतीयसवने तिरेकः स्यात्तदोक्थ्यं कुर्युः। यद्युक्थ्ये षोडशि
२.२ नं। यदि षोडशिन्यतिरात्रमिति। यद्यतिरात्रे तत्र वक्ष्यतीति। एवं चेदतिरात्रादिति वचनमुत्तरोत्तरां संस्थामित्यत्र
संनिहितारेव चतस्त्रः संस्थाः ग्राह्या इत्येवमर्थं। इतरथाग्निष्टोमेतिरेके त्वग्निष्टोमः प्रसज्येत। षोडशिनि
वाजपेयः अतिरात्रे प्तोर्याम इत्येतन्निरस्त्यर्थमातिरात्रादित्युक्तं। अतिरात्रे त्वत्र तत्ते अग्निशिपिविष्टनाम्नप्रत
द्दिष्णुस्तवते वीर्यंणेति स्तोत्रियानुरूपौ माध्यंदिनेन शेषः। महां इन्द्रो नृवदित्यादिर्याज्यातः शेषमिष्यते। त्वंष
मित्या समरणं शिमीवतोरिति याज्या। इयं याज्या माध्यंदिनोक्ता भवति। अत्ग्निष्टोमवाजपेयाप्तोर्यामेषु तृ
तीयसवनेषु सोमातिरेके इदमेव शस्त्रं भवति। सोमातिरेकादन्येन वा निमित्तेन शस्त्रान्तरोक्तेन यदि स्तुतशस्त्रो
पजननः स्यात्तदाप्यनेनैव सोमातिरेकोक्तेनानुसवनं शस्त्राणि संपादनीयानि। स्तोत्रियस्तु स्तुतएवदनुसारेणानु ३.२
रूपः कल्पनीयः। एतच्च सोमातिरेकप्रातःसवनेस्ति सोम इत्येतावतैवास्यार्थस्य सिद्धेः संस्तुतशस्त्रोपजनन इत्यस्माद्

वचनाल्लभ्यते। एतदुक्तं भवति। यत्र यत्र नैमित्तिकः शस्त्रोपजननस्तत्र तत्रानुसवनमेतेन विधानेन शस्त्राणि कल्प
नीयानि। स्तोत्रियानुरूपौ छंदोगप्रसयनदनुसारकल्पनाभ्यामिति॥ ११॥ क्रीते राजनि नष्टे दग्धे वा। प्रायश्चित्तं व
क्ष्यत इति शेषः। नष्ट इत्युक्ते नाशप्रकारविशेषाग्रहणात् सर्वप्रकारो नाशोग्रहीतो भवति किमर्थं दग्धवचनमिति। त
स्य प्रयोजनमुच्यते। लतावस्थे सोमे छदनाभ्यो नसारुक्तादिभ्यो मलेभ्यो न्यन केशकीटादिना दुष्टेनस्य सागोनक
र्तव्य इत्येवमर्थं। अन्यदपि दग्धवचनप्रयोजनमस्ति। केचिदेवं वदंति दग्धे सोमे तदेव भस्माभिषुत्य तेन यज्ञम
तितं निरस्त्यर्थं चेति। सोमनाशे प्रायश्चित्ते रक्षुप्रायेरद आदीनां शालाना दाहे प्रायश्चित्तस्याल्पत्वात्तदेव प्रसं गा
दाह। अपि दग्धानि सदो हविर्धानान्यनावृता क्रियेरन्। अनावृता अमंत्रकमित्यर्थः। आवृतावा। समेन केवलम
न्यायविकल्पोयं। शालास्तावद् दृष्टार्थाः। तेनात्र मंत्रव्यापारः केवलमदृष्टार्थ एव। तस्माद् दृष्टार्थस्याभ्युपगताश
ङ्गप्रधानसंबंधे द्वारमंतेत्यर्थः। स च द्वारभावो दाहात्त्यागेन निर्वर्तेन इति न पुनः क्रियामंत्राणामिति पूर्वः पक्षः। उत्तर

Indira Gandhi National
Centre for the Arts

स्तुपक्षोपकार्यार्थे यद्धस्तपादीयते तस्य तत्कार्यजनने सामर्थ्यजननाय मंत्रादयः संस्काराः प्रयुज्यंते। तद्यदि
२०३ स्वकार्यमकृत्वैव नश्येत्तदा तस्य कथं प्रधानेन संबंधः स्यादिति पुनरभिषवाः प्रयोक्तव्या इति सिद्धं। द्रोणनी
सोमनाशे प्रायश्चित्तमाह। अन्यं राजानमभिषुणुयुः अन्यो राजानमानीय तमभिषुत्य तेन यजेतेत्यर्थः। अनधि
गमे पूतीकान्फाल्गुनानि। सोमानधिगमे पूतीकान्फाल्गुनानि च संस्थाप्याभिषुणुयुः पूतीका नाम लतारूपाः सो
मसदृशाः। फाल्गुनानि नाम स्तंबरूपा ओषधिविशेषाः अप्रसिद्धाः पदार्थाः अभियुक्तेभ्यः शिक्षितव्याः। अन्यावा ओ
षधयः पूतीकैः सह। फाल्गुनानामभावे अन्या वा ओषधयः कुशदूर्वाद्याः पूतीकैर्मिश्रयित्वाभिषोतव्याः। अन्या
ओषधयः पूतीकैः सहेति पूतीकानां स्यापि तद्दर्शनात्पूर्वस्त्रोक्तानामेभिः सहितानामेव प्रतिनिधित्वमवगम्य
ते। अत एवाचार्यः सोमप्रतिनिधानकेवलमेकद्रव्यमिच्छति। अन्यावा ओषधयः पूतीकैरिति सहभावे सिद्धे यत्स २०३
हेति वचनं तत्स्थापयति पूतीकानामप्यभावे द्रव्यांतराणि सह मिश्रयित्वाभिषुत्य तैर्यष्टव्यमिति। प्रायश्चित्तं वाहु

त्वोत्तरमालभेत। उत्तरस्त्रस्य सुत्यावि षयत्वादिदं दीक्षोपसदि विषयं भवति दीक्षासु क्रीतेन श्येदा सोमलाभाद्दीक्षा
वर्धयेत्। उपसत्सूपसदो वर्धयेत्तत्र सर्वत्र प्रधानकालाविरोधेनाहर्वर्धनं कर्तव्यं। अहर्वर्धने क्रियमाणे पिप्र
धानकालाविरोधेनालभ्यमाने प्रतिनिधिमुपादाय पूर्वसंकल्पितकाले प्रधानयागं संपादयेत्। इत्थं वा कुर्यात्।
प्रायश्चित्तं कृत्वाऽथ्यं प्रयोगे विरज्य सोमं संपाद्य तस्मात्एव कर्मणः प्रयोगांतरमारभेत। अस्याहेतीदं प्रायश्चित्तमित्यु
च्यते। अथवास्यामवस्थायां शास्त्रे। तदेप्रायश्चित्तविशेषोक्तिर्न तत्कर्तव्यं सुत्यासूक्तमेवमन्येत। सुत्यासु नष्टे राजनि
तदलाभे उक्तमेव। प्रतिनिधिप्रयोगमेवेत्यर्थः। तत्कर्तव्यत्वेन मन्येतेत्यर्थः। नात्राहर्वृद्धिः प्रयोगत्यागो वा कर्तव्य इ
त्यर्थः। प्रतिधुक्प्रातःसवने। प्रतिधुगिति सद्योदुग्धं पयउच्यते। तस्मात्ः सवने प्रतिनिधिद्रव्यमभिषुत्य तद्द्रसेन
मिश्रयेदित्यर्थः। शृतं माध्यंदिने। क्वथितं पयः शृतमित्युच्यते। तेन मध्यंदिने प्रतिनिधिद्रव्यरसं श्रीणीयात्। दधि
तृतीयसवने। पूर्ववन्मिश्रयेदित्यर्थः। आपतीयं तृत्तसामयदि फाल्गुनानि वा रवंतीयं यज्ञायज्ञीयस्य स्थाने। प

Indira Gandhi National
Centre for the Arts

दिफाल्गुनानिप्रतिनिधित्वेनप्रविष्टानितदैतेसामनीञ्चायंतीयवारवंतीयेब्रह्मसामाग्निष्टोमसामकार्ययोर्भवतो
यथासंख्येन।आयंतीयमेके।एकेशाखिनःआयंतीयंयज्ञायज्ञीयस्यकार्येभवतीत्याहुः।ब्रह्मसामनुप्रकृत्यैवेति।
२०४ एकदक्षिणंयज्ञंसंस्थाप्योदवसायपुनर्यजेत।एवंप्रतिनिधिनाक्रियमाणंयत्प्रयोगमुदवसानीयापर्यंतंसमाप्यत
स्माद्देशादुदवसायसोमंसंपाद्यतमेवयज्ञंपुनःप्रयुंजीत।तस्मिन्सर्वस्यदक्षिणांदद्यात्।तस्मिन्पुनःप्रयोगेनादक्षि
णांदद्यात्।यत्संख्याकाःपूर्वस्मिन्प्रयोगेसंकल्पितास्तत्संख्याकाएवस्यात्।नवैकल्पिकसंख्यांतरयुक्ताइत्यर्थः।पू
र्वस्मिन्प्रयोगएकैवगौर्दक्षिणा।सोमाधिगमेप्रकृत्या।यद्युपात्तेपिप्रतिनिधौयागात्प्राक्यदिसोमोलभ्येततदाप्रति
निधिद्रव्यंत्यक्त्वासोमेनैवयष्टव्यं।प्रतिनिधिनिमित्तानिसोमभक्षणानिचनभवंति।एतच्चैकाहेषु।अहर्गणेषु
तंत्रमध्येउदवसायपुनर्योगोनशक्यतेकर्तुमिति।सर्वाहःसाधारणत्वात्प्रयोगस्य।यदापुनरहर्गणेषुमुख्या २०४
संभवात्प्रतिनिधिनैवैकमहःक्रियतेतदासत्रप्रयोगंसमाप्यउदवसायतदेवाहःपुनःप्रयुंजीरन्सत्रिणःसंहताए

वा।तदर्थमेवयज्ञंसंस्थाप्येतियज्ञग्रहणंकृतंतस्यायमभिप्रायः।आरब्धोयोयज्ञःफलसाधनंतस्यप्रयोगंसमा
प्येतत्कर्तव्यंनात्रांतरमेकस्याहःप्रयोगमिति।एकाहेषुप्रतिनिधावुपात्तेप्रतिनिधिनैवपुनर्यष्टव्यमेव॥८॥
दीक्षितानामुपतापेपरिहितेप्रातरनुवाकेनुवाकेनुपाकृतेवापुष्टिपतेषुदिक्ष्वक्षुवेचक्षुःप्राणापानप्राणंत्वेत्यनं
वाचेवाचमसंपुनर्देहिस्वाहेतिचस्त्राहुतिंहुत्वाशीतोष्णाअपःसमानीयेकविंशतिमासुयवान्कुशपिंजलांश्चावधा
यताभिरद्भिरवर्थंकुर्वन्तताभिरेनमाप्लावयेन्नीवानामस्थतात्इममुंजीवयतजीविकानामस्थतात्इममुंजीव
यतसंजीवानामस्थतात्इममुंसंजीवयतसंजीविकानामस्थतात्इममुंसंजीवयतेत्योपधिस्त्तेनच।दीक्षितानां
मध्येयःकश्चिद्दीक्षितउपतपेद्व्याधिःपीडेत्यर्थः।तन्नैमित्तिकमुच्यते।परिहितेप्रातरनुवाकेप्रागेवापोनप्त्रीयाभ्यो
देतस्मिन्काले अनुपाकृतेवाप्रातरनुवाकेएतयोरन्यतरस्मिन्कालेपुष्टिपतइत्यनेनब्रह्माहुतिंहुत्वाशीतोष्णाअपो
मिश्रयित्वातास्वेकविंशतिंयवान्प्रक्षिप्यएकविंशतिकुशपिंजलांश्च।धायेताभिरूपतप्तंदीक्षितमाप्लावयेत्स्नापये

Indira Gandhi National
Centre for the Arts

त्। जीवानामस्यान्ते सेचमादिभिश्चतुर्भिर्मन्त्रैर्या ओषधीः पूर्वा जाता इत्येतेन सूक्तेन च सर्वेषां मन्त्राणामंते सकृदेव
२०४ प्लावनं कर्तव्यं न प्रतिमंत्रं। एतत्सर्वं ब्रह्मणा कर्तव्यं। अस्य सूत्रस्यमध्येत। भिरद्भिः सु चतुर्थं कुर्वीत सूक्तं न दोषधि सू
क्तेन चेत्यस्मादुपरिष्टान्नदृष्टव्यं। तत्र ब्रह्मणः कर्तृत्वाभावात्। अस्यायमर्थः। ताभिरेवाद्भिरुपतप्तस्यावमनव
र्जमुदककार्यं शौचादिकर्तव्यमिति। नस्यक्तौर्ज्वालस्य यमेवा शक्ताव न्योयः कश्चन परिचारकः अतो नात्र ब्रह्मा
नियम्यत इत्युक्त एव। आप्लवनानुमज्जेत्। आप्लावनेप्रकृते पुनः प्लावयितिवचनमाप्लावनानुमार्जन योः स
मानकर्तृकत्वसिध्यर्थं। तेनैतदपि ब्रह्मैव करोति। उपांश्वंतर्यामौ ते प्राणापानौ पातामसाउ पांशुसवनस्ते व्या
नं पातु असावैंद्रवायवस्ते वाचं पातु सौमैत्रावरुणस्ते चक्षुषी पातु असावाश्विनस्ते श्रोत्रं पातु असावाग्रयणस्ते दक्षक्रतू पा
तु असाउक्थ्यस्ते गानि पातु असौ ध्रुवस्त आयुः पातु असाविति। उपांश्वंतर्यामाविसादिभिरष्टभिर्मंत्रैरनुमज्जेत्। अ २०५
सावितिस्य स्थाने उपतप्तस्य नाम संबुध्यागच्छीयात्। प्रथमेनकारिकामनुमज्जेत्। द्वितीयेन सर्वं शरीरं सर्व

शरीरव्यापित्वाद्यानस्य। यस्य मंत्रस्य स्थानविशेषसंबंधो लिंगेनावगतः तेन तद्देशानुमज्जेत्। अन्येन स
र्वशरीरं। यथासनमनुपरिक्रमणं। उपतप्तस्य तस्मिन्कर्मणि कृते ततः सर्वे दीक्षिता यथा स्वमासनमनु
परिक्रमेयुर्गच्छेयुरित्यर्थः। अतो वगम्यते पूर्वस्मिन्कर्मणि क्रियमाणे सर्वे दीक्षिता ब्रह्मणा सहतत्रैवासत इति। आ
तारमिंद्रमविता रथमादिः। इयमकृता तार्क्ष्यस्याग्ना भवति। अनया सहतत्सूक्तमस्मिन्निमित्ते तार्क्ष्यकार्यं करोति। यद्यप्य
न्यदैकाहिकाद्वैश्वदेवं सूक्तमत्रैयेन विदध्यात्। यद्यप्यानो भद्रीयादैकाहिकादन्यत्तस्मिन्नहनि वैश्वदेवं सूक्तं भवति
निविद्धानीयं तदा वैश्वदेवसूक्तं तस्मात्रैयेतच्चैव निविदं दध्यात्। सूक्तत्रैयमुक्तेनत्वचएवात्र गृह्यते तत्वचएवान्यत्र भवि
दर्शनात्। सूक्तात्रैयस्य निविद्धानत्वेन विधानात्तस्मिन्नहनि पूर्वस्य निविद्धानस्योद्धारो भवति। प्रकृत्यागदे। अगदेव्या
ध्यपगम इत्यर्थः। तदानेमे विकाराः कर्तव्या इत्यर्थः। यासंस्थितेः तीर्थेन निर्हृत्यावभृथे प्रेतालंकारान्कुर्वीतासं
स्थिते मृत इत्यर्थः। तस्मिन्नुपतप्ते मृते समुत्तीर्थेन निर्हृत्य निर्गमय्यावभृथार्थं संकल्पिते देशे निधाय प्रेतालंका

Indira Gandhi National
Centre for the Arts

गन्कुर्वंति। येकोकेप्रेतस्यैतेलेकाशाइतिप्रसिद्धास्तेप्रेतालंकारास्तैरलंकुर्युरित्यर्थः। अत्रकिंचिल्लंस्थिते अतीर्थेने
२०५ तिपदच्छेदः निर्दशावभृथे अवभृतार्थोदेश आवभृथस्तस्येदमित्यण्। अथवा अवभृथ इत्येवपदच्छेदे सति अ
वभृथशब्दस्तदर्थदेशेलक्षणयावर्तते। केशश्मश्रुलोमनखानि वापयंति। प्रेतस्यकेशादीनांवापनंकर्तव्यं। न
लदेनानुलिंपंति। नलदोनामद्रव्यविशेषः सत्वाभियुक्तेभ्यः शिक्षितव्यः। नलदेनानुलिंपनेनानुलिंपंति। नलद
मालांप्रतिमुंचंति। मालाचनलदस्यप्रतिमोक्तव्या। निष्पुरीषमेकेकृत्वापृषदाज्येनपूरयंति। प्रेतस्यशरीरेयान्यंत्रा
णितानिनिष्पुरीषाणिकृत्वापृषदाज्येनपूरयित्वापुनः शरीरेबंधयितव्यानीतिमन्यंतेकेचिच्छाखिनः। अहतस्यवा
ससः पाशतः पादमात्रमवच्छिद्यप्रोर्णुवंतिप्रसव्यदेशेनाविःपादं। अहतमनिवसितंवाससोवपनारंभप्रदेशः पाश
इत्युच्यतेसमाप्तिप्रदेशोदशा। पाशप्रदेशेपादमात्रमवच्छिद्यतत्पादमात्रमवच्छेदंनिधायतेनवाससाप्रसव्यदे
शेनप्राक्शिरसंप्रेतमाविःपादंप्रच्छादयंतीत्यर्थः। अवच्छेदमस्यपुत्रा अमाकुर्वीरन्। तदवच्छेदंप्रेतस्यपुत्रा अमा २०५

कुर्वीरन्स्वीकुर्वीरन्नित्यर्थः। अग्नीनस्यसमारोप्यदक्षिणतोबहिर्वेदिदहेयुः। अस्यप्रेतस्यअग्नीन्द्वयोररण्योः
समारोप्यदेवयजनस्यदक्षिणतोबहिर्वेदिप्रेतमानीयाग्निमथित्वाविहृत्यतत्रैवदहेयुः दहनविधिनैव। आहार्येणा
नाहिताग्निं। योनाहिताग्निः सत्रीभवतितस्मिन्मृते अयंविशेषः आहार्येणाग्निनातंदहेयुः। आहार्यशब्देनौपास
नमुच्यते। पत्नींच। दीक्षितस्यपत्नीयदिम्रियेततांचाहार्येणैवदहेयुः। आहार्यशब्देनात्रलौकिकोप्युच्यते। अत्रा
यंविशेषः। येनाहिताग्निनासर्वाधानंकृतंतस्यपत्नींलौकिकेन। यस्यौपासनमस्तितस्यपत्नीमौपासनेन। अतोव
गम्यते। आहार्यशब्देनाश्रौतोग्निर्लक्ष्यतइति। यस्येसाहः समापयेयुः। यस्यसदहनदेशाद्यस्यसर्वापरीभूतमहस्तत्समा
पयेयुरित्यर्थः। प्रातरनभ्यासमनभिहिंकृतानिशस्त्रानुवचनाभिष्टवनसंस्तवनानि। यस्मिन्नहनिदीक्षितदहनं
कृतंतस्मात्परमनंतरमहः प्रातरित्युच्यते। तस्मिन्नहनिशस्त्रादीन्यभ्यासाभिहिंकारवर्जितानिभवेयुः। तत्राभिष्ट
वेत्राख्यं। पर्वमेवाभिहिंकारोनास्तिआद्येचशस्त्रे। तत्राभ्यासमात्रस्यैवनिषेधः। एवमन्यत्रयथासंभवंनिषेधः

Indira Gandhi National
Centre for the Arts

कल्पनीयः। पुरा ग्रहग्रहणात्तीर्थेन निष्क्रम्य त्रिः प्रसव्यमायतनं परीत्य पश्चादुपविशंति। तस्मिन्नेव प्रातरनभ्यास
१०६ मित्युक्तलक्षणे हविर्ग्रहग्रहणात् प्रागेव तीर्थेन निष्क्रम्य त्रिः प्रसव्यमप्रदक्षिणं श्मशानायतनं परितो गत्वा तदायतनं
परित उपविशंति। पश्चाद्धोता। श्मशानायतनादिति शेषः। उत्तरोध्वर्युः। तस्य पश्चाच्छंदोगाः। तस्य ग्रहणमध्वर्योरे
व पश्चाच्छंदोगा उपविशंतिनायतनस्येत्येवमर्थं। ब्रह्मणो दक्षिणत इति सिद्धत्वान्नोक्तं। आयं गौः पृश्निरक्रमीदि
त्युपांशु स्तुवते। आस्तृक्षुछंदोगा उपांशु स्तुवते। स्तुते होता त्रिः प्रसव्यमायतनं परिव्रजंस्तोत्रियमनुद्रवेदप्रणवन्। हो
ताप्रणवं स्तुते छंदोगैस्त्रिः प्रसव्यं श्मशानायतनं परितो व्रजन्स्तोत्रियमनुद्रवेत्। वक्ष्यमाणाश्चक्रुः। उपांशुस्तु
वत इति स्तुता उपांशुत्वविधानं होतुरनुद्रवणेप्युपांशुत्वप्रापणार्थं। स्तोत्रियवचनमप्युपलक्षणार्थं। यासु स्तुवते ता अ
नुब्रूयादिति। शंसनादिचोदनाभावादेव सामिधेनीधर्माभावे सिद्धे पुनस्तोत्रियशब्दसंबंधात्तस्य धर्मप्राप्त्याशंका १०६
स्यात्तन्निवृत्त्यर्थं प्रणवप्रतिषेधः। अथैतदनुद्रवणं किंरूपमिति। अनुमंत्रणमिति ब्रूयात्। प्रेतस्याभिधानमत्रवि

कीर्त्यते। तच्च मंत्रलिंगादवगतं। यामीषु स्पष्टमेवैतत्। सार्पराज्ञीषु चानमेव दिशा प्रेताभिधानं कल्पनीयं। अत्र
च ब्रूयादिति वचनं। अनुद्रवेदित्यनुशब्दसंबंधात्प्राप्यते अनुमंत्रणप्रकारोयमिति। तथा च वक्ष्यति। तं दह्यमानमनुमं
त्रयत इति। तेनानुमंत्रणधर्मा एवास्य कर्तव्याः। यामीश्च। ताश्च इमाश्च तथाभूते न वक्तव्याः। यमेन यामायनेश्चैता
ऋचो दृष्टाः सूक्तं तु यम इष्टं तेनैता याम्य इत्युच्यंते। न यमदेवत्या इति। प्रेहि प्रेहि पथिभिः पूर्व्येभिरिति पंचानामत्ति तीसृ
मुद्धरेत्। मैनमग्ने विदहो माभिशोच इति षट्। पूषा त्वेतश्च्यावयतु प्रविद्वानिति च तस्र उपसर्प मातरं भूमिमेतामि
ति च तस्रः। सोम एकेभ्यः इति सूक्तं। उरूणसावसुतृ — उदुंबलाविति च। समाप्य संचित्य तीर्थेन प्रपाद्य यथासन
मासादयेयुः। एतदनुद्रवणं समाप्यानंतरमस्थिसंचयनं कृत्वा तमस्थिकुंभं तीर्थेन प्रवेश्य यदस्य मतस्य पूर्वमा
सनस्थानं तत्रास्थिकुंभमासादयेयुरित्यर्थः। भक्षेषु प्राणभक्षान्भक्षयित्वा दक्षिणे मार्जालीये निनयेयुः। दक्षि
णस्यां वा वेदिश्रोण्यां। अत्रग्नानिनयेयुर्मार्जालीये वा निनयेयुरिति प्रदर्शनार्थं। द्रवं निनयेयुरितरत्प्रक्षिपेयुरित्य

Indira Gandhi National
Centre for the Arts

र्थः। सप्तदशमहर्भवतित्रिवृतः पवमानारथंतरपृष्ठोऽग्निष्टोमः। यस्मिन्नहनि दीक्षितः प्रमीयते तदहरु
२०७ क्तेन प्रकारेण समाप्य तदनंतरं सप्तदशस्तोमं त्रिवृत्पवमानकं रथंतरपृष्ठमग्निष्टोमसंस्थमहरंतरं दीक्षितमर
णनिमित्तं सत्रमध्ये सत्रिभिः कर्त्तव्यं। संस्थितेऽवभृथमेके गमयंति तस्यैतदहरभिशवपंतः। एतस्मिन्नहनि स
मासे एतान्यस्थीन्यवभृथकाले अवभृतार्थं संकलितान्यप्सु कुंभेन सह प्रक्षिपेयुः। एतस्य प्रेतस्यैतदहरिति
यदंतः सर्वे सत्रिण इति सूत्रार्थः। एके संस्थित इत्यस्येदं प्रयोजनं संस्थिते तीर्थेन सारभ्य उक्तेन प्रकारेण एतदं
तं कर्म दीक्षितमरणनिमित्तं सत्रिभिः कर्तव्यं। अतः परं प्रेतस्य संबंधो नास्तीत्येके आचार्या मन्यंते। तेनातः
परं सत्रिणः सत्रमेव समाप्यमथेष्टं गच्छेयुः। निर्मथ्येन वादग्ध्वानि स्वायसंवत्सरादेन मग्निष्टोमेन याजयेयुः।।
इदानीं दहनादारभ्य पक्षांतरमुच्यते। प्रेतेष्यग्नयः पूर्ववदेवस्युस्तृ एव तिष्ठंति। स्वयोररण्योस्तु मंथनेनाग्निं २०७
सं घृतस्माद्यतेन पूर्वोक्तदेशेनात्र चयनवर्जं दग्ध्वास्थीनि संचितानि निराप्य विहृतं सत्रं समाप्य सत्रसमापन

कालादारभ्य संवत्सरे पूर्णे तान्यस्थीन्यादाय तानि यजमानं कृत्वाग्निष्टोमेन मातरनभ्याससमित्येवमादि विशेषण
विशिष्टेन याजयेयुः। त एव सत्रिण इत्ययमपरः पक्षः। अस्मिन्पक्षे पूर्वस्मिंश्च पक्षे सत्रसमापनेन तु पुरुषान्यूना
एव समाप्येयुः। नेदिष्ठिं वा दीक्षयेयुः। शेषसमापनेन तस्य संस्थापूरणार्थं तस्य संनिकृष्टदीक्षयित्वा सत्रस
मापनं कुर्युः। निर्मथ्यदहनपक्षे नेदिष्ठप्रवेशे सत्यप्यस्थियज्ञो नित्य एव। अपि वोत्थाने गृहपतौ। गृहपतेर्मतो त
दहः प्रवृत्तं समाप्यावभृथं कृत्वा सदसो दहनं कृत्वा सत्रादुत्थानं भवति न पुनः शेषं समापयेयुरित्यर्थः। उक्तस्तु
तन्त्रस्य विकारः। यः संवत्सरे स्थियज्ञः यस्मिंश्चाहनि गृहपतिर्म्रियेत तयोः शस्त्रविकार उक्तः। अनभ्यासमि
त्यादयोऽपि विकारा उक्तास्तेनयोर्द्वयोरपि भवंतीत्यर्थः। एकाहेषु यजमानासने शयीत। एकाहेषु यजमानः पूर्व
यस्मिन्नासन आस्ते मृतोऽपि तत्रैव शयीत यावत्स एकाहः परिसमाप्यते। मृतेऽपि तस्मिन्नासनस्थे तदहः परिसमा
पनं कुर्युरित्यर्थः। संस्थिते पापती ध्ववभृथगमयेयुरित्यालेखनः। तस्मिन्नहनि संस्थिते अवभृथकाले अपा

Indira Gandhi National
Centre for the Arts

पतीषु पगच्छंतीषु वहंतीष्वित्यर्थः॥ तास्ववभृथं कर्म कृतं प्रेतं तत्र प्रक्षिपेयुरित्यर्थः॥ एवमाहैतेन आचार्य आ
२०८ हुः पूर्वेण महोदहेयुरित्याश्मरथ्यः॥ तस्मिन्नहनि समाप्तेवभृथकाले पूर्वेण महोदीयोदेशस्तस्मिंदेशे तं प्रेतं सर्वैर्यज्ञपा
त्रैः सहतैरेवाग्निभिर्दहेयुरित्याश्मरथ्य आह। एष एवावभृथः॥ अस्मिन्पक्षे अन्योवभृथो न कर्तव्यः॥ एष एवाव
भृथो भवेत्। यदनेमेभिरग्निभिर्यज्ञसाधनैश्चास्मिंदेशे दहनेन समापनमिति॥१७॥ अग्निष्टोमात्यग्निष्टोम उक्थ्यः
षोडशी वाजपेयोतिरात्रोप्तोर्याम इति संस्थाः॥ अग्निष्टोमो नाम संस्थाविशेषः॥ अत्यग्निष्टोमे राजन्यस्य षोडशिनं
गृह्णीयादिति वचनादग्निमारुतादूर्ध्वं षोडशिग्रहस्य स्तुतशस्त्रे यदा भवतस्तदा सात्यग्निष्टोम इत्युच्यते। वाज
पेयाप्तोर्यामौ वक्ष्यते। इतरे अत्रैवोक्ताः॥ सोमयागास्त्रय प्रकृतस्तेन तस्यैते संस्थाविशेषाः सर्वे सोमयागाः॥ सर्वे सं
स्थासप्तविधा एवेत्यर्थः। तासां यामुपयंति तस्या अंते यज्ञपुच्छं। तासां संस्थानां मध्ये यां संस्थामुपयंति कुर्वंति २०८
तस्या अंते यज्ञपुच्छं नाम वक्ष्यमाणं कर्म कर्तव्यं। एवं स्थिते यां कांचित्संस्थां प्रकल्प्य प्रवृत्तानां संस्थां स्वत्वेन कृ

प्तायास्तस्या अधिकं निमित्तवशेन शस्त्रं। तस्मात्प्रवृत्ते यदा तदा तन्निमित्तवशात्तत्कृत्स्ना तैव सा संस्था विपरि
णमत इति तस्मादेव तस्या ऊर्ध्वं यज्ञपुच्छं नाम कर्म कर्तव्यमित्येवमर्थं तासां यामुपयंति तस्या अंत इत्युक्तं।
अनूयाजाद्युक्तं पशुना शंयुवाकांतं। तदिदं यज्ञपुच्छमुच्यते। अनूयाजादि शंयुवाकपर्यंतं पशौ यदुक्तं तदूरि
दकर्तव्यं। उक्तमस्त्विह सूक्तवाकप्रैष इति प्रैषविशेषविधानादेव पाशुकमेवात्र तंत्रं भवति नैष्टिकं। अतः प
शुनेत्यस्येदं प्रयोजनं पशौ यद्वलासनं दक्षिणेन आहवनीयस्य तदत्र कर्तव्यमिति। तेनानूयाजादौ मनोतादौ
चैवं नयति पशुपुरोडाशे सदस्येवासीतेति सिद्धं। आशंयुवाकादिति। आशंयुवाकात्पाशुकं कर्म कर्तव्यं नोर्ध्वमि
त्येवमर्थं। उक्तमस्त्विह सूक्तवाकप्रैषः। प्रैषसमाम्नाये हि सूक्तवाकप्रैषावाम्नातौ तयोरुत्तर इत्यर्थः॥ अ
वीवृधतेति पुरोडाशदेवतां पशुदेवतां। अवीवृधतेति पुरोडाशदेवतां पशुदेवतां च संध्याहर्तव्यं। अस्मिं
स्तु सूक्तवाकप्रैषे अवीवृधत पुरोडाशैरित्याम्नातं। तत्र पशुदेवता अग्निः पुरोडाशानां देवता इंद्राग्नी इंद्रश्च

Indira Gandhi National
Centre for the Arts

तेषन्निहिते तत्राग्नीदं धत्ते सैकवचनांतेपदं कां देवतामभिधत्ते। पुरोळाशैरिति बहुवचनं केवलपशुदेव
२०९ ताभिधानेन घटते। केवलैं द्राभिधाने च प्रकृतिशास्त्रं पशुदेवताभिधानेन कृतं स्यात्। अतः संनिधानाविशे
षादुभे अपि देवते अभिधत्ते तं त्रेणेति मन्यमानः पुरोळाशदेवतां पशुदेवतामित्युक्तवानाचार्यः। एवं सति पुरो
ळाशैरिति बहुवचनं पुरोळाशं धानादि पंचकं चाभिदधत्सोपपन्नं भवति। एवं सति अक्रियामेके न्यत्रतदर्थत्वा
द्वदनादिति पशुपुरोळाशाकरणे यत्पशुदेवतानभिधानमस्मिन्मंत्रे हेतुत्वेनोपवर्णितं तत्तदपि परिहृतं भव
ति। तेन पशुपुरोळाशोप्यकर्तव्यो भवति। अग्नीद्धत पुरोळाशैरित्येवास्मिन्मंत्रे वक्तव्यं च भवतीति सिद्धं।
एके यदि सवनीयस्य पशोः पशुपुरोळाशं कुर्युरग्नीद्धत्तोपुरोळाशैरित्येव ब्रूयात्। मंत्रइत्याहुरिति वाक्य
शेषः। अक्रियामेके इति एके आचार्याः पशुपुरोळाशाक्रियामुक्तवंतस्त एवात्रैक इति मन्यवतिष्ठते। तए २०९
वमाहुः यदि सवनीयस्य पशोः पशुपुरोळाशः क्रियेत तदा द्वयोर्देवतयोः पुरोळाशेन वर्धनेकर्तव्ये अग्नीद्

धत्तं पुरोळाशैरिति द्वयोरभिधानासमर्थं ब्रूयान्न तथा ब्रवीति। अतः पशुपुरोडाशदेवतैवाग्नाभिधीयते न
पशुदेवताऽ तत्तस्मादनभिधानात्पशुपुरोडाशस्याक्रियेत्येके आहुरित्यर्थः। एवमेकीयपक्षमुपन्यस्य
आत्मीयपक्षेभिधाननिर्वाहमुपपादयति। सवनीयैरेवेंद्रो वर्धते पशुपुरोळाशेन पशुदेवता। अग्नीद्धत
तिदेवतायागसंबंध उच्यते। स चोभयोरविशिष्टः संनिधानं चाविशिष्टमस्मिन्मंत्रे तथादर्शनात्। एवं स
त्येकवचनस्याविवक्षयापुभयोरभिधानमेव युक्तं नैकस्या एवेति। अस्मिन्नुपपन्ने पुरोडाशैरितीदमप्य
नयैव दिशा घटत इत्युक्तं सवनीयैरेवेंद्रो वर्धते पशुपुरोळाशेन पशुदेवतेति। ऊर्ध्वं शंयुवाकाद्धारियोजनः। शं
युवाकांतस्य वातिदेशमुक्त्वा हारियोजन उच्यमानस्तस्मादूर्ध्वमेव भवति। तत्किमूर्ध्ववचनेन। तस्यैवं प्रयो
जनं तृतीयसवने तावत्स्तोत्रं नमेव। यत्पुनः शस्त्रादूर्ध्वमनुयाजादि शंयुवाकांतं तत्तदेवैकत्वादुत्तमस्वरं
भवति। तस्मादूर्ध्वं यत्सौमिकं तत्र स्वरविधानाभावादनियतस्वरं भवतीति तस्य स्वरविधानार्थमूर्ध्ववचनं।

Indira Gandhi National
Centre for the Arts

शंयुवाकशब्देनात्र शंयुवाकस्तरुच्यते। सचोत्तमस्तेनायमर्थः। उत्तमात्प्रत्युत्तमस्वरेण हारियोजनः प्रयोक्त
२९० व्य इति। अपाः सोममस्तमिंद्र प्रयाहि धानासोमा नामिंद्रा इह चपिव च युनज्मिते ब्रह्मणा केशिना हरी इति। हरियो
जनस्यानुवाक्ये। प्रैषयाज्याः। इज्यानुवाक्ये अंत्येष्वहःसु। एते याज्यानुवाक्ये अहर्गणेष्वयान्यंत्यान्यहानि ते
षु भवतः। अंत्यवदेकाह इति न्यायादेकाहेष्वपि भवतः। तिष्ठासुकंमघवन्मापरागा अयं यज्ञो देवया अयंमियें
ध इतीतरेषु। अहर्गणेष्वंत्येभ्यो यानीतराणि तेष्वेते भवतः। अनंत्येष्वित्यर्थः। परा याहि मघवंना च याहीति या
नुवाक्योत्तरवत्स्वहःसु। हारियोजनविषयत्वादस्य विधेरहः शब्देनात्र सुत्याहान्येवोच्यंते। तेन सारस्वतसत्रा
दिषु या निसुत्याहान्यसोत्याहोभिरुत्तरयंतितेषु नंत्येष्वियमनुवाक्या भवति। तिष्ठासुकमिति वा। अयं यज्ञ इत्ये
षैव याज्या। अनुवषट्कृतेति प्रैषं मैत्रावरुण आह हमद एव मघवन्निंद्रनेश्व इति। हारियोजनाधिकारात्त २९०
स्यैवानुवषट्कारात्यागे वाति प्रैषनामकमिहमद इत्यादिकं प्रैषं मैत्रावरुण आह। मैत्रावरुणग्रहणमननुवषट्कृत

इति वचनाद्धेतुः प्राप्तिशंकानिवृत्त्यर्थं। आहेति वचनं जपादिषट्क्या वृत्त्यर्थं। अस्यनुनिषयं वक्ष्यति। तायमा
न रूपाणां प्रथमादहः प्रवर्तेते ग्भ्यासति प्रैषाविति। अद्येत्सतिरात्रे। अतिरात्रे क्रतौ वक्ष्यमाणग्वः श्वा सूत्र
स्थाने अद्यशब्दः कर्तव्यः। समर्थनिगमत्वाद्देवो हे प्राप्ते पुनर्वचनमस्य प्रैषस्याहर्गणेष्वनंत्याहरर्थं तयोस्तत्ते
स्थाने अद्यशब्दः कर्तव्यः। समर्थनिगमत्वाद्देवो हे प्राप्ते पुनर्वचनमस्य प्रैषस्याहर्गणेष्वनंत्याहरर्थं तयोस्तत्ते
रहर्गणानां च द्वादशाहप्रकृतित्वाद् द्वादशाहस्य चातिरात्रादित्वात्तत्प्रभृतित्वादस्य प्रवृत्तेः सैवास्य प्रकृतिरि
ति कृत्वानहमन्यमानस्योत्तरमद्येत्सतिरात्र इति। अयमभिप्रायः। सत्यं द्वादशाहे नंत्यान्यहान्यस्य प्रकृतिरि
ति। किंतु तेष्वेव यस्मिन्नहनि प्रकृतित्वेन गृहीतमंत्रस्य यथार्थमभिधानं संभवति तदेवास्य प्रकृतिरिति कृत्वा
तिरात्र ऊह एव युक्त इति। अद्यसुत्याभिति च। इदमपि पूर्ववदेव द्रष्टव्यं। तस्मिंतं श्रुत्वाग्नीध्रः श्वः सुत्यां प्राह
श्वः सुत्यां वाएषा ब्राह्मणानां ताभिंद्राग्नी मित्रावरुणाभ्यां वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो
देवेभ्यो ब्राह्मणेभ्यः सोम्येभ्यः सोमपेभ्यो ब्रह्मन्वाचं यच्छेति। अतिप्रैषस्यांतमाग्नीध्रः श्रुत्वा श्वः सुत्यां संहृके

श्वः सुत्यां वा एषा मिति एतं मंत्रं प्राह। आहैसेतावतैवजपादिषट्कस्योपांशुत्वेनिवृत्ते प्रकर्षवृत्त्वाद्दुत्तमए
२११ वात्र स्वरो भवति। तस्यां तं श्रुत्वेति वचनमतिप्रैषश्वः सुत्ययोः संबंधकरणार्थं। तेन तस्मिन्नदिप्रैषेषेत्र हवि
धिः श्वः सुत्या मंत्रेपि भवति। श्वः सुत्यामंत्रेपि प्राहेतिवचनाद्युत्तमस्वरो विहितः सोतिप्रैषेपि भवति। अनु
वषट्काराद्यागिस्यमपि श्वः सुत्या मंत्रेपि भवति। उपांशुत्वव्यावृत्तौ सत्संप्रयोजनं। तर्भीयोमंद्रादीनाम
पि अनियमं व्यावर्त्य उत्तमस्वरं नियमयतीति। अयमभ्युच्चयहेतुः॥१४॥ आहृतमुन्नेत्राद्रोणकलशमिव
मिव प्रतिगृह्योपहवमिष्ट्वावेक्षेत। उन्नेत्राहृतमुन्नेतरूपद्वयस्येलुकावेक्षेत तस्मीं द्रोणकलशस्थं सोमं।
हरिवतस्त्रेहारियोजनस्यस्तुतस्तोमस्यशस्तोक्थस्येश्यजुषोयोभक्षोगोसनिरश्वसनिस्तस्यतउपहूत
स्योपहूतो भक्षयामीति प्राणभक्षं भक्षयित्वा प्रतिप्रदाय द्रोणकलशमाप्यायन्यथा प्रसृतं विनिः २११
सृप्याग्नीध्रीयेविनिः सृप्याहुतीजुहूत संपीत इंदुरिंद्रमदेधादयंविप्रोवाचमर्चीन्निगच्छन्। अयं कस्य

चिद्धुतादभीकेसोमोराजानस्रवायंरिपेधात्स्वाहा। इंद्राग्नी अग्निनाद्नमागाद्यशोभर्गः सह — जोव लं
च॥ दीर्घायुत्वायन्तशारदाय प्रतिगृभ्णामि महते वीर्याय स्वाहेति। हरिवत इति प्राणभक्षमंत्रः। आप्याय
नं मुखहृदयाभिमर्शनं मंत्राभ्यां। यथा प्रसृतमितियोस्येन यथासदो हविर्धानं वा प्रसृतः सतेन विनिः सृप्ये
त्यर्थः। विनिः सृप्याहुतिरिति होमयोर्नाम्न। अयं पीतः इंद्रायधइतिहोममंत्रौ। आहवनीये षट् षट् शकलान्य
भ्यादधातिदेवकृतस्यैनसोवयजनमसिस्वाहा। पितृकृतस्यैनसोवयजनमसिस्वाहा। मनुष्यकृतस्यैनसोव
यजनमसिस्वाहा। पितृकृतस्यैनसोवयजनमसिस्वाहा। एनसएनसोवयजनमसिस्वाहा। यद्दोदेवाश्चकृमाजि
ह्वयागुर्विति च। आहवनीयवचनं आग्नीध्रीयाधिकारात्। शकलाभ्याधानं पंचभिर्यजुर्भिरेकयर्चा। द्रोणक
लशाद्धानाग्रहीत्वावेक्षेरन्नापर्यास्थामापरस्पतप्रजयाचधनेनच। इंद्रस्यकामदुघास्थकामान्मेधुङ्ध्वं प्रजां
चपशूंश्चेति। आपर्याइत्यवेक्षणमंत्रः। अथवा पूर्वभागोवेक्षणार्थः। उत्तरोवघ्राणार्थ इति। अवघ्रायांतःप

Indira Gandhi National
Centre for the Arts

रिधिदेशे निवपेयुः तस्मीमव घायताधानाअंतः परिधिदेशे निवपेयुः अत्र देशग्रहणात्सरिध्यभावेपि स
ग.१२ देशो गृह्यते। प्रस्रस्तती र्थदेशं पाणी श्चमसास्तोसव्यावृतो व्रजंति। आहवनीयदेशात्सर्वे दक्षिणावृतः प्रत्ये
त्याग्नीध्रीयं गच्छेयुः विनिःसृप्ता दुतिप्रभृति एतावत्सर्वैः कर्तव्यं। सर्वे ष्वाग्नीध्रीयदेशं गच्छत्सु तेषु ये चमसि
नस्तेसव्यावृतोभूत्वा तीर्थदेशे चमसानद्भिः पूर्णानध्वर्युभिः स्थापितान्व्रजेयुः हरिततृणानि विमृज्य प्रति स्व
चमसेभ्यास्त्रिः प्रसव्यमुदकेनात्मनः पर्युक्षंते दक्षिणैः पाणिभिः तांश्चमसान्व्रजित्वा हरिततृणान्याहृत्य णा
नीत्यर्थः तानि च दूर्वाजातीयानि शास्त्रांतरेविशेषदर्शनात्। तानि तृणानि निनिष्य प्रस्वस्व चमसेंतराप्रक्षिप्य
सर्वे चमसिनः स्वास्वां श्चमसा दूर्वास्त्युक्ता अपे। गृहीत्वा ताभिरद्भिः स्वस्वमात्मानं दक्षिणैः पाणिभिरप्रदक्षि
णं पर्युक्षंते। दक्षिणग्रहणं पाणीश्चमसेष्विस्रसव्याधिकारनिवृत्त्यर्थं। इतरैर्वा प्रदक्षिणं। सव्यैर्वा पाणिभिः २१२
प्रदक्षिणं पर्युक्षंते। स्वधा पितृभ्यः स्वधा पितामहेभ्यः स्वधा प्रपितामहेभ्य इति। एते त्रयः पर्युक्षणमंत्राः उक्तं जीवपितृके

भ्यः। पिंडदानेयदुक्तं विधानं तदत्रापि प्रसेतव्यं। तत्र जुहुयाज्जीवेभ्य इत्युपायांतरमस्ति अत्रोपायांतरस्यासंभवा
द्यस्य प्रेतास्त्रयो भवेयुः स एव पर्युक्षणं कुर्यान्नान्यः। तदूर्ध्वमन्यत्सर्वे कुर्युः पाणीश्चमसेष्ववधाय। सुधृतस्य देवसो
मतेमतिविदोन्नभिः सुतस्य स्तुतस्तोमस्य शस्तोक्थस्येष्टयजुषो योभक्षो गोसनिरश्वसनिस्तस्य त उपहूतस्योप
हूतो भक्षयामीति प्राणभक्षान्भक्षयित्वा मा हं प्रजां परासिचमित्येतेनाभ्यात्मं निनीयाप्यायंवो मरुतः श्लोकएत्वि
त्येतयाभिमृशंति। चमसिनः स्वेस्वे चमसे सं स्वं दक्षिणं पाणिमवधाय ततः स्वस्वचमसाद् दूर्वारस्युता अपआ
दायावजिघ्रंसस्तु धूतस्येति मंत्रेण। ततो मा हं प्रजामित्यनेनाभ्यात्मं स्वचमसस्या अपोभ्रमो निषिंचेयुः एते
नेति वचनमनुष्टुभोभ्युद्धरेपि अस्या अनुष्टुभोनुद्धारार्थं। ततो प्याप्यायं वइत्येतयर्चा चमसस्था अपोभ्रमो निषि
क्ता अभिमृशंति। दधिक्राव्णो अकारिषस्याग्नीध्रीये दधिद्रप्सान्प्राश्य सरस्या निविस्तृजं तउभाकवीयुवानाम
त्यादाधर्मणास्पती। पश्चिस्त्यस्य धर्मणाविसरस्या निसृजामह इति। दधिक्राव्णा इत्येतयाग्नीध्रीये दधि द्र

स्नास्यामो स्नायुः सयजमानाः सर्वे ऋत्विजः। ततः सख्यविसर्जनमपि कुर्युः। उभा कवी इति मंत्रेण। सख्यविसर्जनं
२१३ नाम तानूनप्त्राभिमर्शनादेतावंतं कालं सखित्वेन वर्तितव्यं। तत्सखित्वमस्मिन्काले विसर्जनीयमित्यर्थः। तच्च
परस्परं हस्तसंस्पर्शनेन विसर्जनीयं॥२२॥ पत्नीसंयाजेष्वरित्वावभृथं व्रजंति। यथा प्रस्तसमिस्तत्रैवोद्गायुषेस्य
नेन होतारो माथ्येनिः सर्पंति स इदानीं वेदं गच्छाति। ततः पत्नीसंयाजेष्वरित्वा पत्न्यैवेदमप्रदानादि पूर्णपात्रनि
नयनांतं कर्म अकृत्वैव वेदस्तरणं कृत्वा अकृत्वा वा प्रायश्चित्तानि जुहुयात्। इतरे रन्वारब्धः। ततो हृदयशूलो
द्वासनमंत्रेणैव कर्तव्यं। यद्यनूबंध्या पशुर्न करिष्यते तदा तदुद्वासनं पशुकर्तृभिरेव कर्तव्यं। तत्र संस्थाजपमेवाव
स्थाप्यावभृथदेशं परिव्रजंति। व्रजंतः साम्नो निधनमुपयंति। साम पंचभक्तिकं तस्यांत्या भक्तिर्निधनमित्युच्य
ते तदवभृथं गच्छंतो ब्रूयुरित्यर्थः। तत्सर्वर्त्विजामेतत्कार्यं। अवभृथे स्यालिष्टं तच्चरंति। अवभृथेष्टिर्नाम जले २१३
क्रियते तया लिष्टं तच्चरेयुः। प्रयाजाद्यनुयाजांता नास्यामिज्याः न बर्हिष्मंतौ प्रयाजानुयाजौ। अप्सुमंतौ। आज्य

भागौ भवत इत्यर्थः। गायत्र्यौ। गायत्र्यौ नेतौ भवतः। रूपभेदकरणं यत्र यत्राप्सुमंतौ तत्र तत्र गायत्र्यौ भवत इत्येव
मर्थः। वारुणं हविः। हविर्ग्रहणं हविर्दोषे सति यागावसरे पुनर्हविरेवोत्पाद्य यष्टव्यं। न पुनराज्येन प्रपुनर्मष्टव्य
मित्यर्थः। अवते हेडो वरुण नमोभिरिति द्वे। अग्नीवरुणौ स्विष्टकृदर्थे। स्विष्टकृदर्थ इति स्विष्टकृद्यागे अग्नीव
रुणौ देवता भवतीत्यर्थः। तेन स्विष्टकृद्धोमे न प्रयोक्तव्यः। अत्रा निगदे एवाग्नीवरुणाविस्रादिस्यसस्यं नद
ष्टचायष्टव्यं। त्वं नो अग्ने वरुणस्य विद्वानिति द्वे। संस्थितायां पादानुदकांते वदध्युर्नमो वरुणायाभिष्ठितो वरु
णस्य पाश इति। संस्थितायामवभृथेष्टौ सर्वे स्वपदीयान्नमो वरुणायेत्यनेन मंत्रेण दक्षिणान्पादानुदकां
ते वदध्युः। उदकांते तीरसमीपवर्तिन्युदक इत्यर्थः। संस्थितवचनमवधानादीनामिष्टिसंबंधित्वज्ञापनार्थं
तेन ह्यस्ति क्रियापक्षे अवधानादयोपि न भवंति। तत आचामंति भक्षस्यावभृथोसि भक्षितस्यावभृथोसि भक्ष
कृतस्यावभृथोसीति। तत इति पूर्वेणेदं संबद्धमिति दर्शयति। आचामंति अपः पिबंतीत्यर्थः। त्रिभिर्मंत्रैः। प्रि

Indira Gandhi National
Centre for the Arts

वंति। सर्वत्र शौचार्थमाचमनं कर्तव्यं। प्रोथ्य प्रथमेन प्रपीवंति प्रगिरंत्युत्तराभ्यां। तेषु पानेषु विशेष उच्यते। प्र
२१४ थमेन पीता अपः प्रोथ्य प्रपीवंति प्रोथनमिसंतरास्यशोधनार्थः क्रियाविशेष उच्यते तेन कृत्वा निष्ठीवेयुरित्य
र्थः। उत्तराभ्यां पीताः प्रोथ्य प्रगिरंति। आचमनविधानादेव प्रगिरंतीति सिद्धे पुनः प्रगिरंतीति वचनमत्रापि प्रोथ
नप्राप्त्यर्थं। तत आचम्याप्लवंत आपो अस्मान्मातरः शुंधयंत्विदमापः प्रवहत सुमित्र्या न आप ओषधयः संति
ति। तत इति पूर्ववत्सदार्थसंबंधार्थं। आचम्येति वचनं शौचार्थमाचमने कृते पुनराप्लवनांगमाचमनं कृत्वा
प्लवेरन्नित्येवमर्थं। स्नानमाप्लवनमित्युच्यते। तदेभिर्मंत्रैः कुर्युरित्यर्थः। एतयावृताप्सुक्षेरन्नेवाप्यदीक्षिताः। अ
नयावृताभिर्मंत्रैरित्यर्थः। एतयावृता अदीक्षिता अप्सुक्षेरन्नेव नाप्लवेरन्। अपिशब्दादाप्लवनमप्यनुकल्प्यते।
अस्य चावधारणसंबंधो भवति। तेनायमर्थः। अदीक्षिता अप्सुक्षेरन्नेव वा आप्लवेरन्नेव वेत्ययं विकल्पो भ २१५
वति। उन्नेतैतानुन्नयति। उन्नेता स्वशास्त्रोक्तविधिना सर्वानुदकादुत्तारयति। उन्नेतृहस्तेनोन्नयमाने तर्वस्तोअ

भ्युन्नयान इत्युन्नीयमाना जपंति। उन्नेत्रा उन्नीयमाना उन्नेतरित्येतं मंत्रं जपंति। उदुत्तमं सस्परीत्युदेत्य। अप
रितिशेषः। उदकसोदकादुत्तीर्येत्यर्थः। इयमप्युद् मंत्रसंज्ञा भवति। तेनोपस्पृश्य प्रयोक्तव्या। लिंगादेव कृतप
कारः कल्प्यः। समानमत ऊर्ध्वं हृदयस्पर्शनेनासंस्थाजपात्। अस्या ऋच ऊर्ध्वं यत्कर्तव्यं तद्धृदयस्पर्शनोद्य
मनेन समानं भवति। अत्र हृदयस्पर्शनोद्यमनाभावादनुमंत्रणमपामुपस्पर्शनं संस्पर्शनपरिहारार्थमर्थलु
प्तत्वादकर्तव्यं। अनवेक्षमाणा इत्यादयः सर्वैः कर्तव्याः समिदाधानांताः पदार्थाः। आसंस्थाजपादिति वचनेन हृ
दयस्पर्शनोद्यमनेन संस्थाजपस्य संबंधाभावात्तस्यापि प्रापणार्थं। संस्थाजपेनोपतिष्ठंते येये प्रवृत्तकर्मणः। अव
धानादय एते पदार्थाः सर्वैरस्मदीयैः कर्तव्याः। संस्थाजपस्त्वप्रवृत्तकर्मभिरेव कर्तव्य इत्येवमर्थं वचनं। इदं वा
न्यत्प्रयोजनमप्रवृत्तकर्माणः संस्थाजपं कुर्युरिति संस्थाजपस्य कर्तृसंबंधं ब्रुवन्कर्तृद्वारेण प्रयोगांगत्वमस्य
दर्शयति। तेन सोमप्रयोगे यत्कर्तृसंबंधि सोमप्रयोगावयवः संतिष्ठते तस्यैव संस्थाजपो भवति। तेन दीक्षणीया

Indira Gandhi National
Centre for the Arts

दिष्टुसंस्थाजपस्यप्रसंग एवनास्तीतिसिद्धं॥१३॥ गार्हपत्य उदयनीयया चरंति। गार्हपत्येशालामुखीय इत्यर्थः।
२९५ स ह्युत्तरवेदिप्रणयनादूर्ध्वं सोमस्य गार्हपत्यो भवतिवचनाद्यतः प्रणयति स गार्हपत्य इति। उदयनीया नामेष्टिः
तस्याः शालामुखीय एवाहवनीयो भवति। सा प्रायणीययोक्ता। साग्रहणं प्रायणीयया अस्या वैलक्षण्य प्रदर्शना
र्थं तच्चवैलक्षण्यमंशं ध्वेता कृत्स्नं संस्थावेत्येवमादि। तस्या अध्वर्युप्रमुखपत्न्यास्ताभिर्निर्मीयते। शनैस्तरा
मित्येषस्तारो न स्मतिदिश्यते अवधिस्वरत्वात्तस्य। पदार्थस्य धर्मो ह्यतिदेशेन प्राप्यते नावधिधर्म इति। पथ्यास्व
स्तिरित्युत्तमा ज्यहविषां। सर्वसाम्येविशेष उच्यते। तत्र च तस्य आज्यहविषो देवताः अदितिः पंचमी चरुह विश्व
पथ्यास्वस्तित्र प्रथमा इह चतुर्थी भवतीत्यर्थः॥ विपरीताश्च याज्यानुवाक्याः। तत्र या याज्या सेहानुवाक्या
तत्र यानुवाक्या सेह याज्या भवतीत्यर्थः। ते चैव कुर्युर्ये प्रायणीयां। तत्र ये कर्तारस्त एवात्रनियम्यते। तत्र यदि २९५
प्रतिनिधिभूतः कुर्यात्स एवात्र कुर्यादित्यर्थः। प्रकृतास्संयाज्ये। विपरीताश्च याज्यानुवाक्या इत्यस्य प्रतिप्रसवो

यं। संस्थितायां मैत्रावरुण्यनूबंध्या। उदयनीयायां समाप्तायां मित्रावरुणदेवत्योनूबंध्या नाम पशुः कर्तव्यः।
सदस्यैके। स पशुः सदस्यासीनैर्होत्रादिभिः कर्तव्य इत्येक आहुः। अस्मिन्न विपक्षे दंडप्रदानान्तमुत्तरवेद्यामित्यु
क्तं। उत्तरवेद्यामेके। एके शाखिन उत्तरवेदिसमीप आसीनैरित्याहुः। हुतायां वपायां मध्ये कादशिन्यग्नतः कृताग्नी
षोमीयेण संचरेण व्रजित्वा गार्हपत्ये त्वाष्ट्रेण पशुना चरंति। अनूबंध्याया वपायां हुतायामिदं नैमित्तिकं कर्मोच्य
ते। यदि यस्मिन्कृताग्नीषोमीयस्य स्थाने सवनीयस्थाने वा पश्वैकादशिनी प्रयुक्ता स्यात्तदा तस्मिन्कृतावस्मि
न्काले अग्नीषोमीयेण संचरेण अग्नीषोमीयप्रणयनेयः संचरस्तेनेत्यर्थः। तेन संचरेण शालामुखीयं गत्वा तत्र
त्वाष्ट्रेण त्वष्टृदेवत्येन पशुना यजेयुरित्यर्थः। अंजनादि पर्यग्निकृत्वोत्सृजंत्य पुनरायनाय। तत्त्वाष्ट्रं पशुं यूपांजना
दि पर्यग्निकरणांतं कृत्वोत्सृजंति। अपुनरायनाय अपुनरागमनायेत्यर्थः। तावानेवायं पशुयागो भवति। नातऊ
र्ध्वं कर्तव्यो भवतीत्यर्थः। यदि त्वध्वर्युराज्येन समाप्नुयुस्तथैव होता कुर्यात्। उक्तः पक्ष उत्सर्गो नाम त्यमपरः प

Indira Gandhi National
Centre for the Arts